सुषहासोमतानितेपुनानायप्रभूवसो ॥ वर्धासमुद्रमुक्थ्यं ॥ विश्वावसूनिसंजयन्पवस्वसोमधारया ॥
इनुद्वेषांसिसध्र्यक् ॥ रक्षासुनोऽअररुषःस्वनात्समस्यकस्यचित् ॥ निदोयत्रमुमुच्महे ॥ एंदोपार्थिवं
रयिंदिव्यंपवस्वधारया ॥ द्युमंतंशुष्ममाभर ॥ १९ ॥ प्रधाराऽअस्यशुष्मिणोवृथापवित्रेऽअक्षरन् ॥
पुनानोवाचमिष्यति ॥ इंदुर्हियानःसोतृभिर्मृज्यमानःकनिक्रदत् ॥ इयर्तिवग्नुमिंद्रियं ॥ आनःशुष्मंनृ
षाह्यंवीरवंतंपुरुस्पृहं ॥ पवस्वसोमधारया ॥ प्रसोमोऽअतिधारयापवमानोऽअसिष्यदत् ॥ अभिद्रोणा
न्यासदं ॥ अप्सुत्वामधुमत्तमंहरिंहिन्वंत्यद्रिभिः ॥ इंदविंद्रायपीतये ॥ सुनोतामधुमत्तमंसोममिंद्राय
वज्रिणे ॥ चारुंशर्धायमत्सरं ॥ २० ॥ प्रसोमासःस्वाध्यः पवमानासोऽअक्रमुः ॥ रयिंकृण्वंतिचेत
नं ॥ दिवस्पृथिव्याऽअधिभवेंदोद्युम्नवर्धनः ॥ भवावाजानांपतिः ॥ तुभ्यंवाताऽअभिप्रियस्तुभ्यमर्ष
तिसिंधवः॥सोमवर्धंतितेमहः॥आप्यायस्वसमेतुतेविश्वतःसोमवृष्ण्यं॥भवावाजस्यसंगथे॥तुभ्यंगावोघृ
तंपयोबभ्रोदुदुह्रेऽअक्षितं ॥ वर्षिष्ठेऽअधिसानवि ॥ स्वायुधस्यतेसतोभुवनस्यपतेवयं ॥ इंदोसखित्वमु

श्मसि ॥ २१ ॥ प्रसोमासोमदच्युतःश्रवसेनोमघोनः ॥ सुताविदथेऽअक्रमुः ॥ आदींत्रितस्ययोषणो
हरिंहिन्वंत्यद्रिभिः ॥ इंदुमिंद्रायपीतये ॥ आदींहंसोयथागणंविश्वस्यावीवशन्मतिं ॥ अत्योनगोभिर
ज्यते ॥ उभेसोमावचाकशन्मृगोनतक्तोऽअर्षसि ॥ सीदन्नृतस्ययोनिमा ॥ अभिगावोऽअनूषतयोषा
जारमिवप्रियं ॥ अगन्नाजिंयथाहितं ॥ अस्मेधेहिद्युमद्यशोमघवद्भ्यश्चमह्यंच ॥ सनिंमेधामुतश्रवः ॥
॥ २२ ॥ प्रसोमासोविपश्चितोपांनयंत्यूर्मयः ॥ वनानिमहिषाऽइव ॥ अभिद्रोणानिबभ्रवःशुक्राऽऋत
स्यधारया ॥ वाजंगोमंतमक्षरन् ॥ सुताऽइंद्रायवायवेवरुणायमरुद्भ्यः ॥ सोमाऽअर्षंतिविष्णवे ॥ ति
स्रोवाचऽउदीरतेगावोमिमंतिधेनवः ॥ हरिरेतिकनिक्रदत् ॥ अभिब्रह्मीरनूषतयह्वीऋतस्यमातरः ॥
मर्मृज्यंतेदिवःशिशुं ॥ रायःसमुद्रांश्चतुरोस्मभ्यंसोमविश्वतः ॥ आपवस्वसहस्रिणः ॥ २३ ॥ प्रसुवा
नोधारयातनेंदुर्हिन्वानोऽअर्षति ॥ रुजद्दृळ्हाव्योजसा ॥ सुतऽइंद्रायवायवेवरुणायमरुद्भ्यः ॥ सोमोऽ
अर्षतिविष्णवे ॥ वृषाणंवृषभिर्यतंसुन्वंतिसोममद्रिभिः ॥ दुहंतिशक्मनापयः ॥ भुवत्त्रितस्यमर्ज्योभु

वदिंद्रायमत्सरः ॥ संरूपैरज्यतेहरिः ॥ अभीमृतस्यविष्टपंदुहतेपृश्निमातरः ॥ चारुप्रियतमंहविः ॥
समेनमन्हुताऽइमागिरोऽअर्षतिसस्रुतः ॥ धेनूर्वाश्रोऽअवीवशत् ॥ २४ ॥ आनःपवस्वधारयापवमान
रयिंपृथुं ॥ ययाज्योतिर्विदासिनः ॥ इंदोसमुद्रमींखयपवस्वविश्वमेजय ॥ रायोधर्तानऽओजसा ॥ त्व
यावीरेणवीरवोभिष्यामपृतन्यतः ॥ क्षराणोऽअभिवार्यं ॥ प्रवाजमिंदुरिष्यातिसिषासन्वाजसाऽऋषिः ॥
व्रताविदानऽआयुधा ॥ तंगीर्भिर्वाचमींखयंपुनानंवासयामसि ॥ सोमंजनस्यगोपतिं ॥ विश्वोयस्यव्र
तेजनोदाधारधर्मणस्पतेः ॥ पुनानस्यप्रभूवसोः ॥ २५ ॥ असर्जिरथ्योयथापवित्रेचम्वोःसुतः ॥ का
र्ष्मन्वाजीन्यक्रमीत् ॥ सवन्हिःसोमजागृविःपवस्वदेववीरतिं ॥ अभिकोशंमधुश्चुतं ॥ सनोज्योतींषि
पूर्व्यपवमानविरोचय ॥ क्रत्वेदक्षायनोहिनु ॥ शुंभमानऽऋतायुभिर्मृज्यमानोगभस्त्योः ॥ पवतेवारेऽ
अव्यये ॥ सविश्वादाशुषेवसुसोमोदिव्यानिपार्थिवा ॥ पवतामांतरिक्ष्या ॥ आदिवस्पृष्ठमश्वयुर्गव्ययुः
सोमरोहसि ॥ वीरयुःशवसस्पते ॥ २६ ॥ ससुतःपीतयेवृषासोमःपवित्रेऽअर्षति ॥ विघ्नन्रक्षांसिदेव
युः ॥ सपवित्रेविचक्षणोहरिरर्षतिधर्णसिः ॥ अभियोनिंकनिक्रदत् ॥ सवाजीरोचनादिवःपवमानोवि

धावति ॥ रक्षोहावारमव्ययं ॥ सावितस्याधिसानंविपवमानोऽअरोचयत् ॥ जामिभिःसूर्यंसह ॥ सवृत्र
हावृषासुतोवरिवोविददाभ्यः ॥ सोमोवाजमिवासरत् ॥ सदेवःकविनेषितो३भिद्रोणानिधावति ॥ इंदु
रिंद्रायमंहना ॥ २७ ॥ एषऽउस्यवृषारथोव्योवारेभिरर्षति ॥ गच्छन्वाजंसहस्रिणं ॥ एतंत्रितस्ययोष
णोहरिंहिन्वंत्यद्रिभिः ॥ इंदुमिंद्रायपीतये ॥ एतंत्यंहरितोदशमर्मृज्यंतेऽअपस्युवः ॥ याभिर्मदायशुंभ
ते ॥ एषस्यमानुषीष्वाश्येनोनाविक्षुसीदति ॥ गच्छन्जारोनयोषितं ॥ एषस्यमद्योरसोवचष्टेदिवःशि
शुः ॥ यऽइंदुर्वारमाविशत् ॥ एषस्यपीतयेसुतोहरिरर्षतिधर्णसिः ॥ क्रंदन्योनिमभिप्रियं ॥ २८ ॥
आशुरर्षबृहन्मतेपरिप्रियेणधाम्ना ॥ यत्रदेवाऽइतिब्रवन् ॥ परिष्कृण्वन्ननिष्कृतंजनाययातयन्निषः ॥
वृष्टिंदिवःपरिस्रव ॥ सुतऽएतिपवित्रऽआत्विषिंदधानऽओजसा ॥ विचक्षाणोविरोचयन् ॥ अयंसयो
दिवस्परिरघुयामापवित्रऽआ ॥ सिंधोरूर्मान्यक्षरत् ॥ आविवासन्परावतोअथोऽअर्वावतःसुतः ॥ इंद्रा
यसिच्यतेमधु ॥ समीचीनाऽअनूषतहरिंहिन्वंत्यद्रिभिः ॥ योनावृतस्यसीदत ॥ २९ ॥ पुनानोऽअक्रमी
दभिविश्वामृधोविचर्षणिः ॥ शुंभंतिविप्रंधीतिभिः ॥ आयोनिमरुणोरुहद्गमदिंद्रंवृषासुतः ॥ ध्रुवेसद

सिसीदति ॥ नूनोरयिंमहामिंदोस्मभ्यंसोमविश्वतः ॥ आपवस्वसहस्रिणं ॥ विश्वासोमपवमानद्युम्ना
नींदवाभर ॥ विदाःसहस्रिणीरिषः ॥ सनःपुनानआभररयिंस्तोत्रेसुवीर्यं ॥ जरितुर्वर्धयागिरः ॥ पुनान
ऽइंदवाभरसोमद्विबर्हसंरयिं ॥ वृषन्निंदोनऽउक्थ्यं ॥ ३० ॥ प्रयेगावोनभूर्णयस्त्वेषाऽअयासोऽअक्र
मुः ॥ घ्नंतःकृष्णामपत्वचं ॥ सुवितस्यमनामहेतिसेतुंदुराव्यं ॥ साह्वांसोदस्युमव्रतं ॥ शृण्वेवृष्टेरिवस्व
नःपवमानस्यशुष्मिणः ॥ चरंतिविद्युतोदिवि ॥ आपवस्वमहीमिषंगोमदिंदोहिरण्यवत् ॥ अश्वावद्वा
जवत्सुतः ॥ सपवस्वविचर्षणऽआमहीरोदसीपृण ॥ उषाःसूर्योनरश्मिभिः ॥ परिणःशर्मयंत्याधारया
सोमविश्वतः ॥ सरारसेवविश्वतः ॥३१॥ जनयन्रोचनादिवोजनयन्नप्सुसूर्यं ॥ वसानोगाऽअपोहरिः ॥
एषप्रत्नेनमन्मनादेवोदेवेभ्यस्परि ॥ धारयापवतेसुतः ॥ वावृधानायतूर्वयेपवंतेवाजसातये ॥ सोमाःस
हस्रपाजसः ॥ दुहानःप्रत्नमित्पयः पवित्रेपरिषिच्यते ॥ क्रंदन्देवांऽअजीजनत् ॥ अभिविश्वा
निवार्याभिदेवांऽऋतावृधः ॥ सोमःपुनानोऽअर्षति ॥ गोमन्नःसोमवीरवदश्वावद्वाजवत्सुतः ॥ पवस्वबृ

हुतीरिषः ॥ ३२ ॥ योऽअत्यंइवमृज्यतेगोभिर्मदायहर्यतः ॥ तंगीर्भिर्वासयामसि ॥ तन्नोविश्वाऽअव
स्युवोगिरःशुंभंतिपूर्वथा ॥ इंदुमिंद्रायपीतये ॥ पुनानोयातिहर्यतःसोमोगीर्भिःपरिष्कृतः ॥ विप्र
स्यमेध्यातिथेः ॥ पवमानविदारयिमस्मभ्यंसोमसुश्रियं ॥ इंदोसहस्रवर्चसं ॥ इंदुरत्योनवाजसृ
त्कनिक्रंतिपवित्रऽआ ॥ यदक्षारतिदेवयुः ॥ पवस्ववाजसातयेविप्रस्यगृणतोवृधे ॥ सोमरास्व
सुवीर्यं ॥ ३३ ॥ इतिपवमानेद्वितीयोध्यायः ॥ ॥ हरि. ॐम् ॥ प्रणऽइंदोमहेतनऽऊर्मिंनबि
भ्रदर्षसि ॥ अभिदेवांऽअयास्यः ॥ मतीजुष्टोधियाहितःसोमोहिन्वेपरावति ॥ विप्रस्यधारयाकविः ॥
अयंदेवेषुजागृविःसुतऽएतिपवित्रऽआ ॥ सोमोयातिविचर्षणिः ॥ सनःपवस्ववाजयुश्चक्राणश्चारुमध्व
रं ॥ बर्हिष्मांऽआविवासति ॥ सनोभगायवायवेविप्रवीरःसदावृधः ॥ सोमोदेवेष्वायमत् ॥ सनोऽअ
द्यवसुत्तयेक्रतुविद्गातुवित्तमः ॥ वाजंजेषिश्रवोबृहत् ॥ १ ॥ सपवस्वमदायकंनृचक्षादेववीतये ॥ इंद
विंद्रायपीतये ॥ सनोऽअर्षाभिदूत्यं त्वमिंद्रायतोशसे ॥ देवान्त्सखिभ्यऽआवरं ॥ उतत्वामरुणंवयंगो

भिरञ्ज्मोमदायकं ॥ विनोरायेदुरोंदधि ॥ अत्यूपवित्रमक्रमीद्वाजीधुरंनयामनि ॥ इंदुर्देवेषुपत्यते ॥ स
मीसखायोऽअस्वरन्वनेक्रीळंतमत्यविं ॥ इंदुंनावाऽअनूषत ॥ तयापवस्वधारयायपयापीतोविचक्षसे ॥
इंदोस्तोत्रेसुवीर्यं ॥ २ ॥ असृग्रन्देववीतयेत्यासःकृत्व्याऽइव ॥ क्षरंतःपर्वतावृधः ॥ परिष्कृतासऽइ
न्दवोयोषेवापित्र्यावती ॥ वायुंसोमाऽअसृक्षत ॥ एतेसोमासऽइंदवःप्रयस्वंतश्चमूसुताः ॥ इन्द्रंवर्धंति
कर्मभिः ॥ आधावतासुहस्त्यःशुक्रागृभ्णीतमंथिना ॥ गोभिःश्रीणीतमत्सरं ॥ सपवस्वधनंजयप्रयंता
राधसोमहः ॥ अस्मभ्यंसोमगातुवित् ॥ एतंमृजंतिमर्ज्यंपवमानंदशक्षिपः ॥ इंद्रायमत्सरंमदं ॥३॥ अया
सोमःसुकृत्ययामहश्चिदभ्यवर्धत ॥ मंदानऽउद्वृषायते ॥ कृतानीदस्यकर्त्वाचेतंतेदस्युतर्हणा ॥ ऋणा
चधृष्णुश्चयते ॥ आत्सोमऽइंद्रियोरसोवज्रःसहस्रसाभुवत् ॥ उक्थंयदस्यजायते ॥ स्वयंकविर्विधर्तरि
विप्रायरत्नमिच्छति ॥ यदीमर्मृज्यतेधियः ॥ सिषासतूरयीणांवाजेष्वर्वतामिव ॥ भरेषुजिग्युषामसि ॥
॥ ४ ॥ तंत्वानृम्णानिबिभ्रतंसधस्थेषुमहोदिवः ॥ चारुंसुकृत्ययेमहे ॥ संवृक्तधृष्णुमुक्थ्यंमहामाहिव्र

तेमदं ॥ शतंपुरोरुरुक्षणिं ॥ अतस्त्वारयिमभिराजानंसुक्रतोदिवः ॥ सुपर्णोऽअव्यथिभरत् ॥ विश्वं
स्माऽइत्स्वर्दृशेसाधारणंरजस्तुरं ॥ गोपामृतस्यविर्भरत् ॥ अधाहिन्वानऽइंद्रियंज्यायोमहित्वमानशे ॥
अभिष्टिकृद्विचर्षणिः ॥ ५ ॥ पवस्ववृष्टिमासुनोपामूर्मिंदिवस्परि ॥ अयक्ष्माबृहतीरिषः ॥ तयापव
स्वधारयाययागावऽइहागमन् ॥ जन्यासऽउपनोगृहं ॥ घृतंपवस्वधारयायज्ञेषुदेववीतमः ॥ अस्म
भ्यंवृष्टिमापव ॥ सनऽऊर्जेव्यऽव्ययंपवित्रंधावधारया ॥ देवासःशृणवन्हिकं ॥ पवमानोऽअसिष्यद
द्रक्षांस्यपजंघनत् ॥ प्रत्नवद्रोचयन्रुचः ॥ ६ ॥ उत्तेशुष्मासऽईरतेसिंधोरूर्मेरिवस्वनः ॥ वाणस्यचो
दयापविं ॥ प्रसवेतऽउदीरतेतिस्रोवाचोमखस्युवः ॥ यदव्यऽएषिसानवि ॥ अव्योवारेपरिप्रियंहरिंहि
न्वंत्यद्रिभिः ॥ पवमानंमधुश्चुतं ॥ आपवस्वमदिन्तमपवित्रंधारयाकवे ॥ अर्कस्ययोनिमासदं ॥ सप
वस्वमदिन्तमगोभिरंजानोऽअक्तुभिः ॥ इंदविंद्रायपीतये ॥ ७ ॥ अध्वर्योऽअद्रिभिःसुतंसोमंपवित्रऽ
आसृज ॥ पुनीहींद्रायपातवे ॥ दिवःपीयूषमुत्तमंसोममिंद्रायवज्रिणे ॥ सुनोतामधुमत्तमं ॥ तवत्यऽइं

दोऽअंधसोदेवामधोव्यैश्नते ॥ पवमानस्यमरुतः ॥ त्वंहिसोमवर्धयन्त्सुतोमदायभूर्णये ॥ वृषन्स्तोतार
मूतये ॥ अभ्यर्षविचक्षणपवित्रंधारयासुतः ॥ अभिवाजमुतश्रवः ॥ ८ ॥ परिद्युक्षःसनद्रयिर्भरद्वाजंनो
ऽअंधसा ॥ सुवानोऽअर्षपवित्रऽआ ॥ तवप्रत्नेभिरध्वभिरव्योवारेपरिप्रियः ॥ सहस्रधारोयात्तना ॥ च
रुर्नयस्तमींखयेंदोनदानमींखय ॥ वधैर्वधस्नवींखय ॥ निशुष्ममिंदवेषांपुरुहूतजनानां ॥ योऽअस्मांऽ
आदिदेशति ॥ शतंनऽइंदऽऊतिभिःसहस्रंवाशुचीनां ॥ पवस्वमंहयद्रयिः ॥ ९ ॥ उत्तेशुष्मासोऽअ
स्थूरक्षोभिंदंतोऽअद्रिवः ॥ नुदस्वयाःपरिस्पृधः ॥ अयानिजघ्निरोजसारथसंगेधनेहिते ॥ स्तवाऽअबी
भ्युषाहृदा ॥ अस्यव्रतानिनाधृषेपवमानस्यदूढ्या ॥ रुजयस्त्वापृतन्यति ॥ तंहिन्वंतिमदच्युतंहरिंन
दीषुवाजिनं ॥ इंदुमिंद्रायमत्सरं ॥ १० ॥ अस्यप्रत्नामनुद्युतंशुक्रंदुदुह्रेअह्रयः ॥ पयःसहस्रसामृ
षिं ॥ अयंसूर्यऽइवोपदृगयंसरांसिधावति ॥ सप्तप्रवतऽआदिवं ॥ अयंविश्वानितिष्ठतिपुनानोभुवनोप
रि ॥ सोमोदेवोनसूर्यः ॥ परिणोदेववीतयेवाजांऽअर्षसिगोमतः ॥ पुनानऽइंदविंद्रयुः ॥ ११ ॥ यवं
यवंनोऽअंधसापुष्टंपुष्टंपरिस्रव ॥ सोमविश्वाचसौभगा ॥ इंदोयथातवस्तवोयथातेजातमंधसः ॥ निब

र्हिषिप्रियेसदः ॥ उतनोगोविदश्ववित्पवस्वसोमांधसा ॥ मक्षूतमेभिरहभिः ॥ योजिनातिनजीयतेहं
तिशत्रुमभीत्य ॥ सपवस्वसहस्रजित् ॥ १२ ॥ परिसोमऽऋतंबृहदाशुःपवित्रेऽअर्षति ॥ विघ्नन्रक्षां
सिदेवयुः ॥ यत्सोमोवाजमर्षतिशतंधाराअपस्युवः ॥ इंद्रस्यसख्यमाविशन् ॥ अभित्वायोषणोद
शजारंनकन्यानूषत ॥ मृज्यसेसोमसातये ॥ त्वमिंद्रायविष्णवेस्वादुरिंदोपरिस्रव ॥ नृन्स्तोतृन्पाह्यंह
सः ॥ १३ ॥ प्रतेधाराऽअसश्चतोदिवोनयंतिवृष्टयः ॥ अच्छावाजंसहस्रिणं ॥ अभिप्रियाणिकाव्या
विश्वाचक्षाणोअर्षति ॥ हरिस्तुंजानऽआयुधा ॥ समर्मृजानऽआयुभिरिभोराजेवसुव्रतः ॥ श्येनोनवं
सुषीदति ॥ सनोविश्वादिवोवसूतोपृथिव्याऽअधि ॥ पुनानऽइंदवाभर ॥ १४ ॥ तरत्समंदीधावतिधा
रासुतस्यांधसः ॥ तरत्समंदीधावति ॥ उस्रावेदवसूनांमर्तस्यदेव्यवसः ॥ तरत्स० ॥ ध्वस्रयोःपुरुष
न्त्योरासहस्राणिदद्महे ॥ तरत्स० ॥ आययोस्त्रिंशतंतनासहस्राणिचदद्महे ॥ तरत्स० ॥ १५ ॥ पव
स्वगोजिदश्वजिद्विश्वजित्सोमरण्यजित् ॥ प्रजावद्रत्नमाभर ॥ पवस्वाद्भ्योऽअदाभ्यःपवस्वौषधी
भ्यः ॥ पवस्वधिषणाभ्यः ॥ त्वंसोमपवमानोविश्वानिदुरितातर ॥ कविःसीदनिबर्हिषि ॥ पवमानःस्व

विंदोजायमानोभवोमहान् ॥ इंदोविश्वाँऽअभीदसि ॥ १६ ॥ प्रगायत्रेणगायतपवमानंविचर्षणिं ॥
इंदुंसहस्रचक्षसं ॥ तंत्वासहस्रचक्षसमथोसहस्रभर्णसं ॥ अतिवारमपाविषुः ॥ अतिवारान्पवमानोऽ
असिष्यदत्कलशाँऽअभिधावति ॥ इंद्रस्यहार्द्याविशन् ॥ इंद्रस्यसोमराधसेशंपवस्वविचर्षणे ॥ प्रजा
वद्रेतऽआभर ॥ १७ ॥ अयावीतीपरिस्रवयस्तऽइंदोमदेष्वा ॥ अवाहन्नवतीर्नव ॥ पुरःसद्यऽइत्था
धियेदिवोदासायशंबरं ॥ अधत्यंतुर्वशंयदुं ॥ परिणोऽअश्वमश्वविद्गोमदिंदोहिरण्यवत् ॥ क्षरासहास्रि
णीरिषः ॥ पवमानस्यतेवयंपवित्रमभ्युंदतः ॥ सखित्वमावृणीमहे ॥ येतेपवित्रमूर्मयोभिक्षरंतिधारया ॥
तेभिर्नःसोममृळय ॥ १८ ॥ सनःपुनानऽआभररयिंवीरवतीमिषं ॥ ईशानःसोमविश्वतः ॥ एतमुत्यं
दशक्षिपोमृजंतिसिंधुमातरं ॥ समादित्येभिरख्यत ॥ समिंद्रेणोतवायुनासुतऽएतिपवित्रऽआ ॥ संसू
र्यस्यरश्मिभिः ॥ सनोभगायवायवेपूष्णेपवस्वमधुमान् ॥ चारुर्मित्रेवरुणेच ॥ उच्चातेजातमंधसोदि
विषद्भूम्याददे ॥ उग्रंशर्ममहिश्रवः ॥ १९ ॥ एनाविश्वान्यर्यऽआद्युम्नानिमानुषाणां ॥ सिषासंतोव
नामहे ॥ सनऽइंद्राययज्यवेवरुणायमरुद्भ्यः ॥ वरिवोवित्परिस्रव ॥ उपोषुजातमप्तुरंगोभिर्भंगंपरि

ष्कृतं ॥ इंदुंदेवाऽअयासिषुः ॥ तमिहंर्धंतुनोगिरोवत्संसंशिश्वरीरिव ॥ यऽइंद्रस्यहृदंसनिः ॥ अर्षीणः
सोमशंगवेधुक्षस्वंपिप्युषीमिषं ॥ वर्धासमुद्रमुक्थ्यं ॥ २० ॥ पवमानोऽअजीजनद्दिवश्चित्रंनतन्य
तुं ॥ ज्योतिर्वैश्वानरंबृहत् ॥ पवमानस्यतेरसोमदोराजन्नदुच्छुनः ॥ विवारमव्यमर्षति ॥ पवमानरस
स्तवदक्षोविराजतिद्युमान् ॥ ज्योतिर्विश्वंस्वर्दृशे ॥ यस्तेमदोवरेण्यस्तेनापवस्वांधसा ॥ देवावीरघशं
सहा ॥ जघ्निर्वृत्रममित्रियंसस्निर्वाजंदिवेदिवे ॥ गोषाऽउऽअश्वसाअसि ॥ २१ ॥ संमिश्लोऽअरु
षोभवसूपस्थाभिर्नधेनुभिः ॥ सीदन्छ्येनोनयोनिमा ॥ सपवस्वयऽआविथेंद्रंवृत्रायहंतवे ॥ ववित्रांसं
महीरपः ॥ सुवीरासोवयंधनाजयेमसोममीढ्वः ॥ पुनानोवर्धनोगिरः ॥ त्वोतासस्तवावसास्यामवन्वंतऽ
आमुरः ॥ सोमव्रतेषुजागृहि ॥ अपघ्नन्पवतेमृधोपसोमोऽअराव्णः ॥ गच्छन्निंद्रस्यनिष्कृतं ॥ २२ ॥
महोनोरायऽआभरपवमानजहीमृधः ॥ रास्वेंदोवीरवद्यशः ॥ नत्वाशतंचनह्रुतोराधोदित्संतमामिन
न् ॥ यत्पुनानोमखस्यसे ॥ पवस्वेंदोवृषासुतःकृधीनोयशसोजने ॥ विश्वाऽअपद्विषोजहि ॥ अस्य

तेसख्येवयंतवेंदोद्युम्नऽउत्तमे ॥ सासह्यामपृतन्यतः ॥ यातेभीमान्यायुधातिग्मानिसंतिधूर्वणे ॥ रक्षा
समस्यनोनिदः ॥ २३ ॥ एतेऽअसृग्रमिंदवस्तिरःपवित्रमाशवः ॥ विश्वान्यभिसौभगा ॥ विघ्नं
तोदुरितापुरुसुगातोकायवाजिनः ॥ तनाकृण्वंतोऽअर्वते ॥ कृण्वंतोवरिवोगवेभ्यर्षतिसुष्टुतिं ॥ इळा
मस्मभ्यंसंयतं ॥ असाव्यंशुर्मदायाप्सुदक्षोगिरिष्ठाः ॥ श्येनोनयोनिमासदत् ॥ शुभ्रमंधोदेववातमप्सु
धूतोनृभिःसुतः ॥ स्वदंतिगावःपयोभिः ॥ २४ ॥ आदीमश्वंनहेतारोशूशुभन्नमृताय ॥ मध्वोरसंसध
मादे ॥ यास्तेधारामधुश्चुतोसृग्रमिंदऽऊतये ॥ ताभिःपवित्रमासदः ॥ सोऽअर्षेंद्रायपीतयेतिरोरोमाण्य
व्यया ॥ सीदन्योनावनेष्वा ॥ त्वमिंदोपरिस्रववस्वादिष्ठोऽअंगिरोभ्यः ॥ वरिवोविद्घृतंपयः ॥ अयंवि
चर्षणिर्हितःपवमानःसचेतति ॥ हिन्वानऽआप्यंबृहत् ॥ २५ ॥ एषवृषावृषव्रतःपवमानोअशस्ति
हा ॥ करद्वसूनिदाशुषे ॥ आपवस्वसहस्रिणंरयिंगोमंतमश्विनं ॥ पुरुश्चंद्रंपुरुस्पृहं ॥ एषस्यपरिषिच्य
तेमर्मृज्यमानऽआयुभिः ॥ उरुगायःकविक्रतुः ॥ सहस्रोतिःशतामघोविमानोरजसःकविः ॥ इंद्रायप

व्रतेमदः ॥ गिराजातइहस्तुतइंदुरिंद्रायधीयते ॥ वियोनावसताविव ॥ २६ ॥ पवमानःसुतोनृभिःसो
मोवाजमिवासरत् ॥ चमूषुशक्मनासदं ॥ तंत्रिपृष्ठेत्रिवंधुरेरथेयुंजंतियातवे ॥ ऋषीणांसप्तधीतिभिः ॥
तंसोतारोधनस्पृतमाशुंवाजाययातवे ॥ हरिंहिनोतवाजिनं ॥ आविशन्कलशंसुतोविश्वाऽअर्षन्नभिश्रि
यः ॥ शूरोनगोषुतिष्ठति ॥ आतऽइंदोमदायकंपयोदुहंत्यायवः ॥ देवादेवेभ्योमधु ॥ २७ ॥ आनः
सोमंपवित्रऽआसृजतामधुमत्तमं ॥ देवेभ्योदेवश्रुत्तमं ॥ एतेसोमाऽअसृक्षतगृणानाःश्रवसेमहे ॥ म
दिन्तमस्यधारया ॥ अभिगव्यानिवीतयेनृम्णापुनानोऽअर्षसि ॥ सनद्वाजःपरिस्रव ॥ उतनोगोमती
रिषोविश्वाऽअर्षपरिष्टुभः ॥ गृणानोजमदग्निना ॥ पवस्ववाचोऽअग्रियः सोमचित्राभिरूतिभिः ॥
अभिविश्वानिकाव्या ॥ २८ ॥ त्वंसमुद्रियाअपोग्रियोवाचईरयन् ॥ पवस्वाविश्वमेजय ॥ तुभ्येमाभु
वनाकवेमहिम्नेसोमतस्थिरे ॥ तुभ्यमर्षतिसिंधवः ॥ प्रतेदिवोनवृष्टयोधारायंत्यसश्चतः ॥ अभिशुक्रा
मुपस्तिरं ॥ इंद्रायेंदुंपुनीतनोग्रंदक्षायसाधनं ॥ ईशानंवीतिराधसं ॥ पवमानऋतःकविःसोमःपवित्रमा

सदत् ॥ दधत्स्तोत्रेसुवीर्यं ॥ २९ ॥ आपवस्वसहस्रिणंरयिंसोमसुवीर्यं ॥ अस्मेश्रवांसिधारय ॥ इ
षमूर्जंचपिन्वसइंद्रायमत्सरिंतमः ॥ चमूष्वानिषीदसि ॥ सुतइंद्रायविष्णवेसोमःकलशेअक्षरत् ॥ म
धुमाँऽअस्तुवायवे ॥ एतेअसृग्रमाशवोतिह्वरांसिबभ्रवः ॥ सोमाऽऋतस्यधारया ॥ इंद्रंवर्धंतोअप्तुरः
कृण्वंतोविश्वमार्यं ॥ अपघ्नंतोअराव्णः ॥ ३० ॥ सुताअनुस्वमारजोभ्यर्षंतिबभ्रवः ॥ इंद्रंगच्छंतइं
दवः ॥ अयापवस्वधारयाययासूर्यमरोचयः ॥ हिन्वानोमानुषीरपः ॥ अयुक्तसूरएतशंपवमानोमनाव
धि ॥ अंतरिक्षेणयातवे ॥ उतत्याहरितोदशसूरोअयुक्तयातवे ॥ इंदुरिंद्रइतिब्रुवन् ॥ ३१ ॥ परीतो
वायवेसुतंगिरइंद्रायमत्सरं ॥ अव्योवारेषुसिंचत ॥ पवमानविदारयिमस्मभ्यंसोमदुष्टरं ॥ योदूणाशोव
नुष्यता ॥ अभ्यर्षसहस्रिणंरयिंगोमंतमश्विनं ॥ अभिवाजमुतश्रवः ॥ सोमोदेवोनसूर्योद्रिभिःपवतेसु
तः ॥ दधानःकलशेरसं ॥ एतेधामान्यार्याशुक्राऋतस्यधारया ॥ वाजंगोमंतमक्षरन् ॥ सुताइंद्रायव
ज्रिणेसोमासोदध्याशिरः ॥ पवित्रमत्यक्षरन् ॥ ३२ ॥ प्रसोममधुमत्तमोरायेअर्षपवित्रऽआ ॥ मदो

योदेववीतमः ॥ तमीमृजंत्यायवोहरिंनदीषुवाजिनं ॥ इंदुमिंद्रायमत्सरं ॥ आपवस्वहिरण्यवदश्वाव
त्सोमवीरवत् ॥ वाजंगोमंतमाभर ॥ परिवाजेनवाजयुमव्योवारेषुसिंचत ॥ इंद्रायमधुमत्तमं ॥ कविं
मृजंतिमर्ज्यंधीभिर्विप्राअवस्यवः ॥ वृषाकनिक्रदर्षति ॥ ३३ ॥ वृषणंधीभिरप्तुरंसोमममृतस्यधारया ॥
मतीविप्राःसमस्वरन् ॥ पवस्वदेवायुषगिंद्रंगच्छतुतेमदः ॥ वायुमारोहधर्मणा ॥ पवमाननितोशसेरयिं
सोमश्रवाय्यं ॥ प्रियःसमुद्रमाविश ॥ अपघ्नन्पवसेमृधःक्रतुवित्सोममत्सरः ॥ नुदस्वादेवयुंजनं ॥
पवमानाअसृक्षतसोमाःशुक्रासइंदवः ॥ अभिविश्वानिकाव्या ॥ ३४ ॥ पवमानासऽआशवःशुभ्राऽ
असृग्रमिंदवः ॥ घ्नंतोविश्वाऽअपद्विषः ॥ पवमानादिवस्पर्यंतरिक्षादसृक्षत ॥ पृथिव्याअधिसानवि ॥
पुनानःसोमधारयेंदोविश्वाअपस्रिधः ॥ जहिरक्षांसिसुक्रतो ॥ अपघ्नन्त्सोमरक्षसोभ्यर्षकनिक्रदत् ॥
द्युमंतंशुष्ममुत्तमं ॥ अस्मेवसूनिधारयसोमादिव्यानिपार्थिवा ॥ इंदोविश्वानिवार्या ॥ ३५ ॥ वृषासोम
द्युमाँऽअसिवृषादेववृषव्रतः ॥ वृषाधर्माणिदधिषे ॥ वृष्णस्तेवृष्ण्यंशवोवृषावनंवृषामदः ॥ सत्यंवृषन्वृ

षेदसि ॥ अश्वोनचक्रदोवृषासंगाइंदोसमर्वतः ॥ विनोरायेदुरोवृधि ॥ असृक्षतप्रवाजिनोगव्यासोमा
सोअश्वया ॥ शुक्रासोवीरयाशवः ॥ शुंभमानाऋतायुभिर्मृज्यमानागभस्त्योः ॥ पवंतेवारेअव्यये ॥
॥ ३६ ॥ तेविश्वादाशुषेवसुसोमादिव्यानिपार्थिवा ॥ पवंतामांतरिक्ष्या ॥ पवमानस्यविश्ववित्प्रते
सर्गाऽअसृक्षत ॥ सूर्यस्येवनरश्मयः ॥ केतुंकृण्वंदिवस्परिविश्वारूपाभ्यर्षसि ॥ समुद्रःसोमपिन्वसे ॥
हिन्वानोवाचमिष्यसिपवमानविधर्मणि ॥ अक्रान्देवोनसूर्यः ॥ इंदुःपविष्टचेतनःप्रियःकवीनांमती ॥
सृजदश्वंरथीरिव ॥ ३७ ॥ ऊर्मिर्यस्तेपवित्रऽआदेवावीःपर्यक्षरत् ॥ सीदन्नृतस्ययोनिमा ॥ स
नोऽअर्षपवित्रऽआमदोयोदेववीतमः ॥ इंदविंद्रायपीतये ॥ इषेपवस्वधारयामृज्यमानोमनीषिभिः ॥
इंदोरुचाभिगाऽइहि ॥ पुनानोवरिवस्कृध्यूर्जंजनायगिर्वणः ॥ हरेसृजानऽआशिरं ॥ पुनानोदेववीत
यइंद्रस्ययाहिनिष्कृतं ॥ द्युतानोवाजिभिर्यतः ॥ ३८ ॥ प्रहिन्वानासऽइंदवोच्छासमुद्रमाशवः ॥ धि
याजूताऽअसृक्षत ॥ मर्मृजानासआयवोवृथासमुद्रमिंदवः ॥ अग्मंनृतस्ययोनिमा ॥ परिणोयाह्यस्मयु

विश्वावसून्योजसा ॥ पाहिनःशर्मवीरवत् ॥ मिमातिवन्हिरेतशःपदंयुजानऽऋकभिः ॥ प्रयत्समुद्रऽ
आहितः ॥ आयद्योनिंहिरण्ययमाशुऋतस्यसीदति ॥ जहात्यप्रचेतसः ॥ ३९ ॥ अभिवेनाअनूषते
यक्षंतिप्रचेतसः ॥ मज्जंत्यविचेतसः ॥ इंद्रायेंदोमरुत्वतेपवस्वमधुमत्तमः ॥ ऋतस्ययोनिमासदं ॥ तं
त्वाविप्रावचोविदःपरिष्कृण्वंतिवेधसः ॥ संत्वामृजंत्यायवः ॥ रसंतेमित्रोअर्यमापिबंतिवरुणःकवे ॥
पवमानस्यमरुतः ॥ त्वंसोमविपश्चितंपुनानोवाचमिष्यसि ॥ इंदोसहस्रभर्णसं ॥ ४० ॥ उतोसहस्र
भर्णसंवाचंसोममखस्युवं ॥ पुनानइंदवाभर ॥ पुनानइंदवेषांपुरुहूतजनानां ॥ प्रियःसमुद्रमाविश ॥
दविद्युतत्यारुचापरिष्टोभंत्याकृपा ॥ सोमाःशुक्रागवाशिरः ॥ हिन्वानोहेतृभिर्यतआवाजंवाज्यक्रमी
त् ॥ सीदंतोवनुषोयथा ॥ ऋधक्सोमस्वस्तयेसंजग्मानोदिवःकविः ॥ पवस्वसूर्योदृशे ॥ ४१ ॥ ॐ
ऋचोऽअक्षरेपरमेव्योमन्यस्मिन्देवाऽअधिविश्वेनिषेदुः ॥ यस्तंनवेदकिमृचाकरिष्यतियइत्तद्विदुस्तऽ
इमेसमासते ॥ इतिपवमानसूक्तेतृतीयोऽध्यायः ॥ ३ ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ हरिःॐम् ॥ हि
न्वंतिसूरमुस्रयःस्वसारोजामयस्पतिं ॥ महामिंदुंमहीयुवः ॥ पवमानरुचारुचादेवोदेवेभ्यस्परि ॥ वि

श्वावसून्याविंश ॥ आपंवमानसुष्टुतिंवृष्टिंदेवेभ्योदुवः ॥ इषेपंवस्वसंयतं ॥ वृषाह्यसिंभानुनाद्युमंतंत्वा
हवामहे ॥ पवमानस्वाध्यः ॥ आपंवस्वसुवीर्यंमंदमानस्वायुध ॥ इहोष्विंदवागंहि ॥ १ ॥ यदद्भिः
परिषिच्यसेंमृज्यमानोगभस्त्योः ॥ द्रुणासधस्थमश्नुषे ॥ प्रसोमायव्यश्ववत्पवमानायगायत ॥ महे
सहस्रचक्षसे ॥ यस्यवर्णंमधुश्चुतंहरिंहिन्वंत्याद्रिभिः ॥ इंदुमिंद्रायपीतये ॥ तस्यतेवाजिनोवयंविश्वाध
नानिजिग्युषः ॥ सखित्वमावृणीमहे ॥ वृषापवस्वधारयामरुत्वतेचमत्सरः ॥ विश्वादधानओजसा
॥ २ ॥ तंत्वाधर्तारमोण्यो३ःपवमानस्वर्दृशं ॥ हिन्वेवाजेषुवाजिनं ॥ अयाचित्तोविपानयाहरिः
पवस्वधारया ॥ युजंवाजेषुचोदय ॥ आनइंदोमहीमिषंपवस्वविश्वदर्शतः ॥ अस्मभ्यंसोमगातु
वित् ॥ आकलशाअनूषतेंदोधाराभिरोजसा ॥ एंद्रस्यपीतयेविंश ॥ यस्यतेमद्यंरसंतीव्रंदुहन्त्य
द्रिभिः ॥ सपवस्वाभिमातिहा ॥ ३ ॥ राजामेधाभिरीयतेपवमानोमनावधि ॥ अंतरिक्षेणयातवे ॥
आनइंदोशतग्विनंगवांपोषंस्वश्व्यं ॥ वहाभगत्तिमूतये ॥ आनःसोमसहोजुवोरूपंनवर्चसेभर ॥ सु

ष्वाणोदेववीतये ॥ अर्षासोमद्युमत्तमोभिद्रोणानिरोरुवत् ॥ सीदन्छ्येनोनयोनिमा ॥ अप्साइंद्रायवाय
वेवरुणायमरुद्भ्यः ॥ सोमोअर्षतिविष्णवे ॥ ४ ॥ इषंतोकायनोदधदस्मभ्यंसोमविश्वतः ॥ आपवस्व
सहस्रिणं ॥ येसोमासःपरावतियेऽअर्वावतिसुन्विरे ॥ येवादःशर्यणावति ॥ यऽआर्जीकेषुकृत्वसुयेमध्ये
पस्त्यानां ॥ येवाजनेषुपंचसु ॥ तेनोवृष्टिंदिवस्परिपवंतामासुवीर्यं ॥ सुवानादेवासइंदवः ॥ पवतेहर्य
तोहरिर्गृणानोजमदग्निना ॥ हिन्वानोगोरधित्वचि ॥ ५ ॥ प्रशुक्रासोवयोजुवोहिन्वानासोनसप्तयः ॥
श्रीणानाअप्सुमृंजत ॥ तंत्वासुतेष्वाभुवोहिन्विरेदेवतातये ॥ सपवस्वानयारुचा ॥ आतेदक्षंमयोभुवं
वन्हिमद्यावृणीमहे ॥ पांतमापुरुस्पृहं ॥ आमंद्रमावरेण्यमाविप्रमामनीषिणं ॥ पांतमापुरुस्पृहं ॥ आ
रयिमासुचेतुनमासुक्रतोतनूष्वा ॥ पांतमापुरुस्पृहं ॥ ६ ॥ पवस्वविश्वचर्षणेभिविश्वानिकाव्या ॥ स
खासखिभ्यऽईड्यः ॥ ताभ्यांविश्वस्यराजसियेपवमानधामनी ॥ प्रतीचीसोमतस्थतुः ॥ परिधामानियानि
तेत्वंसोमासिविश्वतः ॥ पवमानऋतुभिःकवे ॥ पवस्वजनयन्निषोभिविश्वानिवार्या ॥ सखासखि
भ्यऽऊतये ॥ तवशुक्रासोऽअर्चयोदिवस्पृष्ठेवितन्वते ॥ पवित्रंसोमधामभिः ॥ ७ ॥ तवेमेसप्तसिंधवः

प्रशिषंसोमसिस्रते ॥ तुभ्यंधावंतिधेनवः ॥ प्रसोमयाहिधारयासुतइंद्रायमत्सरः ॥ दधानोअक्षितिश्रवः ॥
समुत्वाधीभिरस्वरन्हिन्वतीःसप्तजामयः॥ विप्रमाजाविवस्वतः ॥ मृजंतित्वासमग्रुवोव्येजीरावधिष्वणि ॥
रेभोयदज्यसेवने ॥ पवमानस्यतेकवेवाजिन्त्सर्गाअसृक्षत ॥ अर्वंतोनश्रवस्यवः ॥ ८ ॥ अच्छाकोशं
मधुश्चुतमसृग्रंवारेऽअव्यये ॥ अवावशंतधीतयः ॥ अच्छासमुद्रमिंदवोस्तंगावोनधेनवः ॥ अग्मन्नृत
स्ययोनिमा ॥ प्रणइंदोमहेरणआपोअर्षंतिसिंधवः ॥ यद्गोभिर्वासयिष्यसे ॥ अस्यतेसख्येवयमियक्षंत
स्त्वोतयः ॥ इंदोसखित्वमुश्मसि ॥ आपवस्वगविष्टयेमहेसोमनृचक्षसे ॥ एंद्रस्यजठरेविश ॥ ९ ॥
महाँऽअसिसोमज्येष्ठउग्राणामिंदओजिष्ठः ॥ युध्वासंञ्छश्वज्जिगेथ ॥ यउग्रेभ्यश्चिदोजीयाञ्छूरेभ्य
श्चिच्छूरतरः ॥ भूरिदाभ्यश्चिन्मंहीयान् ॥ त्वंसोमसूरएषस्तोकस्यसातातनूनां ॥ वृणीमहेसख्यायवृणी
महेयुज्याय ॥ अग्नऽआयूंषिपवसआसुवोर्जमिषंचनः ॥ आरेबाधस्वदुच्छुनां ॥ अग्निर्ऋषिःपवमानः
पांचजन्यःपुरोहितः ॥ तमीमहेमहागयं ॥ १० ॥ अग्नेपवस्वस्वपाऽअस्मेवर्चःसुवीर्यं ॥ दधद्रयिंमयि

पोषं ॥ पवमानोऽअतिस्रिधोभ्यर्षतिसुष्टुतिं ॥ सूरोनविश्वदर्शतः ॥ सममृजानआयुभिःप्रयस्वान्प्रयसे
हितः ॥ इंदुरत्योविचक्षणः ॥ पवमानऽऋतंबृहच्छुक्रंज्योतिरजीजनत् ॥ कृष्णातमांसिजंघनत् ॥ पव
मानस्यजंघ्नतोहरेश्चंद्राअसृक्षत ॥ जीराअजिरशोचिषः ॥ ११ ॥ पवमानोरथीतमः शुभ्रेभिःशुभ्रश
स्तमः ॥ हरिश्चंद्रोमरुद्गणः ॥ पवमानोव्यश्नवद्रश्मिभिर्वाजसातमः ॥ दधत्स्तोत्रेसुवीर्यं ॥ प्रसुवानइं
दुरक्षाःपवित्रमत्यव्ययं ॥ पुनानइंदुरिंद्रमा ॥ एषसोमोऽअधित्वचिगवांक्रीळत्यद्रिभिः ॥ इंद्रंमदायजो
हुवत् ॥ यस्यतेद्युम्नवत्पयःपवमानाभृतंदिवः ॥ तेननोमृळजीवसे ॥ १२ ॥ त्वंसोमासिधारयुर्मंद्रओ
जिष्ठोऽअध्वरे ॥ पवस्वमंहयद्रयिः ॥ त्वंसुतोनृमादनोदधन्वान्मत्सरिंतमः ॥ इंद्रायसूरिरंधसा ॥ त्वंसु
ष्वाणोऽअद्रिभिरभ्यर्षकनिक्रदत् ॥ द्युमंतंशुष्ममुत्तमं ॥ इंदुर्हिन्वानोऽअर्षतितिरोवाराण्यव्यया ॥ हरि
र्वाजमचिक्रदत् ॥ इंदोव्यव्यमर्षसिविश्रवांसिविसोभगा ॥ विवाजान्त्सोमगोमतः ॥ १३ ॥ आन
इंदोशतग्विनंरयिंगोमंतमश्विनं ॥ भरासोमसहस्रिणं ॥ पवमानासइंदवस्तिरःपवित्रमाशवः ॥ इंद्रंया

मैभिराशत ॥ ककुहःसोम्योरसइंदुरिंद्रायपूर्व्यः ॥ आयुःपवतआयवे ॥ हिन्वंतिसूरमुस्त्रयःपवमानंमधु
श्चुतं ॥ अभिगिरासमस्वरन् ॥ अवितानोअजाश्वःपूषायामनियामनि ॥ आभक्षत्कन्यासुनः ॥१४॥
अयंसोमःकपर्दिनेघृतंनपवतेमधु ॥ आभक्षत्कन्यासुनः ॥ अयंतआघृणेसुतोघृतंनपवतेशुचि ॥ आभ
क्षत्कन्यासुनः ॥ वाचोजंतुःकवीनांपवस्वसोमधारया ॥ देवेषुरत्नधाअसि ॥ आकलशेषुधावतिश्येनो
वर्मविगाहते ॥ अभिद्रोणाकनिक्रदत् ॥ परिप्रसोमतेरसोसर्जिकलशेसुतः ॥ श्येनोनतक्तोअर्षति ॥
॥ १५ ॥ पवस्वसोममंदयन्निंद्रायमधुमत्तमः ॥ असृग्रंदेववीतयेवाजयंतोरथाऽइव ॥ तेसुतासोमदि
न्तमाःशुक्रावायुमसृक्षत ॥ ग्राव्णातुन्नोअभिष्टुतःपवित्रंसोमगच्छसि ॥ दधत्स्तोत्रेसुवीर्यं ॥ एषतुन्नो
अभिष्टुतःपवित्रमतिगाहते ॥ रक्षोहावारमव्ययम् ॥ १६ ॥ यदंतियच्चदूरकेभयंविंदतिमामिह ॥
पवमानवितज्जहि ॥ पवमानःसोअद्यनःपवित्रेणविचर्षणिः ॥ यःपोतासपुनातुनः ॥ यत्तेपवित्रमर्चिष्यग्ने
विततमंतरा ॥ ब्रह्मतेनपुनीहिनः ॥ यत्तेपवित्रमर्चिवदग्नेतेनपुनीहिनः ॥ ब्रह्मसवैःपुनीहिनः ॥ उभा
भ्यांदेवसवितःपवित्रेणसवेनच ॥ मांपुनीहिविश्वतः ॥ १७ ॥ त्रिभिष्ट्वंदेवसवितर्वर्षिष्ठैःसोमधामभिः ॥

अग्नेदक्षैःपुनीहिनः ॥ पुनंतुमांदेवजनाःपुनंतुवसवोधिया ॥ विश्वेदेवाःपुनीतमाजातवेदःपुनीहिमा ॥
प्रप्यायस्वप्रस्यंदस्वसोमविश्वेभिरंशुभिः ॥ देवेभ्यउत्तमंहविः ॥ उपप्रियंपनिप्नतंयुवानमाहुतीवृधं ॥
अगन्मबिभ्रतोनमः ॥ अलाय्यस्यपरशुर्ननाशतमापवस्वदेवसोम ॥ आखुंचिदेवदेवसोम ॥ यःपाव
मानीरध्येत्यृषिभिःसंभृतंरसं ॥ सर्वंसपूतमश्नातिस्वदितंमातरिश्वना ॥ पावमानीर्योअध्येत्यृषिभिःसंभृ
तंरसं ॥ तस्मैसरस्वतीदुहेक्षीरंसर्पिर्मधूदकं ॥ १८ ॥ पावमानीस्वस्त्ययनीःसुदुघाहिघृतश्चुतः ॥
ऋषिभिःसंभृतोरसोब्राह्मणेष्वमृतंहितं ॥ पावमानीर्दिशंतुनऽइमंलोकमथोअमुं ॥ कामान्समर्धयन्तुनो
देवैर्देवीःसमाहिताः ॥ येनदेवाःपवित्रेणात्मानंपुनतेसदा ॥ तेनसहस्रधारेणपावमान्यःपुनंतुमां ॥ प्रा
जापत्यंपवित्रंशतोद्यामंहिरण्मयं ॥ तेनब्रह्मविदोवयंपूतंब्रह्मपुनीमहे ॥ इंद्रःपुनीतिसहमापुनातुसोमःस्व
स्त्यावरुणःसमीच्या ॥ यमोराजाप्रमृणाभिःपुनातुमाजातवेदामूर्जयंत्यापुनातु ॥ ऋषयस्तुतपस्तेपुःसर्वे
स्वर्गंजिगीषवः॥ तपसस्तपसोग्रियंतुपावमानीरृचोब्रवीत् ॥१॥ यन्मेगर्भेवसतःपापमुग्रंयज्जायमानस्य
चकिंचिदन्यत् ॥ जातस्यचयच्चापिचवर्धतोमेतत्पावमानीभिरहंपुनामि ॥ मातापित्रोर्यन्नकृतंवचोमेयत्

स्थावरंजंगममावभूव ॥ विश्वस्यतत्प्रह्लषितंवचोमितत्पावमानीभिरहंपुनामि ॥ गोघ्नात्तस्करत्वात्स्त्रीव
धायच्चकिल्बिषं ॥ पापकंचचरणेभ्यस्तत्पावमानीभिरहंपुनामि ॥ ब्रह्मवधात्सुरापानात्स्वर्णस्तेयाद्वृष
लिगमनमैथुनसंगमात् ॥ गुरोर्दाराद्धिगमनाच्चतत्पावमानीभिरहंपुनामि ॥ बालघ्नान्मातृपितृवधाद्भूमि
तस्करात्सर्ववर्णगमनमैथुनसंगमात् ॥ पापेभ्यश्चप्रतिग्रहात्सद्यःप्रहरतिसर्वदुष्कृतंतत्पावमानीभिरहं
पुनामि ॥ क्रयविक्रयाद्योनिदोषाद्भक्षाद्भोज्यात्प्रतिग्रहात् ॥ असंभोजनाच्चापिनृशंसंतत्पावमानीभिरहं
पुनामि ॥ २ ॥ दुर्यष्टंदुरधीतंपापंयच्चाज्ञानतोकृतं ॥ आयाजिताश्वासंयाज्यास्तत्पावमानीभिरहंपुना
मि ॥ अमंत्रमन्नंयत्किंचिद्धूयतेचहुताशने ॥ संवत्सरकृतंपापंतत्पावमानीभिरहंपुनामि ॥ ऋतस्ययो
नयोमृतस्यधामविश्वादेवेभ्यःपुण्यगंधाः ॥ तानआपःप्रवहंतुपापंशुद्धागच्छामिसुकृतामुलोकंतत्पावमा
नीभिरहंपुनामि ॥ पावमानीःस्वस्त्ययनीर्याभिर्गच्छतिनांदनं ॥ पुण्यांश्चभक्षान्भक्षयत्यमृतत्वंचगच्छ
ति ॥ पावमानीःपितृन्देवान्ध्यायेभ्यश्चसरस्वतीं ॥ पितृंस्तस्योपवर्तेतत्क्षीरंसर्पिर्मधूदकं ॥ पावमानंप
रंब्रह्मशुक्रंज्योतिःसनातनं ॥ ऋषींस्तस्योपतिष्ठेतत्क्षीरंसर्पिर्मधूदकं ॥ पावमानंपरंब्रह्मयेपठंतिमनी

षिणः ॥ सप्तजन्मभवेद्विप्रोधनाढ्योवेदपारगाः ॥ दशोत्तराण्यृचांश्चैवपावमानीःशतानिषट् ॥ एत
ज्जुह्वंजपेन्मंत्रंघोरमृत्युभयंहरेत् ॥ शतधारमुत्समक्षीयमाणंविपश्चितंपितरंवक्त्वानां ॥ मेळिंमदंतंपि
त्रोरुपस्थेतंरोदसीपिपृतंसत्यवाचं ॥ ३ ॥ ऋचोऽअक्षरेपरमेव्योमन्यस्मिन्देवाअधिविश्वेनिषेदुः ॥ य
स्तंनवेदकिमृचाकरिष्यातियइत्तद्विदुस्तइमेसमासते ॥ ॥ इतिपवमानसूक्तेचतुर्थोध्यायः ॥ ४ ॥
श्रीगणेशायनमः ॥ ॐ नतमंहोनदुरितंदेवासोअष्टमर्त्यं ॥ सजोषसोयमर्यमामित्रोनयंतिवरुणोऽअति
द्विषः ॥ तद्धिवयंवृणीमहेवरुणमित्रार्यमन् ॥ येनानिरंहसोयूयंपाथनेथाचमर्त्यमतिद्विषः ॥ तेनूनंनोयमू
तयेवरुणोमित्रोऽअर्यमा ॥ नयिष्ठाउनोनेषणिपर्षिष्ठाउनःपर्षण्यतिद्विषः ॥ यूयंविश्वंपरिपाथवरुणोमि
त्रोअर्यमा ॥ युष्माकंशर्मणिप्रियेस्यामसुप्रणीतयोतिद्विषः ॥ आदित्यासोऽअतिस्त्रिधोवरुणोमित्रोऽअ
र्यमा ॥ उग्रंमरुद्भीरुद्रंहुवेमेंद्रमाग्निंस्वस्तयेतिद्विषः ॥ नेतारऊषुणस्तिरोवरुणोमित्रोऽअर्यमा ॥ अतिवि
श्वानिदुरिताराजानश्चर्षणीनामतिद्विषः ॥ शुनमस्मभ्यमूतयेवरुणोमित्रोऽअर्यमा ॥ शर्मयच्छंतुसप्रथ
आदित्यासोयदीमहेऽअतिद्विषः ॥ यथाहत्यद्वसवोगौर्यंचित्पदिषितामर्मुचतायजत्राः ॥ एवो ष्व१स्म

न्मुंचताव्यंहःप्रतार्यग्नेप्रतरंनआयुः ॥ १ ॥ ॐ इतिवाइतिमेमनोगामश्वंसनुयामिति ॥ कुवित्सोम
स्यापामिति ॥ प्रवाताइवदोधतउन्मापीताअयंसत ॥ कुवित्सोमस्यापामिति ॥ उन्मापीताअयंसतर
थमश्वाइवाशवः ॥ कुवित्सोमस्यापामिति ॥ उपमामतिरस्थितवाश्रापुत्रमिवाप्रियं ॥ कुवित्सोमस्या
पामिति ॥ अहंतष्टेववंधुरंपर्यचामिहृदामतिं ॥ कुवित्सोमस्यापामिति ॥ नहिमेअक्षिपच्चनाच्छान्त्सुः
पंचकृष्टयः ॥ कुवित्सोमस्यापामिति ॥ १ ॥ नहिमेरोदसीउभेअन्यंपक्षंचनप्रति ॥ कुवित्सोमस्या
पामिति ॥ अभिद्यांमहिनाभुवमभी३मांपृथिवींमहीं ॥ कुवित्सोमस्यापामिति ॥ हंताहंपृथिवीमिमानि
दधानीहवेहवा ॥ कुवित्सो० ॥ ओषमित्पृथिवीमहंजंघनानीहवेहवा ॥ कुवित्सो० ॥ दिविमेअन्यः
पक्षो३धोअन्यमचीकृपं ॥ कुवित्सो० ॥ अहमस्मिमहामहोभिनभ्यमुदीषितः ॥ कुवित्सो० ॥ गृहो
याम्यरंकृतोदेवेभ्योहव्यवाहनः ॥ कुवित्सोमस्या० ॥ २ ॥ अथवामनसूक्तं ॥ ॐ अस्यवामस्यपलित
स्यहोतुस्तस्यभ्रातामध्यमोअस्त्यश्नः ॥ तृतीयोभ्राताघृतपृष्ठोअस्यात्रापश्यंविश्पतिंसप्तपुत्रं ॥ सप्तयुंजं

तिरथमेकंचक्रमेकोअश्वोवहातिसप्तनामा ॥ त्रिनाभिचक्रमजरमनर्वंयत्रेमाविश्वाभुवनाधितस्थुः ॥ इ
मंरथमधियेसप्ततस्थुःसप्तचक्रंसप्तवहंत्यश्वाः ॥ सप्तस्वसारोअभिसंनवंतेयत्रगवांनिहितासप्तनाम ॥
कोददर्शप्रथमंजायमानमस्थन्वंतंयदनस्थाबिभर्ति ॥ भूम्याअसुरसृगात्माक्वस्वित्कोविद्वांसमुप
गात्प्रष्टुमेतत् ॥ पाकःपृच्छामिमनसाविजानंदेवानामेनानिहितापदानि ॥ वत्सेबष्कयेधिसप्ततंतून्वि
तत्निरेकवयओतवाउ ॥ १ ॥ अचिकित्वाञ्चिकितुषश्चिदत्रकवीन्पृच्छामिविद्मनेनाविद्वान् ॥ विय
स्तस्तंभषळिमारजांस्यजस्यरूपेकिमपिस्विदेकं ॥ इहब्रवीतुयईमंगवेदास्यवामस्यनिहितंपदंवेः ॥
शीर्ष्णःक्षीरंदुह्रतेगावोअस्यवव्रिंवसानाउदकंपदापुः ॥ मातापितरमृतआबभाजधीत्यग्रेमनसासंहिज
ग्मे ॥ साबीभत्सुर्गर्भरसानिविद्धानमस्वंतइदुपवाकमीयुः ॥ युक्तामातासीद्धुरिदक्षिणायाअतिष्ठद्गर्भोवृ
जनीष्वंतः ॥ अमीमेद्वत्सोअनुगामपश्यद्विश्वरूप्यंत्रिषुयोजनेषु ॥ तिस्रोमातृस्त्रीन्पितॄन्बिभ्रदेकऊर्ध्व
स्तस्थौनेमवग्लापयंति ॥ मंत्रयंतेदिवोअमुष्यपृष्ठेविश्वविदंवाचमविश्वमिन्वां ॥ २ ॥ द्वादशारंनहित

ज्जरायवर्वर्तिचक्रंपरिद्यामृतस्य ॥ आपुत्राअग्नेमिथुनासोअत्रसप्तशतानिविंशतिश्चतस्थुः ॥ पंचपादंपि
तरंद्वादशाकृतिंदिवआहुःपरेअर्धेपुरीषिणं ॥ अथेमेअन्यउपरेविचक्षणंसप्तचक्रेषळरआहुरर्पितं ॥ पंचा
रेचक्रेपरिवर्तमानेतस्मिन्नातस्थुर्भुवनानिविश्वा ॥ तस्यनाक्षस्तप्यतेभूरिभारःसनादेवनशीर्यतेसनाभिः ॥
सनेमिचक्रमजरंविवावृतउत्तानायांदशयुक्तावहंति ॥ सूर्यस्यचक्षूरजसैत्यावृतंतस्मिन्नार्पिताभुवनानिवि
श्वा ॥ साकंजानांसप्तथमाहुरेकजंषळिद्यमाऋषयोदेवजाइति ॥ तेषामिष्टानिविहितानिधामशस्था
त्रेरेजंतेविकृतानिरूपशः ॥ ३ ॥ स्त्रियःसतीस्ताँऽउमेपुंसआहुःपश्यदक्षण्वान्नविचेतदंधः ॥ कविर्यः
पुत्रःसईमाचिकेतयस्ताविजानात्सपितुष्पितासत् ॥ अवःपरेणपरएनावरेणपदावत्संबिभ्रतीगौरुदस्था
त् ॥ साकद्रीचीकंस्विदर्धंपरागात्कस्वित्सूतेनहियूथेअंतः ॥ अवःपरेणपितरंयोअस्यानुवेदपरएनावरे
ण ॥ कवीयमानःकइहप्रवोचद्देवंमनःकुतोऽअधिप्रजातं ॥ येअर्वाचस्ताँऽउपराचआहुर्येपराचस्ताँऽउ
अर्वाचआहुः ॥ इंद्रश्चयाचक्रथुःसोमतानिधुरानयुक्तारजसोवहंति ॥ द्वासुपर्णासयुजासखायासमानंवृ

क्षंपरिषस्वजाते ॥ तयोरन्यःपिप्पलंस्वाद्वत्त्यनश्नन्नन्योअभिचाकशीति ॥ ४ ॥ यत्रासुपर्णाअमृतस्य
भागमनिमेषंविदथाभिस्वरंति ॥ इनोविश्वस्यभुवनस्यगोपाःसमाधीरःपाकमत्राविवेश ॥ यस्मिन्वृक्षे
मध्वदःसुपर्णानिविशंतेसुवतेचाधिविश्वे ॥ तस्येदाहुःपिप्पलंस्वाद्वग्रेतन्नोन्नशद्यःपितरंनवेद ॥ यद्गायत्रे
अधिगायत्रमाहितंत्रैष्टुभाद्वात्रैष्टुभंनिरतक्षत ॥ यद्वाजगज्जगत्याहितंपदंयइत्तद्विदुस्तेअमृतत्वमानशुः ॥
गायत्रेणप्रतिमिमीतेअर्कमर्केणसामत्रैष्टुभेनवाकं ॥ वाकेनवाकंद्विपदाचतुष्पदाक्षरेणमिमतेसप्तवा
णीः ॥ जगतासिंधुंदिव्यस्तभायद्रथंतरेसूर्यंपर्यपश्यत् ॥ गायत्रस्यसमिधस्तिस्रआहुःस्ततोमन्हाप्ररिरि
चेमहित्वा ॥ ५ ॥ उपव्हयेसुदुघांधेनुमेतांसुहस्तोगोधुगुतदोहदेनां ॥ श्रेष्ठंसवंसवितासाविषन्नोभीद्धो
घर्मस्तदुषुप्रवोचं ॥ हिंकृण्वतीवसुपत्नीवसूनांवत्समिच्छंतीमनसाभ्यागात् ॥ दुहामश्विभ्यांपयोअघ्न्ये
यंसावर्धतांमहतेसौभगाय ॥ गौरमीमेदनुवत्संमिषंतंमूर्धानंहिंङ्ङकृणोन्मातवाउ ॥ सृक्वाणंघर्ममभिवा
वशानामिमातिमायुंपयतेपयोभिः ॥ अयंसशिङ्क्तेयेनगौरभीवृतामिमातिमायुंध्वसनावधिश्रिता ॥ सा
चित्तिभिर्निहिचकारमर्त्यंविद्युद्भवंतीप्रतिवव्रिमौहत ॥ अनच्छयेतुरगातुजीवमेजद्ध्रुवंमध्यआपस्त्यो

नां ॥ जीवोमृतस्यचरतिस्वधाभिरमर्त्योमर्त्येनासयोनिः ॥ ६ ॥ अपश्यंगोपामनिपद्यमानमाचपराच
पथिभिश्चरंतं ॥ ससध्रीचीःसविषूचीर्वसानआवरीवर्तिभुवनेष्वंतः ॥ यईंचकारनसोअस्यवेदयईंददर्श
हिरुगिन्नुतस्मात् ॥ समातुर्योनापरिवीतोअंतर्बहुप्रजानिर्ऋतिमाविवेश ॥ द्यौर्मेपिताजनितानाभिरत्रबं
धुर्मेमातापृथिवीमहीयं ॥ उत्तानयोश्चम्वोर्योनिरंतरत्रापितादुहितुर्गर्भमाधात् ॥ पृच्छामित्वापरमंतंपृ
थिव्याःपृच्छामियत्रभुवनस्यनाभिः ॥ पृच्छामित्वावृष्णोअश्वस्यरेतःपृच्छामिवाचःपरमंव्योम ॥ इयं
वेदिःपरोअंतःपृथिव्याअयंयज्ञोभुवनस्यनाभिः ॥ अयंसोमोवृष्णोअश्वस्यरेतोब्रह्मायंवाचःपरमंव्योम ॥
॥ ७ ॥ सप्तार्धगर्भाभुवनस्यरेतोविष्णोस्तिष्ठंतिप्रदिशाविधर्मणि ॥ तेधीतिभिर्मनसातेविपश्चितःपरिभु
वःपरिभवंतिविश्वतः ॥ नविजानामियदिवेदमस्मिनिण्यःसन्नद्धोमनसाचरामि ॥ यदामागन्प्रथमजा
ऋतस्यादिद्वाचोअश्नुवेभागमस्याः ॥ अपाङ्प्राङेतिस्वधयागृभीतोमर्त्योमर्त्येनासयोनिः ॥ ताशश्वंता
विषूचीनावियंतान्यन्यंचिक्युर्ननिचिक्युरन्यं ॥ ऋचोअक्षरेपरमेव्योमन्यस्मिन्देवाअधिविश्वेनिषेदुः॥
यस्तंनवेदकिमृचाकरिष्यतियइत्तद्विदुस्तइमेसमासते ॥ सूयवसाद्भगवतीहिभूयाअथोवयंभगवंतःस्या

म ॥ अद्धितृणमघ्न्येविश्वदानींपिबशुद्धमुदकमाचरंती ॥ ८ ॥ गौरीर्मिमायसलिलानितक्षत्येकपदी

द्विपदीसाचतुष्पदी ॥ अष्टापदीनवपदीबभूवुषीसहस्राक्षरापरमेव्योमन् ॥ तस्याःसमुद्राअधिविक्षरंति

तेनजीवंतिप्रदिशश्चतस्रः ॥ ततःक्षरत्यक्षरंतद्विश्वमुपजीवति ॥ शकमयंधूममारादपश्यंविषूवतापरएना

वरेण ॥ उक्षाणंपृश्निमपचंतवीरास्तानिधर्माणिप्रथमान्यासन् ॥ त्रयःकेशिनऋतुथाविचक्षतेसंवत्सरेवप

तएकएषां ॥ विश्वमेकोअभिचष्टेशचीभिर्ध्राजिरेकस्यददृशेनरूपं ॥ चत्वारिवाक्परिमितापदानितानि

विदुर्ब्राह्मणायेमनीषिणः ॥ गुहात्रीणिनिहितानेंगयंतितुरीयंवाचोमनुष्यावदंति ॥ इंद्रंमित्रंवरुणमग्निमा

हुरथोदिव्यःससुपर्णोगरुत्मान् ॥ एकंसद्विप्राबहुधावदंत्यग्निंयमंमातरिश्वानमाहुः ॥ १ ॥ कृष्णंनिया

नंहरयःसुपर्णाअपोवसानादिवमुत्पतंति ॥ तआववृत्रन्त्सदनादृतस्यादिद्घृतेनपृथिवीव्युद्यते ॥ द्वादश

प्रधयश्चक्रमेकंत्रीणिनभ्यानिकउतच्चिकेत ॥ तस्मिन्त्साकंत्रिशतानशंकवोर्पिताःषष्टिर्नचलाचलासः ॥

यस्तेस्तनःशशयोयोमयोभूर्येनविश्वापुष्यसिवार्याणि ॥ योरत्नधावसुविद्यःसुदत्रःसरस्वतितमिहधातवे

कः ॥ यज्ञेनयज्ञमयजंतदेवास्तानिधर्माणिप्रथमान्यासन् ॥ तेहनाकंमहिमानःसचंतयत्रपूर्वेसाध्याःसं
तिदेवाः ॥ समानमेतदुदकमुच्चैत्यवचाहभिः ॥ भूमिंपर्जन्याजिन्वंतिदिवंजिन्वंत्यग्नयः ॥ दिव्यंसुप
र्णंवायसंबृहंतमपांगर्भंदर्शतमोषधीनां ॥ अभीपतोवृष्टिभिस्तर्पयंतंसरस्वंतमवसेजोहवीमि ॥ १० ॥
अतोदेवाऽअवंतुनोयतोविष्णुर्विचक्रमे ॥ पृथिव्याःसप्तधामभिः ॥ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदं ॥
समूळ्हमस्यपांसुरे ॥ त्रीणिपदाविचक्रमेविष्णुर्गोपाऽअदाभ्यः ॥ अतोधर्माणिधारयन् ॥ विष्णोःकर्मा
णिपश्यतयतोव्रतानिपस्पशे ॥ इंद्रस्ययुज्यःसखा ॥ तद्विष्णोःपरमंपदंसदापश्यंतिसूरयः ॥ दिवीवच
क्षुराततं ॥ तद्विप्रासोविपन्यवोजागृवांसःसमिंधते ॥ विष्णोर्यत्परमंपदं ॥ १ ॥ ॐ ऋचोऽअक्षरेपर
मेव्योमन्यस्मिन्देवाऽअधिविश्वेनिषेदुः ॥ यस्तंनवेदकिमृचाकरिष्यतिय ऽइत्तद्विदुस्तइमेसमासते ॥
॥ इति पवमान पंचसूक्त समाप्तिः ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ ३१ ॥ ॥ अथ गणपति अथर्वशीर्ष प्रारंभः ॥

श्रीगणेशायनमः ॥ ॥ श्रीसरस्वत्यैनमः ॥ श्रीगुरुभ्योनमः ॥ ॐ नमस्तेगणपतये ॥ त्वमेवप्रत्यक्षं
तत्वमसि ॥ त्वमेवकेवलंकर्तासि ॥ त्वमेवकेवलंधर्तासि ॥ त्वमेवकेवलंहर्तासि ॥ त्वमेवसर्वंखल्विदंब्र
ह्मासि ॥ त्वंसाक्षादात्मासिनित्यं ॥ ऋतंवच्मि ॥ सत्यंवच्मि ॥ अवत्वंमां ॥ अववक्तारं ॥ अवश्रो
तारं ॥ अवदातारं ॥ अवधातारं ॥ अवानूचानमवशिष्यं ॥ अवपश्चात्तात् ॥ अवपुरस्तात् ॥ अवो
त्तरात्तात् ॥ अवदक्षिणात्तात् ॥ अवचोर्ध्वात्तात् ॥ अवाधरात्तात् ॥ सर्वतोमांपाहिपाहिसमंतात् ॥
त्वंवाङ्मयस्त्वंचिन्मयः ॥ त्वमानंदमयस्त्वंब्रह्ममयः ॥ त्वंसच्चिदानंदाद्वितीयोसि ॥ त्वंप्रत्यक्षंब्रह्मासि ॥
त्वंज्ञानमयोविज्ञानमयोसि ॥ सर्वंजगदिदंत्वत्तोजायते ॥ सर्वंजगदिदंत्वत्तस्तिष्ठति ॥ सर्वंजगदिदंत्व
यिलयमेष्यति ॥ सर्वंजगदिदंत्वयिप्रत्येति ॥ त्वंभूमिरापोनलोनिलोनभः ॥ त्वंचत्वारिवाक्पदानि ॥ त्वं
गुणत्रयातीतः ॥ त्वंकालत्रयातीतः ॥ त्वंदेहत्रयातीतः ॥ त्वंमूलाधारस्थितोसिनित्यं ॥ त्वंशक्तित्रयात्म
कः ॥ त्वांयोगिनोध्यायंतिनित्यं ॥ त्वंब्रह्मात्वंविष्णुस्त्वंरुद्रस्त्वमिंद्रस्त्वमग्निस्त्वंवायुस्त्वंसूर्यस्त्वंचंद्रमास्त्वं
ब्रह्मभूर्भुवःसुवरोम् ॥ गणादीन्पूर्वमुच्चार्यवर्णादीन्तदनंतरं ॥ अनुस्वारःपरतरः ॥ अर्धेंदुलसितं ॥ ता

रेणरुद्धं ॥ एतत्तवमनुस्वरूपं ॥ गकारःपूर्वरूपं ॥ अकारोमध्यमरूपं ॥ अनुस्वारश्चांत्यरूपं ॥ बिंदु
रुत्तररूपं ॥ नादःसंधानं ॥ सꣳहितासंधिः ॥ सैषागणेशविद्या ॥ गणकऋषिः ॥ निचृद्गायत्रीछंदः ॥
गणपतिर्देवता ॥ ॐ गंगणपतयेनमः ॥ एकदंतायविद्महेवक्रतुंडायधीमहि ॥ तन्नोदंतिःप्रचोदयात् ॥
एकदंतंचतुर्हस्तंपाशमंकुशधारिणम् ॥ रदंचवरदंहस्तैर्बिभ्राणंमूषकध्वजम् ॥ रक्तंलंबोदरंशूर्पकर्णकंर
क्तवाससं ॥ रक्तगंधानुलिप्तांगंरक्तपुष्पैःसुपूजितम् ॥ भक्तानुकंपितंदेवंजगत्कारणमच्युतं ॥ आविर्भू
तंचसृष्ट्यादौप्रकृतेःपुरुषात्परं ॥ एवंध्यायतियोनित्यंसयोगीयोगिनांवरः ॥ नमोव्रातपतयेनमोगणपत
येनमः प्रमथपतयेनमस्तेअस्तुलंबोदरायैकदंतायविघ्ननाशिनेशिवसुतायवरदमूर्तयेनमः ॥ एतदथर्व
शीर्षयोधीते ॥ सब्रह्मभूयायकल्पते ॥ ससर्वतःसुखमेधते ॥ ससर्वविघ्नैर्नबाध्यते ॥ सपंचमहापापात्प्र
मुच्यते ॥ सायमधीयानोदिवसकृतंपापंनाशयति ॥ प्रातरधीयानोरात्रिकृतंपापंनाशयति ॥ सायंप्रातःप्र
युंजानोअपापोभवति ॥ सर्वत्राधीयानोपविघ्नोभवति ॥ धर्मार्थकाममोक्षंचविंदति ॥ इदमथर्वशीर्षम
शिष्यायनदेयं ॥ योयदिमोहाद्दास्यति ॥ सपापीयान्भवति ॥ सहस्रावर्तनात् ॥ यंयंकाममधीते ॥ तं
तमनेनसाधयेत् ॥ अनेनगणपतिमभिषिंचतिसवाङ्मीभवति ॥ चतुर्थ्यामनश्नन्जपति ॥ सविद्यावा
न्भवति ॥ इत्यथर्वणवाक्यं ॥ ब्रह्माद्याचरणंविद्यात् ॥ नबिभेतिकदाचनेति ॥ योदूर्वांकुरैर्यजति ॥ स

वैश्रवणोपमोभवति ॥ योलाजैर्यजति ॥ सयशोवान्भवति ॥ समेधावान्भवति ॥ योमोदकसहस्रेण
यजति ॥ सर्वांछितफलमवाप्नोति ॥ यःसाज्यसमिद्भिर्यजति ॥ ससर्वंलभतेससर्वंभलते ॥ अष्टौब्रा
ह्मणान्सम्यग्ग्राहयित्वासूर्यवर्चस्वीभवति ॥ सूर्यग्रहेमहानद्यांप्रतिमासंनिधौवाजप्त्वा ॥ सिद्धमंत्रोभव
ति ॥ महाविघ्नात्प्रमुच्यते ॥ महादोषात्प्रमुच्यते ॥ महापापात्प्रमुच्यते ॥ ससर्वविद्भवतिससर्वविद्भव
ति ॥ यएवंवेद ॥ इत्युपनिषत् सहनाववतु ॥ सहनौभुनक्तु ॥ सहवीर्यंकरवावहै ॥ तेजस्विनावधी
तमस्तुमाविद्विषावहै ॥ ॐ शांतिःशांतिःशांतिः ॥ ॥ इति गणपति अथर्वशीर्ष समाप्तं ॥ ७ ॥

॥ ३१ ॥ ॥ अथ विष्णुसहस्त्रनाम प्रारंभः ॥

श्रीगणेशायनमः ॥ ॥ यस्यस्मरणमात्रेणजन्मसंसारबंधनात् ॥ विमुच्यतेनमस्तस्मैविष्णवेप्रभविष्ण
वे ॥ १ ॥ ॥ वैशंपायनउवाच ॥ ॥ श्रुत्वाधर्मानशेषेणपावनानिचसर्वशः ॥ युधिष्ठिरःशांतनवंपुनरे
वाभ्यभाषत ॥ २ ॥ ॥ युधिष्ठिरउवाच ॥ ॥ किमेकंदैवतंलोकेकिंवाप्येकंपरायणम् ॥ स्तुवंतःकंक
मर्चंतःप्राप्नुयुर्मानवाःशुभम् ॥ ३ ॥ कोधर्मःसर्वधर्माणांमवतःपरमोमतः ॥ किंजपन्मुच्यतेजंतुर्जन्म
संसारबंधनात् ॥ ४ ॥ ॥ भीष्मउवाच ॥ ॥ जगत्प्रभुंदेवदेवमनंतंपुरुषोत्तमम् ॥ स्तुवन्नामसहस्त्रे

गपुरुषःसततोत्थितः ॥ ५ ॥ तमेवचार्चयन्नित्यंभक्त्यापुरुषमव्ययम् ॥ ध्यायन्स्तुवन्नमस्यंश्चयज
मानस्तमेवच ॥ ६ ॥ अनादिनिधनंविष्णुंसर्वलोकमहेश्वरम् ॥ लोकाध्यक्षंस्तुवन्नित्यंसर्वदुःखातिगो
भवेत् ॥ ७ ॥ ब्रह्मण्यंसर्वधर्मज्ञंलोकानांकीर्तिवर्धनम् ॥ लोकनाथंमहद्भूतंसर्वभूतभवोद्भवम् ॥८॥ ए
षमेसर्वधर्माणांधर्मोधिकतमोमतः ॥ यद्भक्त्यापुंडरीकाक्षंस्तवैरर्चेन्नरःसदा ॥९॥ परमंयोमहत्तेजःपरमंयो
महत्तपः ॥ परमंयोमहद्ब्रह्मपरमंयःपरायणम् ॥१०॥ पवित्राणांपवित्रंयोमंगलानांचमंगलम् ॥ दैवतंदेव
तानांचभूतानांयोऽव्ययःपिता ॥११॥ यतःसर्वाणिभूतानिभवंत्यादियुगागमे ॥ यस्मिंश्चप्रलयंयांतिपुनरेव
युगक्षये ॥१२॥ तस्यलोकप्रधानस्यजगन्नाथस्यभूपते ॥ विष्णोर्नामसहस्रंमेशृणुपापभयापहम् ॥१३॥
यानिनामानिगौणानिविख्यातानिमहात्मनः ॥ ऋषिभिःपरिगीतानितानिवक्ष्यामिभूतये ॥ १४ ॥ ॥
अस्यश्रीविष्णोर्दिव्यसहस्रनामस्तोत्रमंत्रस्य ॥ भगवान्वेदव्यासऋषिः ॥ श्रीविष्णुःपरमात्मादेवता ॥
अनुष्टुप्छंदः ॥ अमृतांशूद्भवोभानुरितिबीजम् ॥ देवकीनंदनःस्रष्टेतिशक्तिः ॥ त्रिसामासामगःसामे
तिहृदयं ॥ शंखभृन्नंदकीचक्रीतिकीलकम् ॥ शार्ङ्गधन्वागदाधरइत्यस्त्रम् ॥ रथांगपाणिरक्षोभ्यइति
कवचम् ॥ उद्भवःक्षोभणोदेवइतिपरमोमंत्रः ॥ श्रीमहाविष्णुप्रीत्यर्थेजपेविनियोगः ॥ ॥ अथन्या
सः ॥ ॥ विश्वंविष्णुर्वषट्कारइत्यंगुष्ठाभ्यांनमः ॥ अमृतांशूद्भवोभानुरितितर्जनीभ्यांनमः ॥ ब्रह्म

ण्योब्रह्मकृद्ब्रह्मेतिमध्यमाभ्यांनमः ॥ सुवर्णबिंदुरक्षोभ्यइत्यनामिकाभ्यांनमः ॥ निमिषोनिमिषस्रग्वीति
कनिष्ठिकाभ्यांनमः ॥ रथांगपाणिरक्षोभ्यइतिकरतलकरपृष्ठाभ्यांनमः ॥ एवंहृदयादिन्यासः ॥ ॥ अ
थध्यानम् ॥ ॥ शांताकारंभुजगशयनंपद्मनाभंसुरेशंविश्वाधारंगगनसदृशंमेघवर्णंशुभांगम् ॥ लक्ष्मी
कांतंकमलनयनंयोगिभिर्ध्यानगम्यंवंदेविष्णुंभवभयहरंसर्वलोकैकनाथम् ॥ १ ॥ ॥ इतिध्यानं ॥ ॥
विश्वंविष्णुर्वषट्कारोभूतभव्यभवत्प्रभुः ॥ भूतकृद्भूतभृद्भावोभूतात्माभूतभावनः ॥ १ ॥ पूतात्मापरमा
त्माचमुक्तानांपरमागतिः ॥ अव्ययःपुरुषःसाक्षीक्षेत्रज्ञोऽक्षरएवच ॥ २ ॥ योगोयोगविदांनेताप्रधान
पुरुषेश्वरः ॥ नारसिंहवपुःश्रीमान्केशवःपुरुषोत्तमः ॥ ३ ॥ सर्वःशर्वःशिवःस्थाणुर्भूतादिर्निधिरव्य
यः ॥ संभवोभावनोभर्ताप्रभवःप्रभुरीश्वरः ॥ ४ ॥ स्वयंभूःशंभुरादित्यःपुष्कराक्षोमहास्वनः ॥ अना
दिनिधनोधाताविधाताधातुरुत्तमः ॥ ५ ॥ अप्रमेयोहृषीकेशःपद्मनाभोऽमरप्रभुः ॥ विश्वकर्मामनुस्त्व
ष्टास्थविष्ठःस्थविरोध्रुवः ॥ ६ ॥ अग्राह्यःशाश्वतःकृष्णोलोहिताक्षःप्रतर्दनः ॥ प्रभूतस्त्रिककुब्धामप
वित्रंमंगलंपरम् ॥ ७ ॥ ईशानःप्राणदःप्राणोज्येष्ठःश्रेष्ठःप्रजापतिः ॥ हिरण्यगर्भोभूगर्भोमाधवोमधुसू
दनः ॥ ८ ॥ ईश्वरोविक्रमीधन्वीमेधावीविक्रमःक्रमः ॥ अनुत्तमोदुराधर्षःकृतज्ञःकृतिरात्मवान् ॥ ९ ॥
सुरेशःशरणंशर्मविश्वरेताःप्रजाभवः ॥ अहःसंवत्सरोव्यालःप्रत्ययःसर्वदर्शनः ॥ १० ॥ अजःसर्वेश्व

रःसिद्धःसिद्धिःसर्वादिरच्युतः ॥ वृषाकपिरमेयात्मासर्वयोगविनिःसृतः ॥ ११ ॥ वसुर्वसुमनाःसत्यःस
मात्मासंमितःसमः ॥ अमोघःपुंडरीकाक्षोवृषकर्मावृषाकृतिः ॥ १२ ॥ रुद्रोबहुशिराबभ्रुर्विश्वयोनिः
शुचिश्रवाः ॥ अमृतःशाश्वतःस्थाणुर्वरारोहोमहातपाः ॥ १३ ॥ सर्वगःसर्वविद्भानुर्विष्वक्सेनोजनार्द
नः ॥ वेदोवेदविदव्यंगोवेदांगोवेदवित्कविः ॥ १४ ॥ लोकाध्यक्षःसुराध्यक्षोधर्माध्यक्षःकृताकृ
तः ॥ चतुरात्माचतुर्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः ॥ १५ ॥ भ्राजिष्णुर्भोजनंभोक्तासहिष्णुर्जगदादिजः ॥
अनघोविजयोजेताविश्वयोनिःपुनर्वसुः ॥ १६ ॥ उपेंद्रोवामनःप्रांशुरमोघःशुचिरूर्जितः ॥ अतींद्रःसं
ग्रहःसर्गोभूतात्मानियमोयमः ॥ १७ ॥ वेद्योवैद्यःसदायोगीवीरहामाधवोमधुः ॥ अतींद्रियोमहामा
योमहोत्साहोमहाबलः ॥ १८ ॥ महाबुद्धिर्महावीर्योमहाशक्तिर्महाद्युतिः ॥ अनिर्देश्यवपुःश्रीमानमे
यात्मामहाऽद्रिधृक् ॥ १९ ॥ महेष्वासोमहीभर्ताश्रीनिवासःसतांगतिः ॥ अनिरुद्धःसुरानंदोगोविंदो
गोविदांपतिः ॥ २० ॥ मरीचिर्दमनोहंसःसुपर्णोभुजगोत्तमः ॥ हिरण्यनाभःसुतपाःपद्मनाभःप्रजाप
तिः ॥ २१ ॥ अमृत्युःसर्वदृक्सिंहःसंधातासंधिमान्स्थिरः ॥ अजोदुर्मर्षणःशास्ताविश्रुतात्मासुरारि
हा ॥ २२ ॥ गुरुर्गुरुतमोधामसत्यःसत्यपराक्रमः ॥ निमिषोऽनिमिषःस्रग्वीवाचस्पतिरुदारधीः ॥ २३ ॥
अग्रणीर्ग्रामणीःश्रीमान्न्यायोनेतासमीरणः ॥ सहस्रमूर्धाविश्वात्मासहस्राक्षःसहस्रपात् ॥ २४ ॥ आ

वर्तनोनिवृत्तात्मासंवृतःसंप्रमर्दनः ॥ अहःसंवर्त्तकोवन्हिरनिलोधरणीधरः ॥ २५ ॥ सुप्रसादःप्रसन्ना
त्माविश्वधृग्विश्वभुग्विभुः ॥ सत्कर्तासत्कृतःसाधुर्जह्नुर्नारायणोनरः ॥ २६ ॥ असंख्येयोप्रमेयात्मावि
शिष्टःशिष्टकृच्छुचिः ॥ सिद्धार्थःसिद्धसंकल्पःसिद्धिदःसिद्धिसाधनः ॥ २७ ॥ वृषाहीवृषभोविष्णुर्वृ
षपर्वावृषोदरः ॥ वर्द्धनोवर्द्धमानश्चविविक्तःश्रुतिसागरः ॥ २८ ॥ सुभुजोदुर्धरोवाग्मीमहेंद्रोवसुदो
वसुः ॥ नैकरूपोबृहद्रूपःशिपिविष्टःप्रकाशनः ॥ २९ ॥ ओजस्तेजोद्युतिधरःप्रकाशात्माप्रतापनः ॥
ऋद्धःस्पष्टाक्षरोमंत्रश्चंद्रांशुर्भास्करद्युतिः ॥ ३० ॥ अमृतांशूद्भवोभानुःशशबिंदुःसुरेश्वरः ॥ औषधं
जगतःसेतुःसत्यधर्मपराक्रमः ॥ ३१ ॥ भूतभव्यभवन्नाथःपवनःपावनोऽनलः ॥ कामहाकामकृत्
कांतःकामःकामप्रदःप्रभुः ॥ ३२ ॥ युगादिकृद्युगावर्तोनैकमायोमहाशनः ॥ अदृश्योऽव्यक्तरूपश्च
सहस्रजिदनंतजित् ॥ ३३ ॥ इष्टोविशिष्टःशिष्टेष्टःशिखंडीनहुषोवृषः ॥ क्रोधहाक्रोधकृत्कर्ताविश्व
बाहुर्महीधरः ॥ ३४ ॥ अच्युतःप्रथितःप्राणःप्राणदोवासवानुजः ॥ अपांनिधिरधिष्ठानमप्रमत्तःप्रति
ष्ठितः ॥ ३५ ॥ स्कंदःस्कंदधरोधुर्योवरदोवायुवाहनः ॥ वासुदेवोबृहद्भानुरादिदेवःपुरंदरः ॥ ३६ ॥
अशोकस्तारणस्तारःशूरःशौरिर्जनेश्वरः ॥ अनुकूलःशतावर्तःपद्मीपद्मनिभेक्षणः ॥ ३७ ॥ पद्मनाभो

ऽरविंदाक्षःपद्मगर्भःशरीरभृत् ॥ महर्धिर्ऋद्धोवृद्धात्मामहाक्षोगरुडध्वजः ॥ ३८ ॥ अतुलःशरभोभी
मःसमयज्ञोहविर्हरिः ॥ सर्वलक्षणलक्षण्योलक्ष्मीवान्समितिंजयः ॥ ३९ ॥ विक्षरोरोहितोमार्गो
हेतुर्दामोदरःसहः ॥ महीधरोमहाभागोवेगवानमिताशनः ॥ ४० ॥ उद्भवःक्षोभणोदेवःश्रीगर्भःप
रमेश्वरः ॥ करणंकारणंकर्ताविकर्तागहनोगुहः ॥ ४१ ॥ व्यवसायोव्यवस्थानःसंस्थानःस्थानदोध्रु
वः ॥ परर्द्धिःपरमःस्पष्टस्तुष्टःपुष्टःशुभेक्षणः ॥ ४२ ॥ रामोविरामोविरजोमार्गोनेयोनयोऽनयः ॥ वीरः
शक्तिमतांश्रेष्ठोधर्मोधर्मविदुत्तमः ॥ ४३ ॥ वैकुंठःपुरुषःप्राणःप्राणदःप्रणवःपृथुः ॥ हिरण्यगर्भःश
त्रुघ्नोव्याप्तोवायुरधोक्षजः ॥ ४४ ॥ ऋतुःसुदर्शनःकालःपरमेष्ठीपरिग्रहः ॥ उग्रःसंवत्सरोदक्षोविश्रा
मोविश्वदक्षिणः ॥ ४५ ॥ विस्तारःस्थावरःस्थाणुःप्रमाणंबीजमव्ययम् ॥ अर्थोऽनर्थोमहाकोशोम
हाभोगोमहाधनः ॥ ४६ ॥ अनिर्विण्णःस्थविष्ठोभूर्धर्मयूपोमहामखः ॥ नक्षत्रनेमिर्नक्षत्रीक्षमःक्षामः
समीहनः ॥ ४७ ॥ यज्ञइज्योमहेज्यश्चक्रतुःसत्रंसतांगतिः ॥ सर्वदर्शीविमुक्तात्मासर्वज्ञोज्ञानमुत्तमम्
॥ ४८ ॥ सुव्रतःसुमुखःसूक्ष्मःसुघोषःसुखदःसुहृत् ॥ मनोहरोजितक्रोधोवीरबाहुर्विदारणः ॥ ४९ ॥
स्वापनःस्ववशोऽव्यापीनैकात्मानैककर्मकृत् ॥ वत्सरोवत्सलोवत्सीरत्नगर्भोधनेश्वरः ॥ ५० ॥ धर्मगु
ब्धर्मकृद्धर्मीसदसत्क्षरमक्षरम् ॥ अविज्ञातासहस्रांशुर्विधाताकृतलक्षणः ॥ ५१ ॥ गभस्तिनेमिःस

त्वस्थःसिंहोभूतमहेश्वरः ॥ आदिदेवोमहादेवोदेवेशोदेवभृद्गुरुः ॥ ५२ ॥ उत्तरोगोपतिर्गोप्ताज्ञान
गम्यःपुरातनः ॥ शरीरभूतभृद्भोक्ताकपींद्रोभूरिदक्षिणः ॥ ५३ ॥ सोमपोऽमृतपःसोमःपुरुजित्पुरु
सत्तमः ॥ विनयोजयःसत्यसंधोदाशार्हःसात्वतांपतिः ॥ ५४ ॥ जीवोविनयितासाक्षीमुकुंदोऽमितवि
क्रमः ॥ अंभोनिधिरनंतात्मामहोदधिशयोंऽतकः ॥ ५५ ॥ अजोमहार्हःस्वाभाव्योजितामित्रःप्रमोद
नः ॥ आनंदोनंदनोनंदःसत्यधर्मात्रिविक्रमः ॥ ५६ ॥ महर्षिःकपिलाचार्यःकृतज्ञोमेदिनीपतिः ॥ त्रि
पदस्त्रिदशाध्यक्षोमहाशृंगःकृतांतकृत् ॥ ५७ ॥ महावराहोगोविंदःसुषेणःकनकांगदी ॥ गुह्योग
भीरोगहनोगुप्तश्चक्रगदाधरः ॥ ५८ ॥ वेधाःस्वांगोऽजितःकृष्णोदृढःसंकर्षणोऽच्युतः ॥ वरुणोवा
रुणोवृक्षःपुष्कराक्षोमहामनाः ॥ ५९ ॥ भगवान्भगहानंदीवनमालीहलायुधः ॥ आदित्योज्योति
रादित्यःसहिष्णुर्गतिसत्तमः ॥ ६० ॥ सुधन्वाखंडपरशुर्दारुणोद्रविणप्रदः ॥ दिविस्पृक्सर्वदृग्व्या
सोवाचस्पतिरयोनिजः ॥ ६१ ॥ त्रिसामासामगःसामनिर्वाणंभेषजंभिषक् ॥ सन्यासकृच्छमः
शांतोनिष्ठाशांतिःपरायणः ॥ ६२ ॥ शुभांगःशांतिदःस्रष्टाकुमुदःकुवलेशयः ॥ गोहितोगोपतिर्गो
प्तावृषभाक्षोवृषप्रियः ॥ ६३ ॥ अनिवर्त्तीनिवृत्तात्मासंक्षेप्ताक्षेमकृच्छिवः ॥ श्रीवत्सवक्षाःश्रीवा
सःश्रीपतिःश्रीमतांवरः ॥ ६४ ॥ श्रीदःश्रीशःश्रीनिवासःश्रीनिधिःश्रीविभावनः ॥ श्रीधरःश्रीक

रःश्रेयःश्रीमाँल्लोकत्रयाश्रयः ॥ ६५ ॥ स्वक्षःस्वंगःशतानंदोनंदिर्ज्योतिर्गणेश्वरः ॥ विजितात्माविधे
यात्मासत्कीर्तिश्छिन्नसंशयः ॥ ६६ ॥ उदीर्णःसर्वतश्चक्षुरनीशःशाश्वतःस्थिरः ॥ भूशयोभूषणो
भूतिर्विशोकःशोकनाशनः ॥ ६७ ॥ अर्चिष्मानर्चितःकुंभोविशुद्धात्माविशोधनः ॥ अनिरुद्धोऽप्र
तिरथःप्रद्युम्नोऽमितविक्रमः ॥ ६८ ॥ कालनेमिनिहावीरःशौरिःशूरजनेश्वरः ॥ त्रिलोकात्मात्रि
लोकेशःकेशवःकेशिहाहरिः ॥ ६९ ॥ कामदेवःकामपालःकामीकांतःकृतागमः ॥ अनिर्देश्यवपु
र्विष्णुर्वीरोऽनंतोधनंजयः ॥ ७० ॥ ब्रह्मण्योब्रह्मकृद्ब्रह्माब्रह्मब्रह्मविवर्द्धनः ॥ ब्रह्मविद्ब्राह्मणोब्रह्मी
ब्रह्मज्ञोब्राह्मणप्रियः ॥ ७१ ॥ महाक्रमोमहाकर्मामहातेजामहोरगः ॥ महाक्रतुर्महायज्वामहाय
ज्ञोमहाहविः ॥ ७२ ॥ स्तव्यःस्तवप्रियःस्तोत्रंस्तुतिस्तोतारणप्रियः ॥ पूर्णःपूरयितापुण्यःपुण्यकी
र्तिरनामयः ॥ ७३ ॥ मनोजवस्तीर्थकरोवसुरेतावसुप्रदः ॥ वसुप्रदोवासुदेवोवसुर्वसुमनाहविः ॥
॥ ७४ ॥ सद्गतिःसत्कृतिःसत्तासद्भूतिःसत्परायणः ॥ शूरसेनोयदुश्रेष्ठःसन्निवासःसुयामुनः ॥
॥ ७५ ॥ भूतावासोवासुदेवःसर्वासुनिलयोनलः ॥ दर्पहादर्पदोदृप्तोदुर्धरोऽथापराजितः ॥ ७६ ॥
विश्वमूर्तिर्महामूर्तिर्दीप्तमूर्तिरमूर्तिमान् ॥ अनेकमूर्तिरव्यक्तःशतमूर्तिःशताननः ॥ ७७ ॥ एको
नैकःसवःकःकिंयत्तत्पदमनुत्तमम् ॥ लोकबंधुर्लोकनाथोमाधवोभक्तवत्सलः ॥ ७८ ॥ सुव

र्णवर्णोहेमांगोवरांगश्चंदनांगदी ॥ वीरहाविषमःशून्योघृताशीरचलश्चलः ॥ ७९ ॥ अमानीमान
दोमान्योलोकस्वामीत्रिलोकधृक् ॥ सुमेधामेधजोधन्यःसत्यमेधाधराधरः ॥ ८० ॥ तेजोवृषोद्यु
तिधरःसर्वशस्त्रभृतांवरः ॥ प्रग्रहोनिग्रहोव्यग्रोनैकशृंगोगदाग्रजः ॥ ८१ ॥ चतुर्मूर्तिश्चतुर्बाहुश्च
तुर्व्यूहश्चतुर्गतिः ॥ चतुरात्माचतुर्भावश्चतुर्वेदविदेकपात् ॥ ८२ ॥ समावर्तोनिवृत्तात्मादुर्जयो
दुरतिक्रमः ॥ दुर्लभोदुर्गमोदुर्गोदुरावासोदुरारिहा ॥ ८३ ॥ शुभांगोलोकसारंगःसुतंतुस्तंतुवर्ध
नः ॥ इंद्रकर्मामहाकर्माकृतकर्माकृतागमः ॥ ८४ ॥ उद्भवःसुंदरःसुंदोरत्ननाभःसुलोचनः ॥ अ
र्कोवाजसनःशृंगीजयंतःसर्वविज्जयी ॥ ८५ ॥ सुवर्णविंदुरक्षोभ्यःसर्ववागीश्वरेश्वरः ॥ महान्हदो
महागर्तोमहाभूतोमहानिधिः ॥ ८६ ॥ कुमुदःकुंदरःकुंदःपर्जन्यःपावनोऽनिलः ॥ अमृताशोऽमृतव
पुःसर्वज्ञःसर्वतोमुखः ॥ ८७ ॥ सुलभःसुव्रतःसिद्धःशत्रुजिच्छत्रुतापनः ॥ न्यग्रोधोदुंबरोऽश्वत्थ
श्चाणूरांध्रनिषूदनः ॥ ८८ ॥ सहस्रार्चिःसप्तजिह्वःसप्तैधाःसप्तवाहनः ॥ अमूर्तिरनघोऽचिंत्योभय
कृद्भयनाशनः ॥ ८९ ॥ अणुर्बृहत्कृशः स्थूलोगुणभृन्निर्गुणोमहान् ॥ अधृतःस्वधृतःस्वास्यःप्रा
ग्वंशोवंशवर्धनः ॥ ९० ॥ भारभृत्कथितोयोगीयोगीशःसर्वकामदः ॥ आश्रमःश्रमणःक्षामःसु
पर्णोवायुवाहनः ॥ ९१ ॥ धनुर्धरोधनुर्वेदोदंडोदमयितादमः ॥ अपराजितःसर्वसहोनियंतानियमो

यमः ॥ १२ ॥ सत्त्ववान्सात्विकःसत्यःसत्यधर्मपरायणः ॥ अभिप्रायःप्रियार्होऽर्हःप्रियकृत्प्रीतिव
र्धनः ॥ १३ ॥ विहायसगतिर्ज्योतिःसुरुचिर्हुतभुग्विभुः ॥ रविर्विरोचनःसूर्यःसवितारविलोचनः
॥ १४ ॥ अनंतोहुतभुग्भोक्तासुखदोनैकदोऽग्रजः ॥ अनिर्विण्णःसदामर्षीलोकाधिष्ठानमद्भुतः
॥ १५ ॥ सनात्सनातनतमःकपिलःकपिरव्ययः ॥ स्वस्तिदःस्वस्तिकृत्स्वस्तिस्वस्तिभुक्स्वस्तिदक्षि
णः ॥ १६ ॥ अरौद्रःकुंडलीचक्रीविक्रम्यूर्जितशासनः ॥ शब्दातिगःशब्दसहःशिशिरःशर्वरीकरः ॥
॥ १७ ॥ अक्रूरःपेशलोदक्षोदक्षिणःक्षमिणांवरः ॥ विद्वत्तमोवीतभयःपुण्यश्रवणकीर्तनः ॥ १८ ॥ उ
त्तारणोदुष्कृतिहापुण्योदुःस्वप्ननाशनः ॥ वीरहारक्षणःसंतोजीवनःपर्यवस्थितः ॥ ९९ ॥ अनंतरूपो
ऽनंतश्रीर्जितमन्युर्भयापहः ॥ चतुरस्रोगभीरात्माविदिशोव्यादिशोदिशः ॥ १०० ॥ अनादिर्भूर्भुवो
लक्ष्मीःसुवीरोरुचिरांगदः ॥ जननोजनजन्मादिर्भीमोभीमपराक्रमः ॥ १ ॥ आधारनिलयोधातापुष्प
हासःप्रजागरः ॥ ऊर्ध्वगःसत्पथाचारःप्राणदःप्रणवःपणः ॥ २ ॥ प्रमाणंप्राणनिलयःप्राणभृत्प्राण
जीवनः ॥ तत्त्वंतत्त्वविदेकात्माजन्ममृत्युजरातिगः ॥ ३ ॥ भूर्भुवःस्वस्तरुस्तारःसपिताप्रपिताम
हः ॥ यज्ञोयज्ञपतिर्यज्वायज्ञांगोयज्ञवाहनः ॥ ४ ॥ यज्ञभृद्यज्ञकृद्यज्ञीयज्ञभुग्यज्ञसाधनः ॥ यज्ञांत
कृद्यज्ञगुह्यमन्नमन्नादएवच ॥ ५ ॥ आत्मयोनिःस्वयंजातोवैखानःसामगायनः ॥ देवकीनंदनःस्रष्टा

क्षितीशः पापनाशनः ॥ ६ ॥ शंखभृन्नंदकीचक्रीशार्ङ्गधन्वागदाधरः ॥ रथांगपाणिरक्षोभ्यः सर्वप्रहरणा
युधः ॥ सर्वप्रहरणायुधोन्नमइति ॥ १०७ ॥ इतीदंकीर्तनीयस्यकेशवस्यमहात्मनः ॥ नाम्नांसहस्रंदि
व्यानामशेषेणप्रकीर्तितम् ॥ १ ॥ यइदंशृणुयान्नित्यंयश्चापिपरिकीर्तयेत् ॥ नाशुभंप्राप्नुयात्किंचित्सोऽ
मुत्रेहचमानवः ॥ २ ॥ वेदांतगोब्राह्मणःस्यात्क्षत्रियोविजयीभवेत् ॥ वैश्योधनसमृद्धःस्याच्छूद्रःसुख
मवाप्नुयात् ॥ ३ ॥ धर्मार्थीप्राप्नुयाद्धर्ममर्थार्थीचार्थमाप्नुयात् ॥ कामानवाप्नुयात्कामीप्रजार्थीप्राप्नुयात्प्र
जाम् ॥ ४ ॥ भक्तिमान्यःसदोत्थायशुचिस्तद्गतमानसः ॥ सहस्रंवासुदेवस्यनाम्नामेतत्प्रकीर्तयेत् ॥
॥ ५ ॥ यशःप्राप्नोतिविपुलंज्ञातिप्राधान्यमेवच ॥ अचलांश्रियमाप्नोतिश्रेयःप्राप्नोत्यनुत्तमम् ॥ ६ ॥
नभयंक्वचिदाप्नोतिवीर्यंतेजश्चविंदति ॥ भवत्यरोगोद्युतिमान्बलरूपगुणान्वितः ॥ ७ ॥ रोगार्तोमु
च्यतेरोगाद्बद्धोमुच्येतबंधनात् ॥ भयान्मुच्येतभीतस्तुमुच्येतापन्नआपदः ॥ ८ ॥ दुर्गाण्यतितरत्याशु
पुरुषःपुरुषोत्तमम् ॥ स्तुवन्नामसहस्रेणनित्यंभक्तिसमन्वितः ॥ ९ ॥ वासुदेवाश्रयोमर्त्योवासुदेवपरा
यणः ॥ सर्वपापविशुद्धात्मायातिब्रह्मसनातनम् ॥ १० ॥ नवासुदेवभक्तानामशुभंविद्यतेक्वचित् ॥
जन्ममृत्युजराव्याधिभयंनैवोपजायते ॥ ११ ॥ इमंस्तवमधीयानःश्रद्धाभक्तिसमन्वितः ॥ युज्येता
त्मसुखक्षांतिःश्रीधृतिस्मृतिकीर्तिभिः ॥ १२ ॥ नक्रोधोनचमात्सर्यंनलोभोनाशुभामतिः ॥ भवंतिकृत

पुण्यानांभक्तानांपुरुषोत्तमे ॥ १३ ॥ द्यौःसचंद्रार्कनक्षत्राखंदिशोभूर्महोदधिः ॥ वासुदेवस्यवीर्येणवि
धृतानिमहात्मनः ॥ १४ ॥ ससुरासुरगंधर्वंसयक्षोरगराक्षसम् ॥ जगद्वशेवर्ततेदंकृष्णस्यसचराचरम्
॥ १५ ॥ इंद्रियाणिमनोबुद्धिःसत्त्वंतेजोबलंधृतिः ॥ वासुदेवात्मकान्याहुःक्षेत्रंक्षेत्रज्ञएवच ॥ १६ ॥
सर्वागमानामाचारःप्रथमंपरिकल्प्यते ॥ आचारप्रथमोधर्मोधर्मस्यप्रभुरच्युतः ॥ १७ ॥ ऋषयःपितरो
देवामहाभूतानिधातवः ॥ जंगमाजंगमंचेदंजगन्नारायणोद्भवम् ॥ १८ ॥ योगोज्ञानंतथासांख्यंवि
द्याःशिल्पादिकर्मच ॥ वेदाःशास्त्राणिविज्ञानमेतत्सर्वंजनार्दनात् ॥ १९ ॥ एकोविष्णुर्महद्भूतंपृथग्भू
तान्यनेकशः ॥ त्रीन्लोकान्व्याप्यभूतात्माभुंक्तेविश्वभुगव्ययः ॥ २० ॥ इमंस्तवंभगवतोविष्णोर्व्या
सेनकीर्तितं ॥ पठेद्यइच्छेत्पुरुषःश्रेयःप्राप्तुंसुखानिच ॥ २१ ॥ विश्वेश्वरमजंदेवंजगतःप्रभवाप्यय
म् ॥ भजंतियेपुष्कराक्षंनतेयांतिपराभवम् ॥ २२ ॥ ॥ अर्जुनउवाच ॥ ॥ पद्मपत्रविशालाक्ष
पद्मनाभसुरोत्तम ॥ भक्तानामनुरक्तानांत्राताभवजनार्दन ॥ २३ ॥ ॥ श्रीभगवानुवाच ॥ योमां
नामसहस्रेणस्तोतुमिच्छतिपांडव ॥ सोऽहमेकेनश्लोकेनस्तुतएवनसंशयः ॥ २४ ॥ नमोऽस्त्वनंताय
सहस्रमूर्तयेसहस्रपादाक्षिशिरोरुबाहवे ॥ सहस्रनाम्नेपुरुषायशाश्वतेसहस्रकोटीयुगधारिणेनमः ॥
॥२५॥ नमःकमलनाभायनमस्तेजलशायिने ॥ नमस्तेकेशवानंतवासुदेवनमोस्तुते ॥२६॥ वासनाद्वा

सुदेवस्यवासितंभुवनत्रयम् ॥ सर्वभूतनिवासोसिवासुदेवनमोस्तुते ॥ २७ ॥ नमोब्रह्मण्यदेवायगोब्रा
ह्मणाहितायच ॥ जगद्धितायकृष्णायगोविंदायनमोनमः ॥ २८ ॥ आकाशात्पतितंतोयंयथागच्छति
सागरम् ॥ सर्वदेवनमस्कारःकेशवंप्रतिगच्छति ॥ २९ ॥ एषनिष्कंटकःपंथायत्रसंपूज्यतेहरिः ॥ कु
पथंतंविजानीयाद्गोविंदरहितागमम् ॥ ३० ॥ सर्ववेदेषुयत्पुण्यंसर्वतीर्थेषुयत्फलम् ॥ तत्फलंसमवा
प्नोतिस्तुत्वादेवंजनार्दनम् ॥ ३१ ॥ योनरःपठतेनित्यंत्रिकालंकेशवालये ॥ द्विकालमेककालंवाक्रूरंस
र्वंव्यपोहति ॥ ३२ ॥ दह्यंतेरिपवस्तस्यसौम्याःसर्वेसदाग्रहाः ॥ विलीयंतेचपापानिस्तवेह्यस्मिन्प्रकी
र्तिते ॥ ३३ ॥ येनध्यातंश्रुतंयेनयेनायंपठ्यतेस्तवः ॥ दत्तानिसर्वदानानिसुराःसर्वेसमार्चिताः ॥ ३४ ॥
इहलोकेपरेवापिनभयंविद्यतेक्वचित् ॥ नाम्नांसहस्रंयोऽधीतेद्वादश्यांममसन्निधौ ॥ ३५ ॥ शनैर्दहति
पापानिकल्पकोटिशतानिच ॥ अश्वत्थसन्निधौपार्थतुलसीसन्निधौतथा ॥ ३६ ॥ पठेन्नामसहस्रंतुग
वांकोटिफलंलभेत् ॥ शिवालयेपठेन्नित्यंतुलसीवनसंस्थितः ॥ ३७ ॥ नरोमुक्तिमवाप्नोतिचक्रपाणे
र्वचोयथा ॥ ब्रह्महत्यादिकंपापंसर्वपापंविनश्यति ॥ ३८ ॥ ॥ इतिश्रीमन्महाभारतेशतसाहस्र्यांसं
हितायांवैयासिक्यामानुशासनिकेपर्वणिदानधर्मेभीष्मयुधिष्ठिरसंवादेविष्णोर्दिव्यसहस्रनामस्तोत्रंसंपूर्ण
म् ॥ ॥ इति विष्णुसहस्रनाम समाप्तं ॥ ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ शुभंभवतु ॥ ॥ श्रीरस्तु ॥

॥ ३२ ॥ ॥ अथ शिवकवचस्तोत्र प्रारंभः ॥

श्रीगणेशायनमः ॥ ॥ अस्यश्रीशिवकवचस्तोत्रमंत्रस्यब्रह्माऋषिःअनुष्टुप्छंदःश्रीसदाशिवरुद्रोदेवता ॥ ह्रींशक्तिःरंकीलकम् श्रींह्रींक्लींबीजम् श्रीसदाशिवप्रीत्यर्थेशिवकवचस्तोत्रजपेविनियोगः ॥ अथन्यासः ॥ ॥ ॐ नमोभगवतेज्वलज्वालामालिने ॐ रांसर्वशक्तिधाम्नेईशानात्मनेअंगुष्ठाभ्यांनमः ॥ ॐ नमोभगवतेज्वलज्वालामालिने ॐ नींरिंनित्यतृप्तिशक्तिधाम्नेतत्पुरुषात्मनेतर्जनीभ्यांनमः ॥ ॐ नमोभगवतेज्वलज्वालामालिने ॐ मंरुंअनादिशक्तिधाम्नेअघोरात्मनेमध्यमाभ्यांनमः ॐ नमोभगवतेज्वलज्वालामालिने ॐ शिंरैंस्वतंत्रशक्तिधाम्नेवामदेवात्मनेअनामिकाभ्यांनमः ॥ ॐ नमोभगवतेज्वलज्वालामालिने ॐ वांरौंअलुप्तशक्तिधाम्नेसद्योजातात्मनेकनिष्ठिकाभ्यांनमः ॥ ॐ नमोभगवतेज्वलज्वालामालिने ॐ यंरःअनादिशक्तिधाम्नेसर्वात्मनेकरतलकरपृष्ठाभ्यांनमः ॥ एवंहृदयादि ॥. ॥ अथध्यानम् ॥ वज्रदंष्ट्रंत्रिनयनंकालकंठमरिंदमं ॥ सहस्रकरमत्युग्रंवंदेशंभुमुमापतिम् ॥ १ ॥ अथापरंसर्वपुराणगुह्यंनिःशेषपापौघहरंपवित्रम् ॥ जयप्रदंसर्वविपत्प्रमोचनंवक्ष्यामिशैवंकवचंहितायते ॥ २ ॥ ॥ ऋषभउवाच ॥ ॥ नमस्कृत्वामहादेवंविश्वव्यापिनमीश्वरं ॥ वक्ष्येशिवमयंवर्मसर्वरक्षाकरंनृणाम् ॥

॥ ३ ॥ शुचौदेशेसमासीनोयथावत्कल्पितासनः ॥ जितेंद्रियोजितप्राणश्चिंतयेदात्मनोहितम् ॥ ४ ॥
हृत्पुंडरीकांतरसंनिविष्टंस्वतेजसाव्याप्तनभोवकाशम् ॥ अतींद्रियंसूक्ष्ममनंतमाद्यंध्यायेत्परानंदमयंमहे
शम् ॥ ५ ॥ ध्यानावधूताऽखिलकर्मबंधश्चिरंचिदानंदनिमग्नचेताः ॥ षडक्षरन्याससमाहितात्माशैवेन
कुर्यात्कवचेनरक्षां ॥ ६ ॥ मांपातुदेवोऽखिलदेवतात्मासंसारकूपेपतितंगभीरे ॥ तन्नामदिव्यंवरमंत्रमू
लंधुनोतुमेसर्वमघंहृदिस्थम् ॥ ७ ॥ सर्वत्रमांरक्षतुविश्वमूर्तिज्योतिर्मयानंदघनश्चिदात्मा ॥ अणोरणी
यानुरुशक्तिरेकःसईश्वरःपातुभयादशेषात् ॥ ८ ॥ योभूःस्वरूपेणबिभर्तिविश्वंपायात्सभूमेर्गिरिशोष्ट
मूर्तिः ॥ योऽपांस्वरूपेणनृणांकरोतिसंजीवनंसोवतुमांजलेभ्यः ॥ ९ ॥ कल्पावसानेभुवनानिदग्ध्वास
र्वाणियोनृत्यतिभूरिलीलः ॥ सकालरुद्रोऽवतुमांदवाग्नेर्वात्यादिभीतेरखिलाच्चतापात् ॥ १० ॥ प्रदी
प्तविद्युत्कनकावभासोविद्यावराभीतिकुठारपाणिः ॥ चतुर्मुखस्तत्पुरुषस्त्रिनेत्रःप्राच्यांस्थितोरक्षतुमामज
स्रम् ॥ ११ ॥ कुठारवेदांकुशपाशशूलकपालढक्काक्षगुणान्दधानः ॥ चतुर्मुखोनीलरुचिस्त्रिनेत्रःपाया
दघोरोदिशिदक्षिणस्याम् ॥ १२ ॥ कुंदेंदुशंखस्फटिकावभासोवेदाक्षमालावरदाभयांकः ॥ त्र्यक्षश्चतु
र्वक्त्रउरुप्रभावःसद्योधिजातोवतुमांप्रतीच्याम् ॥ १३ ॥ वराक्षमालाभयटंकहस्तःसरोजकिंजल्कसमा
नवर्णः ॥ त्रिलोचनश्चारुचतुर्मुखोमांपायादुदीच्यांदिशिवामदेवः ॥ १४ ॥ वेदाभयेष्टांकुशपाशशूल

कपालढक्काक्षकशूलपाणिः ॥ सितद्युतिःपंचमुखोवतात्मामीशानमूर्ध्वपरमप्रकाशः ॥ १५ ॥ मूर्धान
मव्यान्ममचंद्रमौलिर्भालंममाव्यादथभालनेत्रः ॥ नेत्रेममाव्याद्भगनेत्रहारीनासांसदारक्षतुविश्वनाथः
॥ १६ ॥ पायाच्छ्रुतीमेश्रुतिगीतकीर्तिःकपोलमव्यात्सततंकपाली ॥ वक्त्रंसदारक्षतुपंचवक्त्रोजिह्वां
सदारक्षतुवेदजिह्वः ॥ १७ ॥ कंठंगिरीशोवतुनीलकंठःपाणिद्वयंपातुपिनाकपाणिः ॥ दोर्मूलमव्या
न्ममधर्मबाहुर्वक्षस्थलंदक्षमखांतकोव्यात् ॥ १८ ॥ ममोदरंपातुगिरींद्रधन्वामध्यंममाव्यान्मदनांत
कारी ॥ हेरंबतातोममपातुनाभिंपायात्कटिंधूर्जटिरीश्वरोमे ॥ १९ ॥ ऊरुद्वयंपातुकुबेरमित्रोजानुद्वयं
मेजगदीश्वरोव्यात् ॥ जंघायुगंपुंगवकेतुरव्यात्पादौममाव्यात्सुरवंद्यपालः ॥ २० ॥ महेश्वरःपातुदि
नादियामेमांमध्ययामेवतुवामदेवः ॥ श्रीत्र्यंबकःपातुतृतीययामेवृषध्वजःपातुदिनांत्ययामे ॥ २१ ॥
पायान्निशादौशशिशेखरोमांगंगाधरोरक्षतुमांनिशीथे ॥ गौरीपतिःपातुनिशावसानेमृत्युंजयोरक्षतुसार्व
कालम् ॥ २२ ॥ अंतस्थितंरक्षतुशंकरोमांस्थाणुःसदापातुबहिःस्थितंमाम् ॥ तदंतरेपातुपतिःपशूनां
सदाशिवोरक्षतुमांसमंतात् ॥ २३ ॥ तिष्ठंतमव्याद्भुवनैकनाथःपायाद्व्रजंतंप्रमथाधिनाथः ॥ वेदांतवे
द्योवतुमांनिषण्णंममाव्ययःपातुशिवःशयानम् ॥ २४ ॥ मार्गेषुमांरक्षतुनीलकंठःशैलादिदुर्गेषुपुरत्रया

रिः ॥ अरण्यवासादिमहाप्रवासेपायान्मृगव्याधउदारशक्तिः ॥ २५ ॥ कल्पांतकोटोपपटुप्रकोपःस्फु
टाट्टहासश्चलितांडकोशः ॥ घोरारिसेनार्णवदुर्निवारमहाभयाद्रक्षतुवीरभद्रः ॥ २६ ॥ पत्यश्वमातंगघ
टावरूथसहस्रलक्षायुतकोटिभीषणम् ॥ अक्षौहिणीनांशतमाततायिनांछिद्यान्मृडोघोरकुठारधारया ॥
॥ २७ ॥ निहंतिदस्यून्प्रलयानलार्चिर्ज्वलत्रिशूलंत्रिपुरांतकस्य ॥ शार्दूलसिंहर्क्षवृकादिहिंस्रान्संत्रा
सयत्वीशधनुःपिनाकः ॥ २८ ॥ दुःस्वप्नदुःशकुनदुर्गतिदौर्मनस्यदुर्भिक्षदुर्व्यसनदुःसहदुर्यशांसि ॥ उ
त्पाततापविषभीतिमसद्ग्रहार्तिव्याधींश्चनाशयतुमेजगतामधीशः ॥ २९ ॥ ॥ ॐ नमोभगवतेसदा
शिवायसकलतत्वात्मकायसर्वमंत्रस्वरूपायसर्वयंत्राधिष्ठितायसर्वतंत्रस्वरूपायसर्वतत्वविदूरायब्रह्मरुद्राव
तारिणेनीलकंठायपार्वतीमनोहरप्रियायसोमसूर्याग्निलोचनायभस्मोद्धूलितविग्रहायमहामणिमुकुटधार
णायमाणिक्यभूषणायसृष्टिस्थितिप्रलयकालरौद्रावतारायदक्षाध्वरध्वंसकायमहाकालभेदनायमूलाधारै
कनिलयायतत्वातीतायगंगाधरायसर्वदेवाधिदेवायषडाश्रयायवेदांतसारायत्रिवर्गसाधनायानंतकोटिब्रह्मां
डनायकायानंतवासुकितक्षककर्कोटकशंखकुलिकपद्ममहापद्मेत्यष्टमहानागकुलभूषणायप्रणवस्वरूपा
यचिदाकाशायाकाशदिक्स्वरूपायग्रहनक्षत्रमालिनेसकलायकलंकरहितायसकललोकैककर्त्रेसकललो
कैकसंहर्त्रेसकललोकैकगुरवेसकललोकैकसाक्षिणेसकलनिगमगुह्यायसकलवेदांतपारगायसकललो

कैकवरप्रदायसकललोकैकशंकरायशशांकशेखरायशाश्वतनिराभासायनिर्मलायनिर्लोभायनिर्मदायनि श्चिंतायनिरहंकारायनिरंकुशायनिष्कलंकायनिर्गुणायनिष्कामायनिरुपप्लवायनिरंतरायनिष्कारणायनिरंत कायनिष्प्रपंचायनिःसंगायनिर्द्वंद्वायनिराधारायनिरागायनिःक्रोधायनिर्मलायनिष्पापायनिर्भयायनिर्विक ल्पायनिर्भेदायनिष्क्रियायनिस्तुलायनिःसंशयायनिरंजनायनिरुपमविभवायनित्यशुद्धबुद्धपरिपूर्णसच्चिदा नंदाद्वयायपरमशांतस्वरूपायतेजोरूपायतेजोमयायजयजयरुद्रमहारौद्रभद्रावतारमहाभैरवकालभैरव कल्पांतभैरवकपालमालाधरखट्वांगखड्गचर्मपाशांकुशडमरुशूलचापबाणगदाशक्तिभिंडिमालातोमरमु सलमुद्गरपाशपरिघभुशुंडीशतघ्नीचक्राद्यायुधभीषणकरसहस्रमुखदंष्ट्राकरालवदनविकटाट्टहासविस्फा रितब्रह्मांडमंडलनागेंद्रकुंडलनागेंद्रहारनागेंद्रवलयनागेंद्रचर्मधरमृत्युंजयत्र्यंबकत्रिपुरांतकविश्वरूपवि श्वरूपाक्षविश्वेश्वरवृषभवाहनविषभूषणविश्वतोमुखसर्वतोरक्षरक्षमांज्वलज्वलमहामृत्युमपमृत्युभयं नाशयनाशयचोरभयमुत्सादयोत्सादयविषसर्पभयंशमयशमयचोरान्मारयमारयममशत्रूनुच्चाटयोच्चाटय त्रिशूलेनविदारयविदारयकुठारेणाभिंधिभिंधिखड्गेनाछिंधिछिंधिखट्वांगेनाविपोथयविपोथयमुसलेनानिष्पेष यनिष्पेषयबाणैःसंताडयसंताडयरक्षांसिभीषयभीषयअशेषभूतानिविद्रावयविद्रावयकूष्मांडवेतालमारी गणब्रह्मराक्षसगणान्संत्रासयसंत्रासयममाभयंकुरुकुरुवित्रस्तंमामाश्वासयाश्वासयनरकभयान्मामुद्धरो

द्धरसंजीवयसंजीवयक्षुत्तृड्भ्यांमामाप्यायमाप्याययदुःखातुरंमामानंदयानंदयशिवकवचेनमामाच्छादया
च्छादयमृत्युंजयत्र्यंबकसदाशिवनमस्तेनमस्ते ॥ ॥ ऋषभउवाच ॥ ॥ इत्येतत्कवचंशैवंवरदंव्या
हृतंमया ॥ सर्वबाधाप्रशमनंरहस्यंसर्वदेहिनाम् ॥ ३० ॥ यःसदाधारयेन्मर्त्यःशैवंकवचमुत्तमम् ॥
नतस्यजायतेक्वापिभयंशंभोरनुग्रहात् ॥ ३१ ॥ क्षीणायुःप्राप्तमृत्युर्वामहारोगहतोपिवा ॥ सद्यःसुखम
वाप्नोतिदीर्घमायुश्चविंदति ॥ ३२ ॥ सर्वदारिद्र्यशमनंसौमंगल्यविवर्द्धनम् ॥ योधत्तेकवचंशैवंसदेवैर
पिपूज्यते ॥ ३३ ॥ महापातकसंघातैर्मुच्यतेचोपपातकैः ॥ देहांतेमुक्तिमाप्नोतिशिववर्मानुभावतः ॥
॥ ३४ ॥ त्वमपिश्रद्धयावत्सशैवंकवचमुत्तमम् ॥ धारयस्वमयादत्तंसद्यःश्रेयोह्यवाप्स्यसि ॥ ३५ ॥
सूतउवाच ॥ ॥ इत्युक्त्वाऋषभोयोगीतस्मैपार्थिवसूनवे ॥ ददौशंखंमहारावंखड्गंचारिनिषूदनम् ॥
॥ ३६ ॥ पुनश्चभस्मसंमंत्र्यतदंगंपरितोस्पृशत् ॥ गजानांषट्सहस्रस्यद्विगुणस्यबलंददौ ॥ ३७ ॥
भस्मप्रभावात्संप्राप्यबलैश्वर्यधृतिस्मृतीः ॥ सराजपुत्रःशुशुभेशरदर्कइवश्रिया ॥ ३८ ॥ तमाहप्रांज
लिंभूयःसयोगीनृपनंदनम् ॥ एषखड्गोमयादत्तस्तपोमंत्रानुभावतः ॥ ३९ ॥ सितधारमिमंखड्गंयस्मै
दर्शयसेस्फुटम् ॥ ससद्योम्रियतेशत्रुःसाक्षान्मृत्युरपिस्वयम् ॥ ४० ॥ अस्यशंखस्यनिर्ह्रादंयेशृण्वंति
तवाहिताः ॥ तेमूर्च्छिताःपतिष्यंतिन्यस्तशस्त्राविचेतनाः ॥ ४१ ॥ खड्गशंखाविमौदिव्यौपरसैन्यवि

नाशनौ ॥ आत्मसैन्यस्यपक्षाणांशौर्यतेजोविवर्द्धनौ ॥ ४२ ॥ एतयोश्चप्रभावेनशैवेनकवचेनच ॥ द्वि
षट्सहस्रनागानांबलेनमहतापिच ॥ ४३ ॥ भस्मधारणसामर्थ्याच्छत्रुसैन्यंविजेष्यसि ॥ प्राप्यासिंहा
सनंपित्र्यंगोप्तासिपृथिवीमिमाम् ॥ ४४ ॥ इतिभद्रायुषंसम्यगनुशास्यसमातृकम् ॥ ताभ्यांसंपूजितः
सोथयोगीस्वैरगतिर्ययौ ॥ ४५ ॥ ॥ इतिश्रीस्कंदपुराणेब्रह्मोत्तरखंडेशिववर्मकथनंनामद्वादशोऽ
ध्यायः ॥ १२ ॥ ॥ श्रीसांबसदाशिवार्पणमस्तु ॥ ॥ इति शिवकवचस्तोत्रं समाप्तं ॥ ॥ ७ ॥

॥ ३३ ॥ ॥ अथ सायं संध्या प्रारंभः ॥

श्रीगणेशायनमः ॥ ॥ अथसायंसंध्याप्रारंभः ॥ प्रातःकालवदाचमनंप्राणायामंचकुर्यात् ॥ सायंसं
ध्यावृद्धाकृष्णाकृष्णवर्णाकृष्णवस्त्राकृष्णगंधाकृष्णमाल्यानुलेपनागरुडवाहनाविष्णुदैवत्याआहवनीया
ग्न्युपस्थानासामवेदसंहितातृतीयाविष्णुसंध्यासत्यवतीनाम्नीममोपात्तदुरितक्षयद्वाराश्रीपरमेश्वरप्रीत्यर्थं
सायंसंध्योपास्तिंकरिष्ये ॥ ततःआपःप्राशनमंत्रपर्यंतंप्रातःकालवत् ॥ अग्निश्चेतिमंत्रस्य ॥ याज्ञवल्क्यउ
पनिषदऋषिः ॥ अग्निमामन्युमन्युपतिर्देवता ॥ प्रकृतिश्छंदः ॥ मंत्राचमनेविनियोगः ॥ ॐ अग्निश्च
मामन्युश्चमन्युपतयश्चमन्युकृतेभ्यः ॥ पापेभ्योरक्षंताम् ॥ यदन्हापापमकार्षं ॥ मनसावाचाहस्ताभ्यां ॥

पद्भ्यामुदरेणशिश्ना ॥ अहस्तदवलुंपतु ॥ यत्किंचदुरितंमयि ॥ इदमहंमाममृतयोनौ ॥ सत्येज्योति
षिजुहोमिस्वाहा ॥ आचम्य• ॥ प्रातःकालवत्नवर्क्षकृभिःमार्जनंकृत्वा ॥ तथागायत्रीमंत्रेणवरुणा
यत्रिवारमर्घ्यंदत्वा ॥ असावादित्योब्रह्म ॥ द्विराचमनंप्राणायामंचकृत्वा ॥ प्रातःकालवत्दिग्बंधासनं
षडंगंतथाचगायत्रीजपः ॥ पुनश्चषडंगंकृत्वा ॥ यच्चिद्धितेतिदशर्चस्यसूक्तस्य ॥ अजीगर्तिःशुनःशेप
ऋषिः ॥ वरुणोदेवता ॥ गायत्रीछंदः वरुणोपस्थानेविनियोगः ॥ ॐ यच्चिद्धितेविशोयथाप्रदेववरुणव्रतं ॥
मिनीमसिद्यविद्यवि ॥ मानोवधायहत्नवेजिहीळानस्यरीरधः ॥ मार्हणानस्यमन्यवे ॥ विमृळीकायतेम
नोरथीरश्वंनसंदितं ॥ गीर्भिर्वरुणसीमहि ॥ पराहिमेविमन्यवःपतंतिवस्यइष्टये ॥ वयोनवसतीरुप ॥ क
दाक्षत्राश्रियंनरमावरुणंकरामहे ॥ मृळीकायोरुचक्षसं ॥ १ ॥ तदित्समानमाशातेवेनंतानप्रयुच्छतः ॥ धृ
तव्रतायदाशुषे ॥ वेदायोवीनांपदमंतरिक्षेणपततां ॥ वेदनावःसमुद्रियः ॥ वेदमासोधृतव्रतोद्वादशप्रजा
वतः ॥ वेदायउपजायते ॥ वेदवातस्यवर्तनिमुरोर्ऋष्वस्यबृहतः ॥ वेदायेअध्यासते ॥ निषसादधृतव्र
तोवरुणःपस्त्य स्वा ॥ साम्राज्यायसुक्रतुः ॥ यांसदासर्वभूतानीतिसमाप्तिपर्यंतंप्रातःकालवत्कुर्यात् ॥
इतिसायंसंध्या समाप्ता ॥ ॥ शुभंभवतु ॥ ॥ छ ॥ ॥ छ ॥

॥ ३४ ॥ ॥ अथ रामरक्षास्तोत्र प्रारंभः ॥

श्रीगणेशायनमः ॥ ॥ अस्यश्रीरामरक्षास्तोत्रमंत्रस्यबुधकौशिकऋषिः ॥ श्रीरामचंद्रोदेवता ॥ अनु
ष्टुप्छंदः ॥ सीताशक्तिः ॥ श्रीमद्धनुमान्कीलकं ॥ श्रीरामचंद्रप्रीत्यर्थेरामरक्षास्तोत्रमंत्रजपेविनियो
गः ॥ ॥ अथध्यानं ॥ ध्यायेदाजानुबाहुंधृतशरधनुषंबद्धपद्मासनस्थंपीतंवासोवसानंनवकमलदलस्प
र्धिनेत्रंप्रसन्नं ॥ वामांकारूढसीतामुखकमलमिलल्लोचनंनीरदाभंनानालंकारदीप्तंदधतमुरुजटामंडनंरा
मचंद्रं ॥ चरितंरघुनाथस्यशतकोटिप्रविस्तरं ॥ एकैकमक्षरंपुंसांमहापातकनाशनं ॥ १ ॥ ध्यात्वानी
लोत्पलश्यामंरामंराजीवलोचनं ॥ जानकीलक्ष्मणोपेतंजटामुकुटमंडितम् ॥ २ ॥ सासितूणधनुर्बाण
पाणिंनक्तंचरांतकं ॥ स्वलीलयाजगत्त्रातुमाविर्भूतमजंविभुं ॥ ३ ॥ रामरक्षांपठेत्प्राज्ञःपापघ्नींसर्व
कामदां ॥ शिरोमेराघवःपातुभालंदशरथात्मजः ॥ ४ ॥ कौसल्येयोदृशौपातुविश्वामित्रप्रियःश्रुती ॥
घ्राणंपातुमखत्रातामुखंसौमित्रिवत्सलः ॥ ५ ॥ जिव्हांविद्यानिधिःपातुकंठंभरतवंदितः ॥ स्कंधौदि
व्यायुधःपातुभुजौभग्नेशकार्मुकः ॥ करौसीतापतिःपातुहृदयंजामदग्न्यजित् ॥ मध्यंपातुखरध्वंसीना
भिंजांबवदाश्रयः ॥ ७ ॥ सुग्रीवेशःकटीपातुसक्थिनीहनुमत्प्रभुः ॥ ऊरूरघूत्तमःपातुरक्षःकुलविनाशकृ

त् ॥ ८ ॥ जानुनीसेतुकृत्पातुजंघेदशमुखांतकः ॥ पादौबिभीषणश्रीदःपातुरामोऽखिलंवपुः ॥ ९ ॥
एतांरामबलोपेतांरक्षांयःसुकृतीपठेत् ॥ सचिरायुःसुखीपुत्रीविजयीविनयीभवेत् ॥ १० ॥ पातालभूत
लव्योमचारिणश्छद्मचारिणः ॥ नद्रष्टुमपिशक्तास्तेरक्षितंरामनामभिः ॥ ११ ॥ रामेतिरामभद्रेतिराम
चंद्रेतिवास्मरन् ॥ नरोनलिप्यतेपापैर्भुक्तिंमुक्तिंचविंदति ॥ १२ ॥ जगज्जैत्रैकमंत्रेणरामनाम्नाऽभिरक्षि
तम् ॥ यःकंठेधारयेत्तस्यकरस्थाःसर्वसिद्धयः ॥ १३ ॥ वज्रपंजरनामेदंयोरामकवचंस्मरेत् ॥ अव्या
हताज्ञःसर्वत्रलभतेजयमंगलम् ॥ १४ ॥ आदिष्टवान्यथास्वप्नेरामरक्षामिमांहरः ॥ तथालिखितवा
न्प्रातःप्रबुद्धोबुधकौशिकः ॥ १५ ॥ आरामःकल्पवृक्षाणांविरामःसकलापदाम् ॥ अभिरामस्त्रिलोका
नांरामःश्रीमान्सनःप्रभुः ॥ १६ ॥ तरुणौरूपसंपन्नौसुकुमारौमहाबलौ ॥ पुंडरीकविशालाक्षौचीरकृ
ष्णाजिनांबरौ ॥ १७ ॥ फलमूलाशिनौदांतौतापसौब्रह्मचारिणौ ॥ पुत्रौदशरथस्यैतौभ्रातरौरामलक्ष्म
णौ ॥ १८ ॥ शरण्यौसर्वसत्वानांश्रेष्ठौसर्वधनुष्मताम् ॥ रक्षःकुलनिहंतारौत्रायेतांनोरघूत्तमौ ॥ १९ ॥
आत्तसज्जधनुषाविषुस्पृशावक्षयाशुगनिषंगसंगिनौ ॥ रक्षणायममरामलक्ष्मणावग्रतःपथिसदैवगच्छ
ताम् ॥ २० ॥ सन्नद्धःकवचीखड्गीचापबाणधरोयुवा ॥ गच्छन्मनोरथोऽस्माकंरामःपातुसलक्ष्म
णः ॥ २१ ॥ रामोदाशरथिःशूरोलक्ष्मणानुचरोबली ॥ काकुत्स्थःपुरुषःपूर्णःकौसल्येयोरघूत्तमः ॥

॥ २२ ॥ वेदांतवेद्योयज्ञेशःपुराणपुरुषोत्तमः ॥ जानकीवल्लभःश्रीमानप्रमेयपराक्रमः ॥ २३ ॥ इत्ये
तानिजपेन्नित्यंमद्भक्तःश्रद्धयाऽन्वितः ॥ अश्वमेधाधिकंपुण्यंसंप्राप्नोतिनसंशयः ॥ २४ ॥ रामंदूर्वादल
श्यामंपद्माक्षंपीतवाससम् ॥ स्तुवंतिनामभिर्दिव्यैर्नतेसंसारिणोनराः ॥ २५ ॥ रामंलक्ष्मणपूर्वजंरघुव
रंसीतापतिंसुंदरंकाकुत्स्थंकरुणार्णवंगुणनिधिंविप्रप्रियंधार्मिकं ॥ राजेंद्रंसत्यसंधंदशरथतनयंश्यामलंशां
तिमूर्तिंवंदेलोकाभिरामंरघुकुलतिलकंराघवंरावणारिम् ॥ २६ ॥ रामायरामभद्रायरामचंद्रायवेधसे ॥
रघुनाथायनाथायसीतायाःपतयेनमः ॥ २७ ॥ श्रीरामरामरघुनंदनरामराम श्रीरामरामभरताग्रजराम
राम श्रीरामरामरणकर्कशरामराम श्रीरामरामशरणंभवरामराम ॥ २८ ॥ श्रीरामचंद्रचरणौमनसा
स्मरामि श्रीरामचंद्रचरणौवचसागृणामि श्रीरामचंद्रचरणौशिरसानमामि श्रीरामचंद्रचरणौशरणंप्रप
द्ये ॥ २९ ॥ मातारामोमत्पितारामचंद्रःस्वामीरामोमत्सखारामचंद्रः ॥ सर्वस्वंमेरामचंद्रोदयालुर्नान्यं
जानेनैवजानेनजाने ॥ ३० ॥ दक्षिणेलक्ष्मणोयस्यवामेतुजनकात्मजा ॥ पुरतोमारुतिर्यस्यतंवंदेरघुनं
दनं ॥ ३१ ॥ लोकाभिरामंरणरंगधीरंराजीवनेत्रंरघुवंशनाथम् ॥ कारुण्यरूपंकरुणाकरंतंश्रीरामचंद्रं
शरणंप्रपद्ये ॥ ३२ ॥ मनोजवंमारुततुल्यवेगंजितेंद्रियंबुद्धिमतांवरिष्ठं ॥ वातात्मजंवानरयूथमुख्यंश्री
रामदूतंशरणंप्रपद्ये ॥ ३३ ॥ कूजंतंरामरामेतिमधुरंमधुराक्षरम् ॥ आरुह्यकविताशाखांवंदेवाल्मिकि

कोकिलम् ॥ ३४ ॥ आपदामपहर्तारंदातारंसर्वसंपदाम् ॥ लोकाभिरामंश्रीरामंभूयोभूयोनमाम्यहम् ॥
॥ ३५ ॥ भर्जनंभवबीजानामार्जनंसुखसंपदां ॥ तर्जनंयमदूतानांरामरामेतिगर्जनम् ॥ ३६ ॥ रामो
राजमणिःसदाविजयतेरामंरमेशंभजे रामेणाभिहतानिशाचरचमूरामायतस्मैनमः ॥ रामान्नास्तिपराय
णंपरतरंरामस्यदासोऽस्म्यहंरामेचित्तलयःसदाभवतुमेभोराममामुद्धर ॥ ३७ ॥ रामरामेतिरामेतिरमेरा
मेमनोरमे ॥ सहस्रनामतत्तुल्यंरामनामवरानने ॥ ३८ ॥ ॥ इतिश्रीबुधकौशिकाविरचितंश्रीरामर
क्षास्तोत्रंसंपूर्णम् ॥ श्रीसीतारामचंद्रार्पणमस्तु ॥ ॥ श्रीरस्तु ॥ ॥ इति रामरक्षास्तोत्रं समाप्तम् ॥

॥ ३९ ॥ अथ दत्तात्रेयस्तोत्र प्रारंभः ॥

श्रीगणेशायनमः ॥ ॥ जटाधरंपांडुरंगंशूलहस्तंकृपानिधिम् ॥ सर्वरोगहरंदेवंदत्तात्रेयमहंभजे
॥ १ ॥ अस्यश्रीदत्तात्रेयस्तोत्रमंत्रस्य ॥ भगवान्नारदऋषिः ॥ अनुष्टुप्छंदः ॥ श्रीदत्तपरमात्मादेव
ता ॥ श्रीदत्तप्रीत्यर्थेजपेविनियोगः ॥ जगदुत्पत्तिकर्त्रेचस्थितिसंहारहेतवे ॥ भवपाशविमुक्तायदत्ता
त्रेयनमोस्तुते ॥ १ ॥ जराजन्मविनाशायदेहशुद्धिकरायच ॥ दिगंबरदयामूर्तेदत्तात्रेयनमोस्तुते ॥
॥ २ ॥ कर्पूरकांतिदेहायब्रह्ममूर्तिधरायच ॥ वेदशास्त्रपरिज्ञायदत्तात्रेयन० ॥ ३ ॥ ह्रस्वदीर्घकृश

स्थूलनामगोत्रविवर्जित ॥ पंचभूतकदीप्तायदत्तात्रेयन० ॥ ४ ॥ यज्ञभोक्त्रेचयज्ञाययज्ञरूपधरायच ॥
यज्ञप्रियायसिद्धायदत्तात्रेयन० ॥ ५ ॥ आदौब्रह्मामध्येविष्णुरंतेदेवःसदाशिवः ॥ मूर्तित्रयस्वरूपायदद
त्तात्रेयन० ॥ ६ ॥ भोगालयायभोगाययोग्ययोग्यायधारिणे ॥ जितेंद्रियजितज्ञायदत्तात्रेयन० ॥ ७ ॥
दिगंबरायदिव्यायदिव्यरूपधरायच ॥ सदोदितपरब्रह्मदत्तात्रेयनमोस्तुते ॥ ८ ॥ जंबुद्वीपेमहाक्षेत्रेमा
तापुरनिवासिने ॥ जयमानसतांदेवदत्तात्रे० ॥ ९ ॥ भिक्षाटणंगृहेग्रामेपात्रंहेममयंकरे ॥ नानास्वाद
मयीभिक्षादत्तात्रेय० ॥ १० ॥ ब्रह्मज्ञानमयीमुद्रावस्त्रमाकाशभूतले ॥ प्रज्ञानघनबोधायदत्तात्रे
य० ॥ ११ ॥ अवधूतसदानंदपरब्रह्मस्वरूपिणे ॥ विदेहदेहरूपायदत्तात्रे० ॥ १२ ॥ सत्यरूपसदा
चारसत्यधर्मपरायण ॥ सत्याश्रयपरोक्षायदत्तात्रे० ॥ १३ ॥ शूलहस्तगदापाणिवनमालासुकंधर ॥
यज्ञसूत्रधरब्रह्मदत्तात्रेयन० ॥ १४ ॥ क्षराक्षरस्वरूपायपरात्परतरायच ॥ दत्तमुक्तिपरस्तोत्रदत्तात्रेय०
॥ १५ ॥ दत्तविद्यायलक्ष्मीशदत्तस्वात्मस्वरूपिणे ॥ गुणनिर्गुणरूपायदत्तात्रेय० ॥ १६ ॥ शत्रुना
शकरंस्तोत्रंज्ञानविज्ञानदायकम् ॥ सर्वपापंशमंयातिदत्तात्रेय० ॥ १७ ॥ इदंस्तोत्रंमहद्दिव्यंदत्तप्रत्यक्ष
कारकम् ॥ दत्तात्रेयप्रसादाच्चनारदेनप्रकीर्तितम् ॥ १८ ॥ ॥ इतिश्रीनारदपुराणेनारदविरचितंद
दत्तात्रेयस्तोत्रंसंपूर्णम् ॥ ॥ श्रीदत्तात्रेयार्पणमस्तु ॥ ॥ ॥ ॥ ॥ ॥ ॥

॥ ३६ ॥ ॥ अथ बावन्न श्लोकी श्रीगुरुचरित्र प्रारंभः ॥

श्रीगणेशायनमः ॥ ॥ श्रीदत्तात्रेयगुरवेनमः ॥ अथध्यानं ॥ दिगंबरंभस्मसुगंधलेपनंचक्रंत्रिशूलंडमरुंगदांच ॥ पद्मासनस्थंरविसोमनेत्रंदत्तात्रेयंध्यानमभीष्टसिद्धिदं ॥ १ ॥ काषायवस्त्रंकरदंडधारिणंकमंडलुंपद्मकरेणशंखं ॥ चक्रगदाभूषितभूषणाढ्यंश्रीपादराजंशरणंप्रपद्ये ॥ २ ॥ कृतेजनार्दनोदेवस्त्रेतायांरघुनंदनः ॥ द्वापरेरामकृष्णश्चकलौश्रीपादवल्लभः ॥ ३ ॥ ॐ नमोजीविघ्नहरा ॥ गजाननागिरिजाकुमरा ॥ जयजयाजीलंबोदरा ॥ एकदंताशूर्पकर्णा ॥ १ ॥ त्रैमूर्तिराजागुरुतूंचिमाझा ॥ कृष्णातिरींवासकरूनिवोजा ॥ सद्भक्ततेथेंकरितीआनंदा ॥ तेसुरस्वर्गींपाहातीविनोदा ॥ २ ॥ जयजयाजीसिद्धमुनी ॥ तूंतारकयाभवार्णवीं ॥ संदेहहोतामाझेमनीं ॥ आजितूंवांकडेंकेलें ॥ ३ ॥ ऐसीशिष्याचीविनंती ॥ ऐकोनिसिद्धकायबोलती ॥ साधुसाधुतुझीभक्ती ॥ प्रीतिपावोश्रीगुरुचरणीं ॥ ४ ॥ भक्तजनरक्षणार्थ ॥ अवतारझालाश्रीगुरुनाथ ॥ सगराकारणेंभगीरथ ॥ गंगाआणिलीभूमंडळीं ॥ ॥ ५ ॥ तीर्थेंअसतीअपरांपरी ॥ समस्तसांडूनिप्रीतिकरी ॥ कैसापावलाश्रीदत्तात्री ॥ अवतारझालाश्रीपादश्रीवल्लभ ॥ ६ ॥ ज्यावरीअसेश्रीगुरूचीप्रीती ॥ तीर्थमहिमाऐकणेंचित्तीं ॥ वांछाहोतसेज्ञान

ज्योती ॥ कृपामूर्तियतिराया ॥ ७ ॥ गोकर्णक्षेत्रींश्रीपादयती ॥ राहिलेतीनवर्षेंगुप्ती ॥ तेथूनिश्रीगु
रुगिरिपुरायेती ॥ लोकानुग्रहाकारणें ॥ ८ ॥ श्रीपादकुरवपुरींअसतां ॥ पुढेंवर्तलीकैसीकथा ॥ वि
स्तारोनिसांगआतां ॥ कृपामूर्तिदातारा ॥ ९ ॥ सिद्धह्मणेनामधारकासी ॥ श्रीगुरुमहिमाकायपुससी
अनंतरूपेंपर्येसी ॥ विश्वव्यापकपरमात्मा ॥ १० ॥ सिद्धह्मणेऐकवत्सा ॥ अवतारझालाश्रीपादह
र्षा ॥ पूर्ववृत्तांतऐकिलाऐसा ॥ कथासांगितलीविप्रस्त्रियेची ॥ ११ ॥ श्रीगुरुह्मणतीजननीसी ॥ आह्मा
ऐसानिरोपदेसी ॥ अनित्यशरीरतूंजाणसी ॥ कायभरंवसाजीवित्वाचा ॥ १२ ॥ श्रीगुरुचरित्रकथा
मृत ॥ सेवितांवांच्छाअधिकहोत ॥ शमनकरणारसमर्थ ॥ तूंचिएककृपासिंधू ॥ १३ ॥ ऐकोनिशि
ष्याचेंवचन ॥ संतोपकरीसिद्धआपण ॥ श्रीगुरुचरित्रकामधेनूजाण ॥ सांगताझालाविस्तार ॥
॥ १४ ॥ऐकशिष्याशिरोमणी ॥ धन्यधन्यतुझीवाणी ॥ तुझीभक्तीश्रीगुरुचरणीं ॥ लीनझालीपर्यसा
॥ १५ ॥ विनवीशिष्यनामांकित ॥ सिद्धयोगियातेंपुसत ॥ सांगास्वामीवृत्तांत ॥ श्रीगुरुचरित्रवि
स्तारें ॥ १६ ॥ ऐकशिष्यानामकरणीं ॥ श्रीगुरुभक्तशिखामणी ॥ तुझभिक्तीश्रीगुरुचरणीं ॥ लीनझा
लीनिर्धारें ॥ १७ ॥ ध्यानलागलेंश्रीगुरुचरणीं ॥ तृप्तिनव्हेअंतःकरणीं ॥ कथामृतसंजीवनी ॥ आ
णीकनिरोपावेंदातारा ॥ १८ ॥ अज्ञानतिमिरजानित ॥ निजलोंहोतोंमदोन्मत्त ॥ श्रीगुरुचरित्रवच

नामृत ॥ प्राशनकेलेंदातारा ॥ १९ ॥ स्वामीनिरोपिलेंआह्मासीं ॥ श्रीगुरुआलेगाणगापुरासी ॥ गौ
प्यरूपेंअमरापुरासी ॥ औदुंबरींअसतीजाण ॥ २० ॥ सिद्धह्मणेनामधारका ॥ ब्रह्मचारीकारणिका
उपदेशिलेंज्ञानाविवेका ॥ तयेप्रेतजननीसी ॥ २१ ॥ तुझेचरणसंपर्कहोतां ॥ झालेंज्ञानमजआतां ॥
परमार्थीमनएेकतां ॥ झालेंतुझेप्रसादें ॥ २२ ॥ लोटांगणेंश्रीगुरूसी ॥ जाऊनिराजाभक्तीसी ॥ न
मस्कारोनिविनयेसी ॥ एकभावकरोनियां ॥ २३ ॥ शिष्यवचनपरिसोनी ॥ सांगताझालासिद्धमु
नी ॥ ऐकभक्तानामकरणी ॥ श्रीगुरुचरित्रअभिनव ॥ २४ ॥ सिद्धह्मणेऐकबाळा ॥ श्रीगुरूचीअ
गम्यलीळा ॥ सांगतांनसरेबहुकाळा ॥ साधारणमीसांगतसें ॥ २५ ॥ श्रीगुरुह्मणतीब्राह्मणासी ॥
नकोभ्रमूंरेयुक्तीसी ॥ वेदांतनकळेब्रह्मयासी ॥ अनंतवेदअसतीजाण ॥ २६ ॥ चतुर्वेदविस्तारेसी ॥
श्रीगुरुसांगतीविप्रासी ॥ पुढेंकथावर्तलीकैसी ॥ विस्तारावेंदातारा ॥ २७ ॥ नामधारकह्मणेसिद्धा
सी ॥ पुढीलकथासांगआह्मासी ॥ उल्हासहोतोमाझेमानसीं ॥ श्रीगुरुचारित्रआतिगोड ॥ २८ ॥
पुढेंकथाकवणेपरी ॥ झालीअसेश्रीगुरुचरित्रीं ॥ निरोपावेंविस्तारीं ॥ सिद्धमुनिकृपासिंधू ॥ २९ ॥
श्रीगुरुचरित्रसुधारस ॥ तुह्मीपाजिलाआह्मास ॥ परितृप्तनव्हेगामानस ॥ तृषाआणीकहोतसे ॥
॥ ३० ॥ सिद्धह्मणेनामधारका ॥ पुढेंअपूर्वझालेंऐका ॥ योगेश्वरकारणिका ॥ सांगेस्त्रियांचेस्वधर्म

॥ ३१ ॥ पतिव्रतेचीरीती ॥ सांगेदेवांसीबृहस्पती ॥ सहगमनाचीफलश्रुती ॥ येणेपरीनिरोपिली ॥
॥ ३२ ॥ श्रीगुरुआलेमठासी ॥ पुढेंकथावर्तलीकैसी ॥ विस्तारोनिआह्मासी ॥ निरोपावेंस्वामियां
॥ ३३ ॥ गुरुह्मणतीदंपतीसी ॥ ऐकापाराशरऋषी ॥ तयाकाश्मीररायासी ॥ रुद्राक्षमहिमानिरोपि
ला ॥ ३४ ॥ पुढेंकथाकैसीवर्तली ॥ विस्तारोनिसांगवहिली ॥ मनमाझेंअसेवेधलें ॥ श्रीगुरुचरित्र
ऐकावया ॥ ३५ ॥ गाणगापुरींअसतांश्रीगुरू ॥ महिमाझालीअपरांपरू ॥ सांगतअसेविस्तारू ॥
तावन्मात्रसांगतसे ॥ ३६ ॥ ऐसाश्रीगुरुदातारू ॥ भक्तजनाकल्पतरू ॥ सांगताझालाआचारू ॥
कृपाकरोनिविप्रासी ॥ ३७ ॥ आर्तझालोंमीतृषेचा ॥ घोटभरविगाअमृताचा ॥ चरित्रसांगेंश्री
गुरूचें ॥ माझेंमननिवार्वेवेगीं ॥ ३८ ॥ सिद्धह्मणेनामधारका ॥ पुढेंअपूर्वझालेंऐका ॥ साठवर्षेवां
झसीदेखा ॥ पुत्रकंन्याप्रसवली ॥ ३९ ॥ सिद्धह्मणेनामधारका ॥ अपूर्ववर्तलेंआणीकऐका ॥ वृक्ष
झालाकाष्ठशुष्का ॥ विचित्रकथापरियेसी ॥ ४० ॥ जयजयाजीसिद्धमुनी ॥ तूंतारकभवार्णवीं ॥
नानाधर्मविस्तारोनी ॥ श्रीगुरुचरित्रनिरोपिलें ॥ ४१ ॥ मागेंकथानिरोपिली ॥ सायंदेवाशिष्यभले ॥
श्रीगुरुत्यासीनिरोपिले ॥ कलत्रपुत्रआणिह्मणती ॥४२॥ श्रीगुरुह्मणतीद्विजासी ॥ याअनंतव्रतासी
सांगेनऐकातुह्मासी ॥ पूर्वीबहुतींआराधिलें ॥ ४३ ॥ श्रीगुरुमाझामल्लिकार्जुन ॥ पर्वतह्मणजेश्रीगु

रुभुवन ॥ आपणनयेआतांयेथून ॥ सोडूनिचरणश्रीगुरूचे ॥ ४४ ॥ तूंमेटलासीमजतारक ॥ दैन्य
गेलेंसकळहीदुःख ॥ सर्वाभीष्टलाधलेंसुख ॥ श्रीगुरुचरित्रऐकतां ॥ ४५ ॥ गाणगापुरींअसतांश्री
गुरू ॥ ख्यातिझालीअपारू ॥ लोकयेतीथोरथोरू ॥ भक्तबहुतझालेअसती ॥ ४६ ॥ सांगेनऐकावि
चित्रकथा ॥ जेणेंहोयपातितपवित्र ॥ ऐसेंहेंश्रीगुरुचरित्र ॥ तत्परेसीपर्यसा ॥ ४७ ॥ श्रीगुरुनित्य
संगमासी ॥ जातहोतेअनुष्ठानासी ॥ मार्गातशूद्रपर्यसी ॥ शेतींआपुल्याउभाअसे ॥ ४८ ॥ त्रैमूर्ती
चाअवतार ॥ वेषधारीझालानर ॥ राहिलेप्रीतींगाणगापुर ॥ कवणक्षेत्रम्हणोनियां ॥ ४९ ॥ तेणेंमा
गीतलावर ॥ राजपदधुरंधर ॥ प्रसन्नझालात्यासीगुरु ॥ दिधलावरपर्यसा ॥ ५० ॥ राजभेटीघेऊ
नी ॥ श्रीपादआलेगाणगाभुवनी ॥ योजनाकरितीआपुलेमनीं ॥ गौप्यराहावेंम्हणोनी ॥ ५१ ॥ म्ह
णेसरस्वतीगंगाधर ॥ श्रोतयांकरितीनमस्कार ॥ कथाऐकेंमनोहर ॥ सकलाभीष्टलाधेलतुम्हां ॥
॥ ५२ ॥ ॥ इतिश्रीगुरुचरित्रकथाकल्पतरौसिद्धनामधारकसंवादेएकपंचाशत्तमोऽध्यायः ॥ श्लोकसंपूर्णम् ॥
श्रीगुरुदत्तात्रेयार्पणमस्तु ॥ ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ इति गुरुचरित्रं समाप्तं ॥ ॥ ० ॥

॥ ३७ ॥ ॥ अथ गीतामाहात्म्य प्रारंभः

श्रीगणेशायनमः ॥ ॥ गीतामाहात्म्यंलिख्यते ॥ धरोवाच ॥ भगवन्परमेशानभक्तिरव्याभिचारिणी ॥
प्रारब्धंभुज्यमानस्यकथंभवतिहेप्रभो ॥ १ ॥ विष्णुरुवाच ॥ प्रारब्धंभुक्तमानोहिगीताभ्यासरतःसदा ॥
समुक्तःससुखीलोकेकर्मणानोपलिप्यते ॥ २ ॥ महापापादिपापानिगीताध्यानंकरोतिचेत् ॥ क्वचित्स्प
र्शनकुर्वंतिनलिनंअंभसाइव ॥ ३ ॥ गीतायाःपुस्तकंयत्रयत्रपाठःप्रवर्तते ॥ तत्रसर्वाणितीर्थानिप्रयागा
दीनितत्रवै ॥ ४ ॥ सर्वेदेवाश्चऋषयोयोगिनःपन्नगाश्चये ॥ गोपालगोपिकावापिनारदोद्धवपार्षदैः ॥५॥
सहायोजायतेशीघ्रंयत्रगीताप्रवर्तते ॥ यत्रगीताविचारश्चपठनंपाठनंश्रुतं ॥ तत्राहंनिश्चितंपृथ्विनिवसा
मिसदैवहि ॥ ६ ॥ गीताश्रयेहंतिष्ठामिगीतामेचोत्तमंगृहं ॥ गीताज्ञानमुपाश्रित्यत्रीन्लोकान्पाल
याम्यहं ॥ ७ ॥ गीतामेपरमाविद्याब्रह्मरूपानसंशयः ॥ अर्धमात्राक्षरानित्यास्वनिर्वाच्यपदात्मिका ॥
॥ ८ ॥ चिदानंदघनकृष्णेनोक्तास्वमुखतोर्जुनं ॥ वेदत्रयीपरानंदातत्वार्थज्ञानमंजसा ॥ ९ ॥ योष्टाद

शजपेनित्यंनरोनिश्चलमानसः ॥ ज्ञानसिद्धिंसलभतेततोयातिपरंपदं ॥ १० ॥ पाठेऽसमर्थःसंपूर्णेतद
र्धपाठमाचरेत् ॥ तदागोदानजंपुण्यंलभतेनात्रसंशयः ॥ ११॥ त्रिभागंपठमानस्तुगंगास्नानफलंलभे
त् ॥ षडंशंजपमानस्तुसोमयागफलंलभेत् ॥ १२ ॥ एकाध्यायंतुयोनित्यंपठतेभक्तिसंयुतः ॥ रुद्र
लोकमवाप्नोतिगणोभूत्वावसेच्चिरं ॥ १३ ॥ अध्यायंश्लोकपादंवानित्यंयःपठतेनरः ॥ सयातिनरतांया
वन्मन्वंतरंवसुंधरे ॥ १४ ॥ गीतायाःश्लोकदशकंसप्तपंचचतुष्टयं ॥ द्वौत्रीएकंतदर्धंवाश्लोकानांयःप
ठेन्नरः ॥ १५ ॥ चंद्रलोकमवाप्नोतिवर्षाणामयुतंध्रुवं ॥ गीतापाठसमायुक्तोमृतोमानुषतांव्रजेत् ॥
॥ १६ ॥ गीताभ्यासंपुनःकृत्वालभतेमुक्तिमुत्तमां ॥ गीतेत्युच्चारसंयुक्तोम्रियमाणोगतिंलभेत् ॥
॥ १७ ॥ गीतार्थश्रवणासक्तोमहापापयुतोपिवा ॥ वैकुंठंसमवाप्नोतिविष्णुनासहमोदते ॥ १८ ॥
गीतार्थंध्यायतेनित्यंकृत्वाकर्माणिभूरिशः ॥ जीवन्मुक्तःसविज्ञेयोदेहांतेपरमंपदं ॥ १९ ॥ गीतामा
श्रित्यबहवोभूभुजोजनकादयः ॥ निर्धूतकल्मषालोकेगीतायांतिपरंपदं ॥ २० ॥ गीतायाःपठनंकृ
त्वामहात्म्यंनैवयःपठेत् ॥ वृथापाठोभवेत्तस्यश्रमएवउदाहृतः ॥ २१ ॥ एतन्महात्म्यं० ॥ ॥ सू
तउवाच ॥ माहात्म्यमेतद्गीतायां० ॥ ॥ इतिश्रीवराहपुराणेगीतामाहात्म्यंसंपूर्णं ॥ ॥ छ ॥

॥ ३८ ॥ अथ चतुःश्लोकीभागवत प्रारंभः

श्रीगणेशायनमः ॥ ॥ श्रीसरस्वत्यैनमः ॥ श्रीभगवानुवाच ॥ ज्ञानंपरमगुह्यंमेयद्विज्ञानसमन्वि
तं ॥ सरहस्यंतदंगंचगृहाणगदितंमया ॥ १ ॥ यावानहंयथाभावोयद्रूपगुणकर्मकः ॥ तथैवतत्ववि
ज्ञानमस्तुतेमदनुग्रहात् ॥ २ ॥ अहमेवासमेवाग्रेनान्यद्यत्सदसत्परं ॥ पश्चादहंयदेतच्चयोवशिष्येत
सोस्म्यहं ॥ ३ ॥ ऋतेर्थंयत्प्रतीयेतनप्रतीयेतचात्मनि ॥ तद्विद्यादात्मनोमायांयथाभासोयथातमः ॥ ४ ॥
यथामहांतिभूतानिभूतेषूच्चावचेष्वनु ॥ प्रविष्टान्यप्रविष्टानितथातेषुनतेष्वहं ॥ ५ ॥ एतावदेवजिज्ञास्यं
तत्वजिज्ञासुनात्मना ॥ अन्वयव्यतिरेकाभ्यांयत्स्यात्सर्वत्रसर्वदा ॥ ६ ॥ एतन्मतंसमातिष्ठपरमेणस
माधिना ॥ भवान्कल्पविकल्पेषुनाहिमुह्यातिकर्हिचित् ॥ ७ ॥ ॥ इतिश्रीभागवतेमहापुराणेष्टादश
साहस्र्यांसंहितायांवैय्यासिक्यांद्वितीयस्कंधेभगवद्ब्रह्मसंवादेचतुःश्लोकीभागवतंसमाप्तम् ॥ श्रीकृष्णा
र्पणमस्तु ॥ ॥ छ ॥ ॥ छ ॥ ॥ ॥ ॥ ॥ छ ॥ ॥ छ ॥

॥ ३१ ॥ ॥ अथ संकष्टनाशनस्तोत्र प्रारंभः ॥

श्रीगणेशायनमः ॥ ॥ नारदउवाच ॥ ॥ प्रणम्यशिरसादेवंगौरीपुत्रंविनायकम् ॥ भक्त्याव्यासंस्मरे न्नित्यमायुःकामार्थसिद्धये ॥ १ ॥ प्रथमंवक्रतुंडंचएकदंतंद्वितीयकम् ॥ तृतीयंकृष्णपिंगाक्षंगजवक्त्रं चतुर्थकम् ॥ २ ॥ लंबोदरंपंचमंचषष्ठंविकटमेवच ॥ सप्तमंविघ्नराजंचधूम्रवर्णंतथाऽष्टमम् ॥ ३ ॥ नवमंभालचंद्रंचदशमंतुविनायकम् ॥ एकादशंगणपतिंद्वादशंतुगजाननम् ॥ ४ ॥ एतानिद्वादशनामा नित्रिसंध्यंयःपठेन्नरः ॥ नचविघ्नभयंतस्यसर्वसिद्धिकरप्रभो ॥ ५ ॥ विद्यार्थीलभतेविद्यांधनार्थीलभतेधन म् ॥ पुत्रार्थीलभतेपुत्रान्मोक्षार्थीलभतेगतिम् ॥ ६ ॥ जपेद्गणपतिस्तोत्रंषड्भिर्मासैःफलंलभेत् ॥ संवत्स रेणसिद्धिंचलभतेनात्रसंशयः ॥ ७ ॥ अष्टानांब्राह्मणानांचलिखित्वायःसमर्पयेत् ॥ तस्यविद्याभवेत्सर्वागणेशस्यप्रसादतः ॥ ८ ॥ ॥ इतिश्रीनारदपुराणे संकष्टनाशनस्तोत्रंसंपूर्णम् ॥ ॥ श्रीसंकष्टनाशनार्पणमस्तु ॥ ॥ श्रीगजाननप्रसन्नोऽस्तु ॥ ॥ शुभमस्तु ॥ ॥ ७ ॥ ॥ ७ ॥

॥ ४० ॥ ॥ अथ गणेशाष्टक प्रारंभः

श्रीगणेशायनमः ॥ एकदंतंमहाकायंतप्तकांचनसंनिभं ॥ लंबोदरंविशालाक्षंवंदेहंगणनायकं ॥
॥ १ ॥ मौंजीकृष्णाजिनधरंनागयज्ञोपवीतकं ॥ बालेंदुसकलामौलिंवंदेहं० ॥ २ ॥ अंबिकाहृदया
नंदंमातृभिःपरिवेष्टितं ॥ भक्तिप्रियंमदोन्मत्तंवंदेहं० ॥ ३ ॥ यक्षकिंनरगंधर्वसिद्धविद्याधरैःसदा ॥
स्तूयमानंमहाबाहुंवंदेहं० ॥ ४ ॥ मूषकोत्तममारुह्यदेवासुरमहाहवे ॥ ऊर्ध्वकायंमहावीर्यंवंदेहं० ॥
॥ ५ ॥ सर्वसिद्धिकरंदेवंसर्वविघ्नविवर्जितं ॥ सर्वसिद्धिप्रदातारंवंदे० ॥ ६ ॥ गजवक्त्रंसुरश्रेष्ठंकर्ण
चामरभूषितं ॥ पाशांकुशधरंदेवंवंदेहं० ॥ ७ ॥ चित्ररत्नविचित्रांगंचित्रमालाविभूषितं ॥ कामरूप
धरंदेवं० ॥ ८ ॥ गणाष्टकमिदंपुण्यंयःपठेत्सततंनरः ॥ सर्वान्कामानवाप्नोतिसर्वसिद्धिफलंल
भेत् ॥ ९ ॥ ॥ इतिश्रीगणेशाष्टकं समाप्तं ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ ४१ ॥ ॥ अथ सूर्यस्तुति प्रारंभः ॥

श्रीगणेशायनमः ॥ ॥ श्रीसूर्यनारायणायनमः ॥ ॥ जयाचारथाएकचीचक्रपाहीं ॥ नसेभूमिआकाश आधारकांहीं ॥ असेसारथीपांगुळाजारथासी ॥ नमस्कारत्यासूर्यनारायणासी ॥ १ ॥ करींपद्ममाथांकिरीटीझळाळी॥प्रभाकुंडलांचीशरीरानिराळी॥पहारश्मिजाचीत्रिलोकासिंकेसी॥नमस्कार०॥२॥सहस्रद्वयें दोनशेंआणिदोन॥क्रमीयोजनेंजोनिमिष्यार्द्धतेन॥मनाकल्पवेनाजयाच्यात्वरेसी॥नमस्कार०॥३॥विधीवेदकर्मांसिआधारकर्ता॥स्वधाकारस्वाहादिसर्वत्रभोक्ता॥असेअन्नदातासमस्तांजनासीं॥नमस्कार०॥४॥युगेंमंत्रकल्पांतज्याचेनिहातीं॥हरिब्रह्मरुद्रादिज्याबोलिजेती॥क्षयांतींमहाकाळरूपाप्रकाशी॥नमस्कार० ॥५॥शशीतारगोऊनियांजोग्रहातें ॥ त्वरेंमेरुवेष्टोनियांपूर्वपंथें॥भ्रमेजोसदांलोकरक्षावयासी॥नमस्कार० ॥६॥ समस्तांसुरांमाजितूंजाणचर्या॥ह्मणोनीचतूंश्रेष्ठत्यानामसूर्या ॥ दुजादेवतोदाखवीस्वप्रकाशीं॥ नमस्कार० ॥७॥ महांमोहअंधकारासिनाशी॥ प्रभाशुद्धसलाकुअज्ञाननाशी ॥ अनाथाकृपाजोकरीनित्यऐशी॥नमस्कार०॥८॥कृपाज्यावरीहोयत्याभास्कराची॥नपाहूंशकेशत्रुत्यालाविरंची॥उभ्याराहतीसिद्धिहोऊनिदासी ॥नम०॥९॥ फुलेंचंदनआणिपुष्पेंकरोनी॥पुजावेंबरेंएकनिष्ठाधरोनी॥मनींइच्छिलेंपाविजेत्या

मुखासी ॥ नमस्कार० ॥१०॥ नमस्कारसाष्टांगबापास्वभावें ॥ करोनीतयाभास्करालागिंध्यावें ॥ दरिद्रं
सहस्रादिजोक्लेशनाशी ॥ नम०॥ ११ ॥ वरीसूर्यआदित्यामित्रादिभानू ॥ विवस्वानइत्यादिहीपादरेणू ॥
सदावांछितीपूज्यतेशंकरासी ॥ नमस्कार० ॥ १२ ॥ ॥ इतिश्रीसूर्यस्तुतिवामनकृतासमाप्ता ॥ ७ ॥

॥ ८२ ॥ अथ मारुतिस्तोत्र प्रारंभः ॥

श्रीगणेशायनमः ॥ अथश्रीमारुतिस्तोत्रप्रारंभः ॥ ॥ अद्यपूर्वोच्चारितवर्त्तमानएवंगुणविशेषणवि
शिष्टायांशुभपुण्यतिथौममअभीप्सितकामनासिद्ध्यर्थंमारुतिस्तोत्रजपमहंकरिष्ये ॥ अथध्यानं ॥ मनो
जवंमारुततुल्यवेगंजितेंद्रियंबुद्धिमतांवरिष्ठं ॥ वातात्मजंवानरयूथमुख्यंश्रीरामदूतंशरणंप्रपद्ये ॥ १ ॥
मानसोपचारैःसंपूज्य ॥ भीमरूपीमहारुद्रावज्रहनुमानमारुति ॥ वनारीअंजनीसुतारामदूताप्रभंजना
॥ १ ॥ महाबळीप्राणदातासकळांउठवीबळें ॥ सौख्यकारीदुःखहारीदूतवैष्णवगायका ॥ २ ॥ दी
ननाथाहरिरूपासुंदराजगदंतरा ॥ पातालदेवताहंताभव्यासिंदूरलेपना ॥ ३ ॥ लोकनाथाजगन्नाथा
प्राणनाथापुरातना ॥ पुण्यवंतापुण्यशीलापावनापरितोषका ॥ ४ ॥ ध्वजाग्रींउचलीबाहूआवेशेंलोट

लापुढें ॥ कालाग्नीकालरुद्राग्नीदेखतांकांपतीभयें ॥ ५ ॥ ब्रह्मांडमाइलेंनेणोंआंवाळेदंतपंगती ॥ नेत्राग्नीचालिल्याज्वाळाभ्रुकुटीत्राहाटिल्याबळें ॥ ६ ॥ पुच्छतेंमुरडिलेंमाथांकिरीटीकुंडलेंबरीं ॥ सुवर्णकटिकांसोटीघंटाकिंकिणिनागरा ॥ ७ ॥ ठकारेपर्वताऐसानेटकासठपातळा ॥ चपळांगपाहतां मोठेंमहाविद्युल्लतेपरी ॥ ८ ॥ कोटिचाकोटिउड्डाणेंझेंपावेउत्तरेकडे ॥ मंदराद्रिसारिखाद्रोणक्रोधेंउत्पाटिलाबळें ॥ ९ ॥ आणिलामागुतींनेलागेलाआलामनोगतें ॥ मनासिटाकिलेंमागेंगतीसितुलनानसे ॥ १० ॥ अणूपासोनिब्रह्मांडाएवढाहोतजातसे ॥ तयासितुलनाकैंचीमेरुमांदारधाकुटे ॥ ११ ॥ ब्रांह्मडाभोंवतेवेढेआपुल्यापुच्छिघालित ॥ तयासिउपमाधायाब्रह्मांडींपाहतांनसे ॥ १२ ॥ आरक्तपाहतांडोळांग्रासिलेंसूर्यमंडळा ॥ भूतप्रेतसमंधादीरोगव्याधिसमस्तहि ॥ १३ ॥ धनधान्यपशुवृद्धीपुत्रपोत्रसमस्तहि ॥ पावतीरूपविद्यादिस्तोत्रपाठेंकरूनियां ॥ १४ ॥ ऐसेंहेंस्तोत्रमाहात्म्यपठतीजपतीसदा ॥ मारुतीच्याप्रसादानेंभुक्तिमुक्तिसदावसे ॥ १५ ॥ नासतीतुटतीचिंताआनंदेंभीमदर्शनें ॥ हीधरापंधराश्लोकीलाभलीशोभलीबरी ॥ १६ ॥ दृढदेहींनसंदेहसंख्याचंद्रकलागुणें ॥ रामदासीं अग्रगण्यकपिकुलासिमंडण ॥ रामरूपीअंतरात्मादर्शनेंदोषनासती ॥ १७ ॥ ॥ इतिश्रीरामदासकृतमारुतिस्तोत्रंसंपूर्णम् ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥

॥ ४३ ॥ ॥ अथ शिवमानसपूजा प्रारंभः ॥

श्रीगणेशायनमः ॥ ॥ अथशिवमानसपूजाप्रारंभः ॥ ॥ रत्नैःकल्पितमासनंहिमजलैःस्नानंचदि
व्यांबरंनानारत्नविभूषितंमृगमदामोदांकितंचंदनं ॥ जातीचंपकबिल्वपत्ररचितंपुष्पंचधूपंतथादीपंदेव
दयानिधेपशुपतेहृत्कल्पितंगृह्यताम् ॥ १ ॥ सौवर्णेमणिखंडरत्नरचितेपात्रेघृतंपायसंभक्ष्यंपंचविधंप
योदधियुतंरंभाफलंमानसं ॥ शाकानामयुतंजलंरुचिकरंकर्पूरखंडोज्ज्वलंतांबूलंमनसामयाविरचितंभ
क्त्याप्रभोस्वीकुरु ॥ २ ॥ छत्रंचामरयोर्युगंव्यजनकंचादर्शनंनिर्मलंवीणाभेरिमृदंगकाहलकलागीतं
चनृत्यंतथा ॥ साष्टांगंप्रणतिस्तुतिर्बहुविधाएतत्समस्तंमयासंकल्पेनसमर्पितंतवविभोपूजांगृहाणप्र
भो ॥ ३ ॥ आत्मात्वंगिरिजामतिःसहचराःप्राणाःशरीरंगृहंपूजातेविषयोपभोगरचनानिद्रासमाधिस्थि
तिः ॥ संचारःपदयोःप्रदक्षिणविधिःस्तोत्राणिसर्वागिरोयद्यत्कर्मकरोमितत्तदखिलंशंभोतवाराधनम् ॥
॥ ४ ॥ करचरणकृतंवाकायजंकर्मजंवाश्रवणनयनजंवामानसंवापराधम् ॥ विहितमविहितंवासर्वमेत
तत्क्षमस्वजयजयकरुणाब्धेश्रीमहादेवशंभो ॥ ५ ॥ ॥ इतिशिवमानसपूजासमाप्ता ॥ श्रीसांबस
दाशिवार्प० ॥ ॥ ॥ छ ॥ ॥ ॥ छ ॥ ॥ ॥ छ ॥ ॥

॥ ४४ ॥ ॥ अथ नवग्रहस्तोत्र प्रारंभः ॥

श्रीगणेशायनमः ॥ ॥ व्यासउवाच ॥ ॥ जपाकुसुमसंकाशंकाश्यपेयंमहाद्युतिम् ॥ तमोरिंसर्वपाप
घ्नंप्रणतोऽस्मिदिवाकरम् ॥ १ ॥ दधिशंखतुषाराभंक्षीरार्णवसमुद्भवम् ॥ नमामिशशिनंसोमंशंभोर्मुकु
टभूषणम् ॥ २ ॥ धरणीगर्भसंभूतंविद्युत्कांतिसमप्रभम् ॥ कुमारंशक्तिहस्तंतंमंगलंप्रणमाम्यहम् ॥
॥ ३ ॥ प्रियंगुकलिकाश्यामंरूपेणाप्रतिमंबुधम् ॥ सौम्यंसौम्यगुणोपेतंतंबुधंप्रणमाम्यहम् ॥ ४ ॥ दे
वानांचऋषीणांचगुरुंकांचनसन्निभम् ॥ बुद्धिभूतंत्रिलोकेशंतंनमामिबृहस्पतिम् ॥ ५ ॥ हिमकुंदमृणा
लाभंदैत्यानांपरमंगुरुम् ॥ सर्वशास्त्रप्रवक्तारंभार्गवंप्रणमाम्यहम् ॥ ६ ॥ नीलांजनसमाभासंरविपुत्रं
यमाग्रजम् ॥ छायामार्तंडसंभूतंतंनमामिशनैश्चरम् ॥ ७ ॥ अर्धकायंमहावीर्यंचंद्रादित्यविमर्दनम् ॥
सिंहिकागर्भसंभूतंतंराहुंप्रणमाम्यहम् ॥ ८ ॥ पलाशपुष्पसंकाशंतारकाग्रहमस्तकम् ॥ रौद्रंरौद्रात्म
कंघोरंतंकेतुंप्रणमाम्यहम् ॥ ९ ॥ इतिव्यासमुखोद्गीतंयःपठेत्सुसमाहितः ॥ दिवावायदिवारात्रौवि
घ्नशांतिर्भविष्यति ॥ १० ॥ नरनारीनृपाणांचभवेद्दुःस्वप्ननाशनम् ॥ ऐश्वर्यमतुलंतेषामारोग्यंपुष्टिवर्ध
नम् ॥ ११ ॥ ग्रहनक्षत्रजाःपीडातस्कराग्निसमुद्भवाः ॥ ताःसर्वाःप्रशमंयांतिव्यासोब्रूतेनसंशयः ॥

॥ १२ ॥ ॥ इतिश्रीव्यासविरचितंआदित्यादिनवग्रहस्तोत्रंसंपूर्णम् ॥ ॥ श्रीसूर्यादिनवग्रहार्पणमस्तु ॥ ॥ इतिनवग्रहस्तोत्रंसमाप्तं ॥ ॥ शुभमस्तु ॥ ॥ श्रीरस्तु ॥ ॥ छ ॥ ॥ छ ॥

॥ ४९ ॥ ॥ अथ शनिस्तोत्र प्रारंभः

श्रीगणेशायनमः ॥ ॥ अस्यश्रीशनैश्चरस्तोत्रमंत्रस्य ॥ दशरथऋषिः ॥ शनैश्चरोदेवता ॥ त्रिष्टुप्छंदः ॥ शनैश्चरप्रीत्यर्थेजपेविनियोगः ॥ दशरथउवाच ॥ कोणोंतकोरौद्रयमोथबभ्रु :कृष्णःशनिःपिंगलमंदसौरिः ॥ नित्यंस्मृतोयोहरतेचपीडांतस्मैनमःश्रीरविनंदनाय ॥ १ ॥ सुरासुराः किंपुरुषागणेंद्रागंधर्वविद्याधरपन्नगाश्च ॥ पीड्यंतिसर्वेविषमस्थितेनतस्मैनमः श्रीरविनंदनाय ॥ २ ॥ नरानरेंद्राःपशवोमृगेंद्रावन्याश्चयेकीटपतंगभृंगाः ॥ पीड्यंतिसर्वेविषमस्थितेनतस्मै० ॥ ३ ॥ देशाश्चदुर्गाणिवनानियत्रसेनाविवेशाः पुरपत्तनानि ॥ पीड्यंतिसर्वेविषमस्थितेनतस्मै० ॥ ४ ॥ तिलैर्यवैर्माषगुडान्नदानैर्लोहेननीलांबरदानतोवा ॥ प्रीणातिमंत्रैर्निजवासरेचतस्मैनमः श्रीरविनंदनाय ॥ ५ ॥ प्रयागकूलेयमुनातटेचसरस्वतीपुण्यजलेगुहायां ॥ योयोगिनांध्यानगतोपिसूक्ष्मस्तस्मैनमः श्रीरविनंदनाय ॥ ६ ॥ अन्यप्रदेशात्स्वगृहंप्रविष्टस्त्वदीयवारेसनरःसुखीस्यात् ॥ गृहाद्गतोयोनपुनःप्रयातिस्तस्मै० ॥ ७ ॥ स्रष्टा

स्वयंभूर्भुवनत्रयस्यत्राताहरीशोहरतेपिनाकी ॥ एकस्त्रिधाऋग्यजुःसाममूर्तिस्तस्मैनमः श्रीरविनंदनाय ॥ ॥ ८ ॥ शन्यष्टकंयःप्रयतःप्रभातेनित्यंसपुत्रैः पशुबांधवैश्च ॥ पठेच्चसौख्यंभुविभोगयुक्तंप्राप्नोतिनिर्वाणपदंपरंते ॥ ९ ॥ कोणस्थः पिंगलोबभ्रुः कृष्णोरौद्रोंतकोयमः ॥ सौरिःशनैश्चरोमंदः पिप्पलादेनसंस्तुतः ॥ १० ॥ एतानिदशनामानिप्रातरुत्थाययः पठेत् ॥ शनैश्चरकृतापीडानकदाचिद्भविष्यति ॥ ११ ॥ इतिश्रीदशरथप्रोक्तंशनैश्चरस्तोत्रंसंपूर्णम् ॥ ॥ छ ॥ ॥ छ ॥

॥ ४६ ॥ ॥ अथ ज्वरस्तोत्र प्रारंभः ॥

श्रीगणेशायनमः ॥ ॥ विद्राविते भूतगणेज्वरस्तुत्रिशिरास्त्रिपात् ॥ अभ्यपद्यतदाशार्हदहन्निवदिशोदश ॥ अथनारायणोदेवस्तंदृष्ट्वाव्यसृजज्ज्वरं ॥ १ ॥ माहेश्वरोवैष्णवश्चयुयुधातेज्वराबुभौ ॥ माहेश्वरःसमाक्रंदन्वैष्णवेनबलार्दितः ॥ २ ॥ अलब्ध्वाभयमन्यत्रभीतोमाहेश्वरोज्वरः ॥ शरणार्थीहृषीकेशंतुष्टावप्रयतांजलिः ॥ ३ ॥ ज्वरउवाच ॥ नमामित्वानंतशक्तिंपरेशंसर्वात्मानंकेवलंज्ञप्तिमात्रं ॥ विश्वोत्पत्तिस्थानसंरोधहेतुंयत्तद्ब्रह्मब्रह्मलिंगंप्रशांतं ॥ ४ ॥ कालोदैवंकर्मजीवः स्वभावोद्रव्यंक्षेत्रंप्राणआत्माविकारः ॥ तत्संघातोबीजरोहप्रवाहस्त्वन्मायैषातन्निषेधंप्रपद्ये ॥ ५ ॥ नानाभावैर्लीलयैवोपप

नैर्देवान्साधून्लोकसेतून्बिभर्षि ॥ हंस्युन्मार्गान्हिंसयावर्तमानान्जन्मैतत्तेभारहारायभूमेः ॥ ६ ॥ त
तोहंतेतेजसादुःसहेनशांतोग्रेणात्युल्बणेनज्वरेण ॥ तावत्तापोदेहिनांतेंघ्रिमूलंनोसेवेरन्यावदाशानुबद्धाः
॥ ७ ॥ ॥ श्रीभगवानुवाच ॥ ॥ त्रिशिरस्तेप्रसन्नोस्मिव्येतुतेमज्ज्वराद्भयम् ॥ योनौस्म
रतिसंवादंतस्यत्वन्नभवेद्भयम् ॥ ८ ॥ इत्युक्तोच्युतमानम्यगतोमाहेश्वरोज्वरः ॥ वाणस्तुरथमारूढः
प्रागाद्योत्स्यन्जनार्दनम् ॥ ९ ॥ ॥ इतिश्रीमद्भागवतेमहापुराणेदशमस्कंधेमाहेश्वरज्वरकृतश्रीकृ
ष्णस्तोत्रंसंपूर्णम् ॥ ॥ इतिज्वरस्तोत्रंसंपूर्ण ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ ४७ ॥ ॥ अथ शिवपार्थिवपूजा प्रारंभः ॥

श्रीगणेशायनमः ॥ ॥ अथलिंगार्चनचंद्रिकायांशिवपार्थिवपूजाविधिः तत्रादौकृतावश्यकक्रियः
स्नानादिनाशुचिर्भूत्वाधृतत्रिपुंड्ररुद्राक्षमालः प्रयतः शुक्लवस्त्रंपरिधायउदीचींदिशंगत्वाशुचौदेशेपाषाण
कीटकेशास्थिवालुकादिदोषरहितांमृदंदृष्ट्वातत्रगंधाद्युपचारैः भूमिंसंपूज्यनत्वाईशानकोणगतांमृदंश
स्त्रेणोत्कीर्यअष्टांगुलमृदमपाकृष्य भूमिंप्रार्थयेत् उत्धृतासिवराहेणकृष्णेनशतबाहुना मृत्तिकेत्वांचगृ
ह्णामिप्रजयाचधनेनच इतिमंत्रेणशुद्धांमृदमादायअंत्यजादिस्पर्शरहितोमौनीगृहमागत्य शुचिस्थलेतां

मूर्दंस्थापयेत् आचम्य चैलाजिनकुशोत्तरेआसनेउदङ्मुखउपविशेत् आसनविधिंकृत्वा गौरस
र्षपान्चतुर्दिक्षुविकिरेत् श्रीमन्महागणाधिपतयेनमः लक्ष्मीनारायणाभ्यां० उमामहेश्वराभ्यां० श
चीपुरंदराभ्यां० इष्टदेवताभ्यो० कुलदेवताभ्यां० ग्रामदेवताभ्यो० स्थानदेवताभ्यो० वास्तुदेवताभ्यो०
आदित्यादिनवग्रहदेवताभ्यो० सेर्वेभ्योदेवेभ्यो० सर्वेभ्योब्राह्मणेभ्यो० अविघ्नमस्तु सुमुखश्चैकदंतश्चकपि
लोगजकर्णकः लंबोदरश्चविकटोविघ्ननाशोगणाधिपः धूम्रकेतुर्गणाध्यक्षोभालचंद्रोगजाननः द्वादशैता
निनामानियःपठेच्छृणुयादपि विद्यारंभेविवाहेचप्रवेशेनिर्गमेतथा संग्रामेसंकटेचैवविघ्नस्तस्यनजायते
शुक्लांबरधरंदेवंशशिवर्णंचतुर्भुजं प्रसन्नवदनंध्यायेत्सर्वविघ्नोपशांतये सर्वमंगलमांगल्येशिवेसर्वार्थसा
धिके शरण्येत्र्यंबकेगौरिनारायणिनमोस्तुते विनायकंगुरुंभानुंब्रह्मविष्णुमहेश्वरान् सरस्वतींप्रणम्यादौस
र्वकार्यार्थसिद्धये अभीप्सितार्थसिद्ध्यर्थंपूजितायःसुरासुरैः सर्वविघ्नहरस्तस्मैगणाधिपतयेनमः सर्वेष्वारं
भकार्येषुत्रयस्त्रिभुवनेश्वराः देवादिशंतुनः सिद्धिंब्रह्मेशानजनार्दनाः तदेवलग्नंसुदिनंतदेवताराबलंचंद्रब
लंतदेव विद्याबलंदैवबलंतदेवलक्ष्मीपतेतेंघ्रियुगंस्मरामि लाभस्तेषांजयस्तेषांकुतस्तेषांपराजयः येषामिं
दीवरश्यामोहृदयस्थोजनार्दनः अद्यशुभाभ्यांशुभेशोभनेमुहूर्तेश्रीश्वेतवाराहकल्पेवैवस्वतमन्वंतरेअष्टा
विंशेयुगचतुष्केकलियुगेप्रथमचरणेजंबुद्वीपेभरतवर्षेभरतखंडेबौद्धावतारेदंडकारण्येदेशेशालीवाहनश

केसंध्यावर्तमानेगोदावर्याः दक्षिणेतीरेअमुकसंवत्सरेअयनमासपक्षतिथिवारनक्षत्रयोगकरणेअमुकराशि
स्थितचंद्रसूर्यगुरुषुशेषेषुग्रहेषुयथायथंराशिस्थानस्थितेषुसत्सुशुभनामयोगेएवंगुणविशिष्टायांपुण्यतिथौ
ममसकलमनोरथसिद्धिदुरितक्षयद्वाराश्रीभवानीशंकरप्रीत्यर्थेशिवपार्थिवपूजनंकरिष्ये त ० क ० घं ० शं ०
दी ० पू ० कलशोदकेनपूजासंभारानात्मानंचप्रोक्ष्यहरायनमःमृत्पूर्णंकुर्यात् वामदेवाय ० जलसेचनं महेश्व
राय ० संघट्टनं तत्पुरुषाय ० पिंडीकरणंसमस्ताघनाशनेतिअभ्यपूतेवामपाणौवेदिकायांताम्रपात्रेवाबिल्व
पत्रंनिधायतदुपरिसाक्षतपुष्पंलिंगंसंस्थाप्यप्राणप्रतिष्ठांकुर्यात् अस्यश्रीप्राणप्रतिष्ठामंत्रस्यब्रह्मविष्णुरुद्रा
ऋषयः प्राणाख्यादेवताः पार्थिवलिंगप्राणप्रतिष्ठापनेविनियोगः शिवस्यप्राणाःवाक्चक्षुश्रोत्रजिह्वाघ्राणत्व
क्पाणिपादपायूपस्थानिसर्वेंद्रियाणिइहागत्यसुखंचिरंतिष्ठंतु शिवेहागच्छेहतिष्ठममपूजांगृहाण स्वा
मिन्सर्वजगन्नाथयावत्पूजावसानकं तावत्त्वंप्रीतिभावेनलिंगेस्मिन्सन्निधोभव इतिसंप्रार्थ्य मूलमं
त्रेणषडंगंन्यासंकुर्यात् ध्यानं दक्षोत्संगानिषण्णकुंजरमुखंप्रेम्णाकरेणस्पृशन्वामांकेस्थितवल्लभांकल
लितंस्कंदंकरेणस्पृशन् इष्टाभीतिमनोहरंकरयुगंबिभ्रत्प्रसन्नाननोभूयान्नःशरदिंदुसुंदरतनुःश्रेयस्करःशं
करः आत्मानंरुद्ररूपंध्यात्वा ध्यानंसमर्पयामि शूलपाणयेनमः आवाहनं ० पिनाकधृषे ० आसनं ० भवो
द्भवाय ० अर्घ्यं ० वामदेवाय ० आचमनीयं ० ज्येष्ठाय ० मधुपर्कस्ना ० ईश्वराय ० पयस्ना ० शिवाय ० दधिस्ना ०

गिरीशा ॰ घृतस्ना ॰ उमाधवाय ॰ मधुस्ना ॰ शिवाय ॰ शर्करास्ना ॰ महेश्वराय ॰ अभिषेकं ॰ श्रेष्ठाय ॰ वस्त्रं ॰ रुद्राय ॰ उपवीतं ॰ कालाय ॰ चंदनं ॰ कलविकरणाय ॰ अक्षता ॰ बलविकरणाय ॰ पुष्पं ॰ बिल्वं ॰ बलाय ॰ धूपं ॰ बलप्रमथना ॰ दीपं ॰ सर्वभूतदमनाय ॰ नैवेद्यं ॰ मनोन्मनाय ॰ आचमनीयं ॰ मध्येपानी ॰ उत्तरापोशनं शंभवे ॰ तांबूलंदक्षि ॰ शंकराय ॰ फलं ॰ प्रदक्षिणां ॰ उत्तरनीराजनं ॰ भवानीशंकराय ॰ मंत्रपुष्पांजलिं ॰ शंभवे ॰ नमस्कारान् ॰ यस्यस्मृत्येति ॰ अनेनकृतपार्थिवलिंगपूजनेनश्रीभवानीशंकरःप्रीयताम् ॥ ॥ शुभंभवतु ॥ ॥ इति शिवपार्थिवपूजा समाप्ता ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ ४८ ॥ ॥ अथ सकलकर्मोपयोगी पुण्याहवाचन प्रारंभः ॥

॥ श्रीगणेशायनमः ॥ ॥ अथपुण्याहवाचनप्रयोगः ॥ यजमानःकृतमंगलस्नानःकृताचमनःप्राङ्मुखःवस्त्राच्छादितेपीठेउपविश्य ॥ पत्नींस्वदक्षिणतउपविश्य ॥ प्राणानायम्य ॥ श्रीमन्महागणाधिपतयेनमः ॥ अविघ्नमस्तु ॥ ॥ सुमुखश्चेत्यादि श्रीपरमेश्वरप्रीत्यर्थंअमुककर्मांगभूतंअद्यगणपतिपूजनपूर्वकंस्वस्तिपुण्याहवाचनंमातृकापूजनंनांदीश्राद्धंग्रहयज्ञंमंडपप्रतिष्ठांकुलदेवतास्थापनंआचार्यवरणंचकरिष्ये ॥ गणानांत्वाशौनकोगृत्समदोगणपतिर्जगती ॥ गणपत्या॰ ॥ ॐ गणानांत्वागणपतिं

हवामहेकविंकवीनामुपमश्रवस्तमं ॥ ज्येष्ठराजंब्रह्मणांब्रह्मणस्पतआनः शृण्वन्नूतिभिःसीदसादनं ॥ ॐ भूर्भुवःस्वःऋद्धिबुद्धिसहितंमहागणपतिंसांगंसपरिवारंसायुधंसशक्तिकंअस्मिन्पूगीफले आ० ॐ भूर्भुवः स्वः महागणपतयेनमः ध्यायामि ॥ एवंषोडशोपचारैःपूजयेत् ॥ ॐ निषुसीदगणपतेगणेषुत्वामाहुर्विप्रतमंकवीनां ॥ नऋतेत्वत्क्रियतेकिंचनारेमहामर्कंमघवंचित्रमर्च ॥ ॐ भूर्भुवःस्वःमहागणपतये० ॥ दूर्वांकुरान्स० ॥ वक्रतुंडमहाकायसूर्यकोटिसमप्रभ ॥ निर्विघ्नंकुरुमेदेवसर्वकार्येषुसर्वदा ॥ अनयाविघ्नेश्वरपूजयाविघ्नहर्तामहागणपतिःप्रीयतां ॥ महागणपतयेनमः ॥ ॐ महीद्यौःपृथिवीचनइमंयज्ञंमिमिक्षतां ॥ पिपृतांनोभरीमभिः ॥ ॐ ओषधयःसंवदंतेसोमेनसहराज्ञा ॥ यस्मैकृणोतिब्राह्मणस्तंराजन्पारयामसि ॥ ओषधीः ॥ ॐ आकलशेषुधावतिपवित्रेपरिषिच्यते ॥ उक्थैर्यज्ञेषुवर्धते ॥ ॐ इमंमेगंगेयमुनेसरस्वतिशुतुद्रिस्तोमंसचतापरुष्ण्या ॥ असिक्न्यामरुद्वृधेवितस्तयार्जीकीयेशृणुह्यासुषोमया ॥ उदकं ॥ गंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीं ॥ ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियं ॥ गंधं ॥ कांडात्कांडात्प्ररोहंतिपरुषःपरुषःपरि ॥ एवानोदूर्वेप्रतनुसहस्रेणश

तेनेच ॥ दूर्वा ॥ अश्वत्थेवोनिषदनंपर्णेवोवसतिष्कृता ॥ गोभाजइत्किलासथयत्सनवथपूरुषं ॥ प
ह्लवान् ॥ याःफलिनीर्याअफलाऽअपुष्पायाश्चपुष्पिणीः ॥ बृहस्पतिप्रसूतास्तानोमुंचंत्वंहसः ॥फलं ॥ स
हिरत्नानिदाशुषेसुवातिसविताभर्गः ॥तंभागंचित्रमीमहे ॥ हिरण्यं॥ ॐहिरण्यरूपःसहिरण्यसंदृगपांनपा
त्सेदुहिरण्यवर्णः ॥ हिरण्ययात्परियोनेर्निषद्याहिरण्यदाददत्यंनमस्मै ॥ हिरण्यं ॥ ॐयुवासुवासाःपरिवीत
आगात्सउश्रेयान्भवतिजायमानः ॥ तंधीरासःकवयउन्नयंतिस्वाध्यो३मनसादेवयंतः ॥ पूर्णादर्विपरा
पतसुपूर्णापुनरापत ॥ वस्नेवविक्रीणावहाइषमूर्जंशतक्रतो ॥ पूर्णपात्रं ॥ तत्वायामिःशुनःशेपोवरुण
स्त्रिष्टुप् ॥ उत्तरकलशेवरुणावा० ॥ ॐतत्त्वायामिब्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिः ॥ अहेळ
मानोवरुणेहबोध्युरुशंसमानआयुःप्रमोषीः॥ ॐभूर्भुवःस्वःवरुणंसांगंसपरिवारंआवा०॥ ॐ भूर्भुवःस्वः॥
वरुणाय० ॥ विलेप० चंदनंस० पंचोपचारैःपूजयेत् ॥ तत्वायामि० ॥ ॐ भूर्भुवःस्वःवरुणाय० मंत्र
पुष्पंस० ॥ कलशस्यमुखेविष्णुःकंठेरुद्रःसमाश्रितः ॥ मूलेतत्रस्थितोब्रह्मामध्येमातृगणाःश्रिताः ॥
कुक्षौतुसागराःसर्वेसप्तद्वीपावसुंधरा ॥ ऋग्वेदोथयजुर्वेदःसामवेदोह्यथर्वणः ॥ अंगैश्चसहिताःसर्वेकल

शांतुसमाश्रिताः ॥ अत्रगायत्रीसावित्रीशांतिःपुष्टिकरीतथा ॥ आयांतुममशांत्यर्थंदुरितक्षयकारकाः ॥
सर्वेसमुद्राःसरितस्तीर्थानिजलदानदाः ॥ आयांतुममशांत्यर्थं० ॥ ततःउत्तरकलशेअक्षतान्क्षिपेत् ॥
मातृदेवोभव ॥ पितृदेवोभव ॥ आचार्यदेवोभव ॥ अतिथिदेवोभव ॥ सर्वेभ्योब्राह्मणेभ्योनमोनमः ॥
अवनिकृतजानुमंडलःकमलमुकुलसदृशमंजलिंशिरस्याधायदक्षिणेनपाणिनासुवर्णपूर्णकलशंधारयित्वा
॥ आशिषःप्रार्थयंते प्रार्थनामाह ॥ एताःसत्याआशिषःसंतु ॥ दीर्घानागानद्योगिरयस्त्रीणिविष्णुपदा
निचतेनायुःप्रमाणेनपुण्याहंदीर्घमायुरस्तु ॥ इतित्रिः ॥ शिवाआपःसंतु ॥ संतुशिवाऽआपः ॥ गंधाः
पांतुसुमंगल्यंचास्त्विति भवंतोब्रुवंतु ॥ गंधाःपांतुसुमंगल्यंचास्तु ॥ अक्षताःपांतुआयुष्यमस्त्वितिभवंतो
ब्रुवंतु ॥ अक्षताःपांतुआयुष्यमस्तु ॥ पुष्पाणिपांतुसौश्रियमस्त्वितिभवंतोब्रुवंतु ॥ पुष्पाणिपांतुसौश्रि
यमस्तु ॥ तांबूलानिपांतुऐश्वर्यमस्त्वितिभवंतोब्रुवंतु ॥ तांबूलानिपांतुऐश्वर्यमस्तु ॥ दक्षिणाःपांतु
वहुदेयंचास्त्वितिभवंतोब्रुवंतु ॥ दक्षिणाःपांतुवहुदेयंचास्तु ॥ दीर्घमायुःश्रेयःशांतिःपुष्टिस्तुष्टिश्चास्त्व
तिभवंतोब्रुवंतु ॥ दीर्घमायुःश्रेयःशांतिःपुष्टिस्तुष्टिश्चास्तु ॥ श्रीर्यशोविद्याविनयोवहुवित्तंचायुष्यंचास्तु ॥
यंकृत्वासर्ववेदयज्ञक्रियाकरणकर्मारंभाःशुभाःशोभनाःप्रवर्तंते ॥ तमहमोंकारमादिंकृत्वाऋग्यजुःसामा
शीर्वचनंबहुऋषिसंमतंसंविज्ञातंभवद्भिरनुज्ञातःपुण्यंपुण्याहंवाचयिष्ये ॥ वाच्यतां ॥ ॐ भद्रंकर्णेभिःशृ

णुयामदेवाभद्रंपश्येमाक्षभिर्यजत्राः ॥ स्थिरैरंगैस्तुष्टुवांसस्तनूभिर्व्यशेमदेवहितंयदायुः ॥ द्रविणोदाद्र
विणसस्तुरस्यद्रविणोदाःसनरस्यप्रयंसत् ॥ द्रविणोदावीरवतीमिषंनोद्रविणोदारासतेदीर्घमायुः ॥ सवि
तापश्चातात्सवितापुरस्तात्सवितोत्तरात्तात्सविताधरात्तात् ॥ सवितानःसुवतुसर्वतातिंसवितानोरासतां
दीर्घमायुः ॥ नवोनवोभवतिजायमानोन्हांकेतुरुषसामेत्यग्रं ॥ भागंदेवेभ्योविदधात्यायन्प्रचंद्रमास्ति
रतेदीर्घमायुः ॥ उच्चादिविदक्षिणावंतोअस्थुर्येअश्वदाःसहतेसूर्येण ॥ हिरण्यदाअमृतत्वंभजंतेवासोदाः
सोमप्रतिरंतआयुः ॥ आपउंदंतुजीवसेदीर्घायुत्वायवर्चसे ॥ यस्त्वाहृदाकीरिणामन्यमानोमर्त्यंमर्त्यो
जोहवीमि ॥ जातवेदोयशोअस्मासुधेहिप्रजाभिरग्नेअमृतत्वमश्यां ॥ यस्मैत्वंसुकृतेजातवेदउलोकमग्ने
कृणवःस्योनं ॥ अश्विनंसपुत्रिणंवीरवंतंगोमंतंरयिंनशस्तेस्वस्ति ॥ संत्वासिंचामियजुषाप्रजामायुर्धनं
च ॥ व्रतनियमतपस्वाध्यायक्रतुदमदानविशिष्टानांब्राह्मणानांमनःसमाधीयतां ॥ समाहितमनसःस्मः
प्रसीदंतुभवंतः ॥ प्रसन्नाःस्मः ॥ शांतिरस्तु ॥ पुष्टिरस्तु ॥ तुष्टिरस्तु ॥ वृद्धिरस्तु ॥ अविघ्नमस्तु ॥
आयुष्यमस्तु ॥ आरोग्यमस्तु ॥ शिवंकर्मास्तु ॥ कर्मसमृद्धिरस्तु ॥ धर्मसमृद्धिरस्तु ॥ वेदसमृद्धिर

स्तु ॥ शास्त्रसमृद्धिरस्तु ॥ पुत्रसमृद्धिरस्तु ॥ धनधान्यसमृद्धिरस्तु ॥ इष्टसंपदस्तु ॥ बहिर्देशेअरिष्ट
निरसनमस्तु ॥ यत्पापंतत्प्रतिहतमस्तु ॥ येत्श्रेयस्तदस्तु ॥ उत्तरेकर्मण्यविघ्नमस्तु ॥ उत्तरोत्तरम
हरहरभिवृद्धिरस्तु ॥ उत्तरोत्तराःक्रियाःशुभाःशोभनाःसंपद्यंतांइष्टाःकामाःसंपद्यंतां ॥ तिथिकरणमुहू
र्तनक्षत्रसंपदस्तु ॥ तिथिकरणमुहूर्तनक्षत्रग्रहलग्नाधिदेवताःप्रीयंतां ॥ तिथिकरणेमुहूर्तेनक्षत्रेसग्रहेसदै
वतेप्रीयेतां ॥ दुर्गापांचाल्यौप्रीयेतां ॥ अग्निपुरोगाविश्वेदेवाःप्रीयंतां ॥ इंद्रपुरोगामरुद्गणाःप्रीयंतां ॥
ब्रह्मपुरोगाःसर्वेवेदाःप्रीयंतां ॥ विष्णुपुरोगाःसर्वेदेवाःप्रीयंतां ॥ माहेश्वरीपुरोगाउमामातरःप्रीयंतां ॥
वसिष्ठपुरोगाऋषिगणाःप्रीयंतां ॥ अरुंधतीपुरोगाएकपत्न्यःप्रीयंतां ॥ ऋषयश्छंदांस्याचार्यावेदादेवा
यज्ञाश्चप्रीयंतां ॥ ब्रह्मचब्राह्मणाश्चप्रीयंतां ॥ श्रीसरस्वत्यौप्रीयेतां ॥ श्रद्धामेधेप्रीयेतां ॥ भगवतीका
त्यायनीप्रीयतां ॥ भगवतीमाहेश्वरीप्रीयतां ॥ भगवतीपुष्टिकरीप्रीयतां ॥ भगवतीतुष्टिकरीप्रीयतां ॥
भगवतीऋद्धिकरीप्रीयतां ॥ भगवतीवृद्धिकरीप्रीयतां ॥ भगवंतौविघ्नविनायकौप्रीयेतां ॥ भगवान्
स्वामीमहासेनःसपत्नीकःससुतःसपार्षदःसर्वस्थानगतःप्रीयतां ॥ हरिहरहिरण्यगर्भाःप्रीयंतां ॥ सर्वा
ग्रामदेवताःप्रीयंतां ॥ सर्वाःकुलदेवताःप्रीयंतां ॥ बहिरपः ॥ हताब्रह्मद्विषः ॥ हताःपरिपंथिनः ॥ ह
ताअस्यकर्मणोविघ्नकर्तारः ॥ शत्रवःपराभवंयांतु ॥ शाम्यंतुघोराणि ॥ शाम्यंतुपापानि ॥ शाम्यंत्वी

तयः ॥ शुभानिवर्धंतां ॥ शिवाआपःसंतु ॥ शिवाऋतवःसंतु ॥ शिवाअग्नयःसंतु ॥ शिवाआहुतयः संतु ॥ शिवाओषधयःसंतु ॥ शिवावनस्पतयःसंतु ॥ शिवाअतिथयःसंतु ॥ अहोरात्रेशिवेस्यातां ॥ निकामेनिकामेनपर्जन्योवर्षतु ॥ फलिन्योनओषधयःपच्यंतां ॥ योगक्षेमोनःकल्पतां ॥ शुक्रांगारकबुधबृहस्पतिशनैश्चरराहुकेतुसोमसहिताआदित्यपुरोगाःसर्वेग्रहाःप्रीयंतां ॥ भगवान्नारायणःप्रीयतां ॥ भगवान्पर्जन्यःप्रीयतां ॥ भगवान्स्वामीमहासेनःप्रीयतांपुण्याहकालान्वाचयिष्ये ॥ वाच्यतां ॥ ॐ उद्गातेवशकुनेसामगायसिब्रह्मपुत्रइवसवनेषुशंससि ॥ वृषेववाजीशिशुमतीरपीत्यासर्वतोनःशकुनेभद्रमावदविश्वतोनःशकुनेपुण्यमावद ॥ याज्यया॰संस्कुरुते ॥ यत्पुण्यंनक्षत्रंतद्बट्कुर्वीतोपव्युषं ॥ यदावैसूर्यउदेति ॥ अथनक्षत्रंनैति ॥ यावतितत्रसूर्योगच्छेत् ॥ यत्रजघन्यंपश्येत् ॥ तावत्कुर्वीतयत्कारीस्यात् ॥ पुण्याहएवकुरुते ॥ तानिवाएतानि ॥ यमनक्षत्राणि ॥ यान्येवदेवनक्षत्राणि ॥ तेषुकुर्वीतयत्कारीस्यात् ॥ पुण्याहएवकुरुते ॥ मह्यंसहकुटुंबिनेमहाजनान्नमस्कुर्वाणायआशीर्वचनमपेक्षमाणायअद्यकरिष्यमाणअमुककर्माख्यस्यकर्मणःपुण्याहंभवंतोब्रुवंतु ॥ ॐ पुण्याहं ॥ इतित्रिः ॥ ॐ स्वस्तयेवायुमुपब्रवामहैसोमंस्वस्तिभुवनस्ययस्पतिः ॥ बृहस्पतिंसर्वगणंस्वस्तयेस्वस्तयआदित्यासोभवंतुनः ॥

आदित्यउदयनीयः पथ्ययैवेतः स्वस्त्याप्रयंतिपथ्यांस्वस्तिमभ्युद्यंतिस्वस्त्यैवेतः प्रयंतिस्वस्त्युद्यंतिस्वस्त्युद्यंति ॥ ॐ स्वस्तिनइंद्रोवृद्धश्रवाः ॥ स्वस्तिनःपूषाविश्ववेदाः ॥ स्वस्तिनस्तार्क्ष्योअरिष्टनेमिः ॥ स्वस्तिनोबृहस्पतिर्दधातु ॥ अष्टौदेवावसवःसोम्यासः ॥ चतस्रोदेवीरजराश्रविष्ठाः ॥ तेयज्ञंपांतुरजसःपुरस्तात् ॥ संवत्सरीणममृतंस्वस्तिमह्यं ० ॥ अमुककर्माख्यायकर्मणेस्वस्तिभवंतोब्रुवंतु ॥ आयुष्मतेस्वस्ति ॥ इतित्रिवारं ॥ ऋध्यामस्तोमंसनुयामवाजमानोमंत्रंसरथेहोपयातं ॥ यशोनपक्वंमधुगोष्वंतराभूतांशोअश्विनोःकाममप्राः ॥ सर्वामृद्धिमृध्नुयामितितंवैतेजसैवपुरस्तात्पर्यभवच्छंदोभिर्मध्यतोक्षरैरुपरिष्टाद्गायत्र्यासर्वतोद्वादशाहंपरिभूयसर्वामृद्धिमार्ध्नोत्सर्वामृद्धिमृध्नोतियएवंवेद ॥ ऋध्यास्महव्यैर्नमसोपसद्य ॥ मित्रंदेवंमित्रधेयंनोअस्तु ॥ अनूराधान्हविषावर्धयंतः ॥ शतंजीवेमशरदःसवीराः ॥ त्रीणित्रीणिवैदेवानामृद्धानि ॥ त्रीणिच्छंदांसित्रीणिसवनानि ॥ त्रयइमेलोकाः ॥ ऋध्यामेवतद्वीर्यएषुलोकेषुप्रतितिष्ठति ॥ मह्यं ० अमुककर्माख्यस्यकर्मणः ॥ ऋद्धिंभवंतोब्रुवंतु ॥ कर्मऋध्यतां ॥ ऋद्धिःसमृद्धिः ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥ ॥ ७ ॥

श्रियेजातः श्रियआनिरियायश्रियंवयोजरितृभ्योदधाति ॥ श्रियंवसानाअमृतत्वमायन्भवंतिसत्यासमिधामितद्रौ ॥ श्रियएवैनंतच्छ्रियामादधातिसंततमृचावषट्कृत्यंसंतत्यैसंधीयतेप्रजयापशुभिर्यएवंवेद ॥ याज्ययायजतिप्रत्तिर्वैयाज्यापुण्यैवलक्ष्मीःपुण्यामेवतल्लक्ष्मींसंभावयतिपुण्याल्लक्ष्मींसंस्कुरुते ॥ यस्मिन्ब्रह्माभ्यजयत्सर्वमेतत् ॥ अमुंचलोकमिदमुंचसर्वं ॥ तंनोनक्षत्रमभिजिद्विजित्यं ॥ श्रियंदधात्वहृणीयमानं ॥ अहेर्बुध्नियमंत्रंमेगोपाय ॥ यमृषयस्त्रयिविदाविदुः ॥ ऋचःसामानियजूंषि ॥ साहिश्रीरमृतासतां ॥ मह्यंसहकुटुंबिनेमहाजनान्नमस्कुर्वाणायआशीर्वचनमपेक्षमाणाय० श्रीरस्त्वितिभवंतोब्रुवंतु ॥ अस्तुश्रीः ॥ इतित्रिवारं ॥ वर्षशतंसंपूर्णमस्तु ॥ गोत्राभिवृद्धिरस्तु ॥ कर्मांगदेवताःप्रीयंतां ॥ १ ॥ ॐ शुक्रेभिरंगैरजआततन्वान्क्रतुंपुनानःकविभिःपवित्रैः ॥ शोचिर्वसानःपर्यायुरपांश्रियोमिमीतेबृहतीरनूनाः ॥ तदप्येष० ततःउत्तरकलशंदक्षिणहस्तेदक्षिणकलशंवामहस्तेगृहीत्वाताभ्यांधाराद्वयंसंततंपात्रेनिषिंचेदेभिर्मंत्रैः ॥ ॐ वास्तोष्पतेप्रतिजानीह्यस्मान्त्स्वावेशोअनमीवोभवानः ॥ यत्त्वेमहेप्रतितंनोजुषस्वशंनोभवद्विपदेशंचतुष्पदे ॥ वास्तोष्पतेप्रतरणोनएधिगयस्फानोगोभिरश्वेभिरिंदो ॥ अजरासस्तेसख्येस्यामपितेवपुत्रान्प्रतिनोजुषस्व ॥ वास्तोष्पतेशग्मयासंसदातेसक्षीमहिरण्वयागातुमत्या ॥

पाहिक्षेमउतयोगेवरंनोयूयंपातःस्वस्तिभिःसदानः ॥ अमीवहावास्तोष्पतेविश्वारूपाण्याविशन् ॥ सखा
सुशेवएधिनः ॥ शिवंशिवंशिवं ॥ अभिषेकेपत्नीवामतः ॥ समुद्रज्येष्ठाइतिचतसृणांवसिष्ठआपस्त्रि
ष्टुप् ॥ अभि० ॥ ॐसमुद्रज्येष्ठाःसलिलस्यमध्यात्पुनानायंत्यनिविशमानाः ॥ इंद्रोयावज्रीवृषभोर
रादताआपोदेवीरिहमामवंतु ॥ याआपोदिव्याउतवास्रवंतिखनित्रिमाउतवायाःस्वयंजाः ॥ समुद्रार्था
याःशुचयःपावकास्ताआपोदेवीरिहमामवंतु ॥ यासांराजावरुणोयातिमध्येसत्यानृतेअवपश्यंजनानां ॥
मधुःश्चुतःशुचयोयाःपावकास्ता० ॥ यासुराजावरुणोयासुसोमोविश्वेदेवायासूर्जंमदंति ॥ वैश्वानरोयाः
स्वग्निःप्रविष्टस्ता० ॥ ॐ त्रायंतामिहदेवास्त्रायंतांमरुतांगणः ॥ त्रायंतांविश्वाभूतानियथायमरपाअस
त् ॥ आपइद्वाउभेषजीरापोअमीवचातनीः ॥ आपःसर्वस्यभेषजीस्तास्तेकृण्वंतुभेषजं ॥ हस्ताभ्यांद
शशाखाभ्यांजिव्हावाचःपुरोगवी ॥ अनामयित्नुभ्यांत्वाताभ्यांत्वोपस्पृशामसि ॐ इमाआपःशिवत
माइमाःसर्वस्यभे षजीः ॥ इमाराष्ट्रस्यवर्धनीरिमाराष्ट्रभृतोमृताः ॥ याभिरिंद्रमभ्यषिंचत्प्रजापतिःसोमंरा
जानंवरुणंयमंमनुं ॥ ताभिरद्भिरभिषिंचामित्वामहंराज्ञांत्वमधिराजोभवेह ॥ महांतंत्वामहीनांसम्राजंचर्ष

णीनांदेवीजानिभ्यजीजनद्रुद्राजानिभ्यजीजनद्देवस्य ० अमृताभिषेकोस्तु ॥ शांतिःपुष्टिस्तुष्टिश्चास्तु ॥ ॐ
स्वस्त्ययनंतार्क्ष्यमरिष्टनेमिंमहद्भूतंवाजसंदेवतानां ॥ असुरघ्नमिंद्रसखंसमत्सुबृहद्यशोनावमिवारुहेम ॥
अंहोमुचमांगिरसंगयंचस्वस्त्यात्रेयंमनसाचतार्क्ष्यं ॥ प्रयतपाणिःशरणंप्रपद्येस्वस्तिसंबाधेष्वभयंनोअ
स्तु ॥ पुण्याहवाचनफलसमृद्धिरस्त्वितिभवंतोब्रुवंतु ॥ पुण्याहवाचनफलसमृद्धिरस्तु ॥ सुरास्त्वाम
भिषिंचंतुब्रह्मविष्णुमहेश्वराः ॥ वासुदेवोजगन्नाथस्तथासंकर्षणोविभुः ॥ प्रद्युम्नश्चानिरुद्धश्चभवंतुवि
जयायते ॥ आखंडलोग्निर्भगवान्यमोवैनिर्ऋतिस्तथा ॥ वरुणःपवनश्चैवधनाध्यक्षस्तथाशिवः ॥ ब्रह्म
णासहिताःसर्वेदिक्पालाःपांतुतेसदा ॥ कीर्तिर्लक्ष्मीधृतिर्मेधापुष्टिश्रद्धाक्रियामतिः ॥ बुद्धिर्लज्जाव
पुःशांतिःक्षांतिस्तुष्टिश्चमातरः ॥ एतात्वामभिषिंचंतुदेवपत्न्यःसमागताः ॥ आदित्यश्चंद्रमाभौमोबुध
जीवसितार्कजाः ॥ ग्रहास्त्वामभिषिंचंतुराहुकेतुश्चतर्पिताः ॥ देवदानवगंधर्वायक्षराक्षसपन्नगाः ॥
ऋषयोमुनयोगावोदेवमातरएवच ॥ देवपत्न्योद्रुमानागादैत्याश्चाप्सरसांगणाः अस्त्राणिसर्व
शस्त्राणिराजानोवाहनानिच ॥ औषधानिचरत्नानिकालस्यावयवाश्चये ॥ सरितःसागराःशैलास्ती
र्थानिजलदानदाः ॥ एतेत्वामभिषिंचंतुसर्वकामार्थसिद्धये ॥ ८ ॥ इतिपुराणमंत्राः ॥ पुण्याहवाचनं

समाप्तं ॥ ॥ अथमातृकापूजनं ॥ गौरीपद्माशचीमेधासावित्रीविजयाजया ॥ देवसेनास्व
धास्वाहामातरोलोकमातरः ॥ १ ॥ धृतिःपुष्टिस्तथातुष्टिरात्मनःकुलदेवता ॥ ब्राह्मीमाहेश्वरीचैवकौ
मारीवैष्णवीतथा ॥ वाराहीचतथेंद्राणीचामुंडाःसप्तमातरः ॥ गौर्यादिषोडशमातरः ॥ ब्राम्ह्यादिसप्त
मातरः ॥ गणपतिंदुर्गांक्षेत्रपालंचएष्वक्षतपुंजेष्वावाहयामि ॥ तदस्तु० ॥ गृहावै० प्रतिष्ठाप्रतिष्ठा ॥
भूर्भुवःस्वःगौर्याद्यावाहितदेवताभ्यो०सुप्रतिष्ठितमस्तु ॥ भूर्भुवःस्वः ॥ गौर्याद्यावाहितदेवताभ्यो०षोड
शोपचारैःपूजयेत् ॥ ॐ गौरीर्मिमायसलिलानितक्षत्येकपदीद्विपदीसाचतुष्पदी ॥ अष्टापदीनवपदी
बभूवुषीसहस्राक्षरापरमेव्योमन् ॥ भूर्भुवःस्वःगौर्याद्यावाहितदेवताभ्योनमः ॥ मंत्रपुष्पं ॥ ॥ अनेन
षोडशोपचारैःपूजनेनगौर्याद्यावाहितदेवताःप्रीयंतां ॥ तत्सद्ब्रह्मार्पणमस्तु ॥ ॥ अथनांदीश्रा
द्धं ॥ सत्यवसुसंज्ञकाःविश्वेदेवाःनांदीमुखाःभूर्भुवःस्वः ॥ इदंवःपाद्यंस्वाहानमइयंचवृत्तिः ॥ मातृपि
तामहीप्रपितामह्यः ॥ नांदीमुखाः ॥ भूर्भुवःस्वःइदं० ॥ पा० ॥ मातामहमातुःपितामहमातुःप्रपिता
महाः ॥ नांदीमुखाः ॥ इ० पा० पितृपितामहप्रपितामहाः ॥ नांदीमुखाः ॥ भूर्भुवःस्वःइदंवःपाद्यं०
पुनःसत्यवसु०॥ इदंवःआसनगंधा०॥ पितृपितामह०इदंवः ॥ आसन०॥ मातामह०आसन०॥ गौ

र्यादिषोडशमातरःब्राम्ह्यादिसप्तमातरःगणपतिंदुर्गीक्षेत्रपालांश्च ॥ भूर्भुवःस्वःइदंवःयुग्मब्राह्मणभोज
नपर्याप्तान्नस्थानेकिंचिद्धिरण्यंस्वाहानमइयंचवृद्धिः ॥ सत्यवसु० युग्मब्राह्मण० ॥ द्विरण्यं० ॥ मा
तृपितामहीप्रपितामह्यः ॥ इदंवःयुग्म० ॥ द्विरण्यं० ॥ पितृपितामहप्रपितामहाः ॥ भूर्भुवःस्वःयु
ग्म० द्विरण्यं० ॥ मातामहमातुःपितामहमातुः प्र० युग्म० ॥ द्विरण्यं० ॥ ॐ उपास्मैगायतानरः
पवपमानायेंदवे ॥ अभिदेवाइयक्षते ॥ अभितेमधुनापयोथर्वाणोअशिश्रयुः ॥ देवंदेवायदेवयु ॥ स
नःपवस्वशंगवेशंजनायशमर्वते ॥ शंराजन्नोषधीभ्यः ॥ बभ्रवेनुस्वतवसेरुणायदिविस्पृशे ॥ सोमायगा
थमर्चत ॥ हस्तच्युतेभिरद्रिभिःसुतंसोमंपुनीतन ॥ मधावाधावनामधु ॥ ॥ प्रजापतेनत्त्वदेतान्यन्यो
विश्वाजातानिपरिताबभूव ॥ यत्कामास्तेजुहुमस्तंनोअस्तुवयंस्यामपतयोरयीणां ॥ अनेनकृतस्यनांदी
श्राद्धस्यप्रतिष्ठाफलसंसिद्ध्यर्थद्राक्षामलकनिष्क्रयीभूतंकिंचिद्धिरण्यंस्वाहानमम ॥ मातापितामहीचैव
तथैवप्रपितामही ॥ पितापितामहश्चैवतथैवप्रपितामहः ॥ मातामहस्तत्पिताचप्रमातामहतादयः ॥
एतेभवंतुमेप्रीताःप्रयच्छंतुचमंगलं ॥ ॥ इळामग्नेपुरुदंससनिंगोःशश्वत्तमंहवमानायसाध ॥ स्या
न्नःसूनुस्तनयोविजावाग्नेसातेसुमतिर्भूत्वस्मे ॥ अनेननांदीश्राद्धेननांदीमुखदेवताःपितरःप्रीयंतांवृद्धिः ॥

॥ ॥ इतिनांदीश्राद्धं ॥ श्रीभवानीशंकरभूतपापेश्वरोजयति ॥ श्रीशंकर ॥ आर्यादुर्गाकुलदेवता प्रसन्ना ॥ ॥ इति सकळकर्मोपयोगी पुण्याहवाचनं समाप्तं ॥ ॥ छ ॥ ॥ ० ॥

॥ ४१ ॥ ॥ अथ यज्ञोपवीताभिमंत्रण प्रारंभः ॥

श्रीगणेशायनमः ॥ ॥ श्रीसरस्वत्यैनमः ॥ श्रीगुरुभ्योनमः ॥ ॐ केशवायनमः ॥ ॐ नारायणाय नमः ॥ ॐ माधवायनमः ॥ द्विराचम्य ॥ चतुर्विंशतिनामानिपठित्वाप्राणायामंकृत्वा ॥ ॐ भूः ॐ भू॰ सुवरोम् ॥ अद्यपूर्वोच्चरितवर्तमानएवंगुणविशेषणविशिष्टायांशुभपुण्यतिथौममआत्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थंश्रौतस्मार्तकर्मानुष्ठानसिद्ध्यर्थंयज्ञोपवीतसंस्कारमहंकरिष्ये ॥ ॐ आपोहिष्ठा मयोभुवस्तानऊर्जेदधातन ॥ महेरणायचक्षसे ॥ योवःशिवतमोरसस्तस्यभाजयतेहनः ॥ उशतीरिव मातरः ॥ तस्मा अरंगमामवोयस्यक्षयायजिन्वथ ॥ आपोजनयथाचनः ॥ अतोदेवामेधातिथिर्देवागायत्री ॥ सूत्रकरणेविनियोगः ॥ ॐ अतोदेवाअवंतुनोयतोविष्णुर्विचक्रमे ॥ पृथिव्याः सप्तधामभिः ॥ इदंविष्णुःकाण्वोमेधातिथिर्विष्णुर्गायत्री ॥ सूत्रत्रिगुणीकरणेविनियोगः ॥ ॐ इदंविष्णुर्विचक्रमेत्रेधा निदधेपदं ॥ समूळ्हमस्यपांसुरे ॥ त्र्यंबकंमैत्रावरुणिर्वसिष्ठोरुद्रोनुष्टुप् ॥ सूत्रनवगुणिकरणेविनियो

गः ॥ ॐ त्र्यंबकंयजामहेसुगंधिंपुष्टिवर्धनं ॥ उर्वारुकमिवबंधनान्मृत्योर्मुक्षीयमामृतात् ॥ ब्रह्मजज्ञा
नंगौतमोब्रह्मात्रिष्टुप् ॥ ग्रंथिबंधनेविनियोगः ॥ ॐ ब्रह्मजज्ञानंप्रथमंपुरस्ताद्विसीमतःसुरुचोवेनआवः
सबुध्न्याउपमाअस्यविष्ठाःसतश्चयोनिमसतश्चविवः ॥ ॐ कारंप्रथमततौन्यसामि ॥ अग्निंद्वितीयतंतौ
न्यसामि ॥ नागांन्तृतीयततौन्यसामि ॥ सोमंचतुर्थततौन्यसामि ॥ पितॄन्पंचमतंतौन्यसामि ॥ प्र
जापतिंषष्ठततौन्यसामि ॥ वायुंसप्तमतंतौन्यसामि ॥ सूर्यंअष्टमतंतौन्यसामि ॥ विश्वांन्देवान्नवमतंतौ
न्यसामि ॥ हिरण्यवर्णाःशुचयःपावकायासुजातःकश्यपोयास्विंद्रः ॥ अग्निंयागर्भंदधिरेविरूपाःस्तान
आपःशꣳस्योनाभवंतु ॥ यासाꣳराजावरुणोयातिमध्येसत्यानृतेअवपश्यंजनानां ॥ मधुश्चुतःशुचयोयाः
पावकास्तानआपःशꣳस्योनाभवंतु ॥ यासांयेवादिविकृण्वंतिभक्षंयाअंतरिक्षेबहुधाभवंति ॥ याःपृथि
वींपयसोदंतिशुक्राःस्तानआपःशꣳस्योनाभवंतु ॥ शिवेनमाचक्षुषापश्यतापःशिवयातनुवोपस्पृशतत्व
चंमे ॥ सर्वाꣳअग्नीꣳरप्सुषदोहुवेवोमयिवर्चोबलमोजोनिधत्त ॥ पवमानःसुवर्चनः ॥ पवित्रेणविचर्ष

णिः ॥ यःपोतासपुनातुमा ॥ पुनंतुमादेवजनाः ॥ पुनंतुमनवोधिया ॥ पुनंतुविश्वआयवः ॥ जातवे
दःपवित्रंवत् ॥ पवित्रेणपुनाहिमा ॥ शुक्रेणदेवदीद्यत् ॥ अग्नेक्रत्वाक्रतूꣳरनु ॥ यत्तेपवित्रमर्चिषि ॥
अग्नेवितंतमंतरा ॥ ब्रह्मतेनपुनीमहे ॥ उभाभ्यांदेवसवितः ॥ पवित्रेणसवेनच ॥ इदंब्रह्मपुनीमहे ॥
वैश्वदेवीपुनतीदेव्यागात् ॥ यस्यैबह्वीस्तनुवोवीतपृष्ठाः ॥ तयामदंतःसधमाद्येषु ॥ वयꣳस्यामपतयो
रयीणां ॥ वैश्वानरोरश्मिभिर्मापुनातु ॥ वातःप्राणेनेषिरोमयोभूः ॥ द्यावापृथिवीपयसापयोभिः ॥ ऋ
तावरीयज्ञियेमापुनीतां ॥ बृहद्भिःसविताख्रिभिः ॥ वर्षिष्ठैर्देवमन्मभिः ॥ अग्नेदक्षैःपुनाहिमा ॥ येनदे
वाअपुनत ॥ येनापोदिव्यंकशः ॥ तेनदिव्येनब्रह्मणा ॥ इदंब्रह्मपुनीमहे ॥ यःपावमानीरध्येति ॥ ऋ
षिभिःसंभृतꣳरसं ॥ सर्वꣳसपूतमश्नाति ॥ स्वदितंमातरिश्वना ॥ पावमानीर्योअध्येति ॥ ऋषिभिःसं
भृतꣳरसं ॥ तस्मैसरस्वतीदुहे ॥ क्षीरꣳसर्पिर्मधूदकं ॥ पावमानीःस्वस्त्ययनीः ॥ सुदुघाहिपयस्वतीः॥
ऋषिभिःसंभृतोरसः ॥ ब्राह्मणेष्वमृतꣳहितं ॥ पावमानीर्दिशंतुनः ॥ इमन्लोकमथोअमुं ॥ कामान्स
मर्धयंतुनः ॥ देवीर्देवैःसभाभृता ॥ पावमानीःस्वस्त्ययनीः ॥ सुदुघाहिघृतश्चुतः ॥ ऋषिभिःसंभृतोर

सः ॥ ब्राह्मणेष्वमृतꣳहितं ॥ येनदेवाःपवित्रेण ॥ आत्मानंपुनतेसदा ॥ तेनसहस्रधारेण ॥ पावमा
न्यःपुनंतुमां ॥ प्राजापत्यंपवित्रं ॥ शतोद्यामंहिरण्मयं ॥ तेनब्रह्मविदोवयं ॥ पूतंब्रह्मपुनीमहे ॥ इंद्रः
सुनीतीसहमापुनातु ॥ सोमःस्वस्त्यावरुणःसमीच्या ॥ यमोराजाप्रमृणाभिःपुनातुमा ॥ जातवेदामूर्ज
यंत्यापुनातु ॥ भूरग्निंचपृथिवींचमांच ॥ त्रीꣳश्चलोकान्संवत्सरंच ॥ प्रजापतिस्त्वासादयतु ॥ तयादे
वतयांगिरःस्वध्रुवासीद ॥ भुवोवायुंचांतरिक्षंचमांच ॥ त्रीꣳश्चलोकान्संवत्सरंच ॥ प्रजापतिस्त्वासा
दयतु ॥ तयादेवतयांगिरस्वध्रुवासीद ॥ स्वरादित्यंचदिवंचमांच ॥ त्रीꣳश्चलोकान्संवत्सरंच ॥ प्रजा
पतिस्त्वासादयतु ॥ तयादेवतयांगिरस्वध्रुवासीद ॥ भूर्भुवःसुवश्चंद्रमसंचदिशश्चमांच ॥ त्रीꣳश्चलो
कान्संवत्सरंच ॥ प्रजापतिस्त्वासादयतु ॥ तयादेवतयांगिरस्वध्रुवासीद ॥ ततःप्रत्येकंदशगायत्रीःज
पःकार्यः ॥ उद्वयंतमसस्परिज्योतिष्पश्यंतउत्तरं ॥ देवंदेवत्रासूर्यमगन्मज्योतिरुत्तमं ॥ उदुत्यंजातवेद
संदेवंवहंतिकेतवः ॥ दृशेविश्वायसूर्यं ॥ चित्रंदेवानामुदगादनीकंचक्षुर्मित्रस्यवरुणस्याग्नेः ॥ आप्रा
द्यावापृथिवीअंतरिक्षंसूर्यआत्माजगतस्तस्थुषश्च ॥ इतिसूर्यायप्रदर्श्यंभिस्ताडयेत् ॥ अथपूर्वोच्चरित •

प्राप्त्यर्थंश्रौतस्मार्तकर्मानुष्ठानसिद्ध्यर्थंयज्ञोपवीतधारणमहंकरिष्ये ॥ यज्ञोपवीतंपरमंपवित्रंप्रजापते र्यत्सहजंपुरस्तात् ॥ आयुष्यमग्र्यंप्रतिमुंचशुभ्रंयज्ञोपवीतंबलमस्तुतेजः ॥ श्रीकृष्णार्पणमस्तु ॥ ॥ इ तियज्ञोपवितमंत्रः समाप्तः ॥ छ ॥ ॥ छ ॥ ॥ छ ऽ ॥ छ ॥

॥ ५० ॥ ॥ अथ समंत्रक श्रावणी पंचगव्यमेलन प्रारंभः ॥

श्रीगणेशायनमः ॥ ॥ अथसमंत्रकोत्सर्जनोपाकर्मप्रारंभः ॥ सामग्रीदर्भदूर्वामृत्गोमयभस्मातिल यवतांबूलतंडुलपूगफलनारिकेलफलवस्त्रयज्ञोपवीतचरुदधिसक्तुसमित्घृतइंधनवेणुधमनीगुडगोमूत्र पयदधिधूपदीपगंधपुष्पाक्षतारंगवल्लीपलाशपर्णदर्वीस्रुवाद्रोणआसनआचमनपात्रतांम्रकलशजलनिषे कपात्रब्रह्मचारीअस्तिचेत्मेखलाअजिनकौपीनदंडएतानिसंपाद्य ॥ आचम्यप्राणानायम्यदेशकालौस्मृ त्वाश्रीपरमेश्वरप्रीत्यर्थंपंचगव्यमेलनंकरिष्ये ॥ गायत्र्यागाथिनोविश्वामित्रःसवितागायत्री ॥ गोमूत्रप्र क्षेपणेवि० ॥ ॐ तत्सवि० ॥ गंधद्वारेत्यस्यानंदःश्रीरनुष्टुप् ॥ गोमयप्रक्षे० ॥ गंधद्वारांदुराधर्षांनित्य पुष्टांकरीषिणीं ॥ ईश्वरींसर्वभूतानांतामिहोपव्हयेश्रियं ॥ आप्यायस्वेत्यस्यगौतमःसोमोगायत्री ॥ प यःप्रक्षेपणे० ॥ ॐ ॥ आप्यायस्वसमेतुतेविश्वतःसोमवृष्ण्यं ॥ भवावाजस्यसंगथे ॥ दधिक्राव्णोवा

मदेवोदधिक्राबानुष्टुप् ॥ दधिप्रक्षेप० ॥ ॐ दधिक्राव्णोअकारिषंजिष्णोरश्वस्यवाजिनः ॥ सुरभिनो
मुखाकरत्प्रणआयूंषितारिषत् ॥ शुक्रमसिज्योतिरसितेजोसि ॥ घृतं ॥ देवस्यत्वासवितुः प्रसवेश्विनो
र्बाहुभ्यांपूष्णोहस्ताभ्यां ॥ इतिकुशोदकं ॥ आपोहिष्ठेतितिसृणामांबरीषः सिंधुद्वीपआपोगायत्री ॥
पंचगव्यालोडनेविनि० ॥ ॐ आपोहिष्ठामयोभुवस्तानऊर्जेदधातन ॥ महेरणायचक्षसे ॥ योवःशिव
तमोरसस्तस्यभाजयतेहनः ॥ उशतीरिवमातरः ॥ तस्माअरंगमामवोयस्यक्षयायजिन्वथ ॥ आपोजन
यथाचनः ॥ इतिपंचगव्यकरणं ॥ सर्वैःसहआचम्यप्राणानायम्य ॥ देशकालौस्मृत्वाममशरीरशुध्यर्थं
पंचगव्यप्राशनंकरिष्ये ॥ यत्वगस्थिगतंपापंदेहेतिष्ठतिमामके ॥ प्राशनात्पंचगव्यस्यदहत्वाग्निरिवेंधनं ॥
ॐ पिबेत् ॥ आचम्यएवंत्रिः ॥ ॥ इति पंचगव्यमेलन प्राशनविधिः समाप्तः ॥ ॥ ७ ॥
श्रीगणेशायनमः ॥ ॥ अथोत्सर्जनप्रयोगप्रारंभः ॥ आचम्यहृदिदर्भपवित्रेधृत्वाप्राणानायम्य ॥ श्रीम
न्महागणाधिपतयेनमः ॥ इष्टदे० ॥ सुमुखश्चै० ॥ शुभतिथौ ॥ आत्मनः श्रुतिस्मृतिपुराणोक्तफल
प्राप्त्यर्थं ॥ ममअधीतानांछंदसां आप्यायनद्वाराश्रीपरमेश्वरप्रीत्यर्थंउपाकर्मदिनेअद्यउत्सर्जनाख्यंकर्म
करिष्ये ॥ आचार्यःएभिर्ब्राह्मणैःसहउत्सर्जनाख्यंकर्मकरिष्ये ॥ तदादौनिर्विघ्नतासिध्यर्थंमहागणपतिपू

जांकरिष्ये ॥ भूःगणपतिंआवाहयामि ॥ भुवःगण० ॥ स्वःगण० ॥ भूर्भुवःस्वःगण० ॥ गणानांत्वा
शौनकोगृत्समदोगणपतिर्जगती ॥ गणपत्यावाहनेवि० ॥ ॐ गणानांत्वागणपतिंहवामहेकविंकवी
नामुपमश्रवस्तमं ॥ ज्येष्ठराजंब्रह्मणांब्रह्मणस्पतआनःशृण्वन्नूतिभिःसीदसादनं ॥ भूर्भुवस्वःमहागण
पतयेनमः ॥ ध्यानं० ॥ षोडशोपचारपूजांकुर्यात् ॥ वक्रतुंडमहाकायसूर्यकोटिसमप्रभ ॥ निर्विघ्नंकु
रुमेदेवसर्वकार्येषुसर्वदा ॥ अनेनपूजनेनगणपतिः प्रीयतां ॥ यांतुदेवगणाः सर्वेपूजामादायपार्थिवीं ॥
इष्टकामप्रसिध्यर्थंपुनरागमनायच ॥ उत्सर्जनहोमंकर्तुंस्थंडिलादिसर्वंकर्मकरिष्ये ॥ गोमयादिलिप्तेशु
द्धेदेशेशुद्धमृदाईशान्यारंभंउदक्संस्थंचतुरस्रंचतुरंगुलोन्नतमंगुलोन्नतंवाचतुर्दिक्षुमिलिलाह्निसप्तत्यंगु
लपरिमितफलितमष्टादशांगुलविस्तृतहोमानुसारेणतदधिकंवानतुततोन्यूनंमध्योन्नतंस्थंडिलंकुर्यात् ॥
तद्गोमयेनप्रदक्षिणमुपलिप्य ॥ दक्षिणेष्टौउदीच्यांह्रेप्रतीच्यांचतुः ॥ प्राच्यामर्धइतिअंगुलानित्यक्त्वा ॥ द
क्षिणोपक्रमामुदक्संस्थांप्रादेशमात्रामेकांलेखांलिखित्वातस्यादक्षिणोत्तरयोः प्रागायतेपूर्वरेखयाअसंस्पृ
ष्टप्रादेशसंमितेद्वेलेखेलिखित्वातयोर्मध्येपरस्परमसंसृष्टाउदक्संस्थाः प्रागायताः प्रादेशसंमितास्तिस्रइ
तिषड्लेखायज्ञियशकलमूलेनदक्षिणहस्तेनोल्लिख्य ॥ लेखासुतच्छकलमुदगग्रंनिधाय ॥ स्थंडिलमद्भि

रभ्युक्ष्यशकलमाग्नेय्यांनिरस्यपाणिंप्रक्षाल्यवाग्यतोभवेत् ॥ ततस्तैजसेनासंभवेमृन्मयेनवापात्रयुग्मेनसं
पुटीकृत्यसुवासिन्याश्रोत्रियागारात्स्वगृहाद्वासमृत्धंनिर्धूममग्निमाहृतंस्थंडिलादाग्नेय्यांनिधाय ॥ जु
ष्टोदमूनाआत्रेयोवसुश्रुतोग्निस्त्रिष्टुप् ॥ एह्यग्नेराहूगणोगौतमोग्निस्त्रिष्टुप् ॥ अग्न्यावाहनेविनियोगः ॥
ॐ जुष्टोदमूनाअतिथिर्दुरोणइमंनोयज्ञमुपयाहिविद्वान् ॥ विश्वाअग्नेअभियुजोविहत्याशत्रूयतामाभरा
भोजनानि ॥ एह्यग्नइहहोतानिषीदादब्धःसुपुरएताभवानः ॥ अवतांत्वारोदसीविश्वमिन्वेयजामहेसौमन
सायदेवान् ॥ इत्यक्षतैरावाह्यआच्छादनंदूरीकृत्यसमस्तव्याहृतीनांपरमेष्ठीप्रजापतिः प्रजापतिर्बृहती ॥
अग्निप्रतिष्ठापनेविनियोगः ॥ ॐ भूर्भुवःस्वःबलवर्धननामानमग्निंप्रतिष्ठापयामि ॥ प्रोक्षितेंधनानिनिक्षि
प्य ॥ वेणुधमन्याप्रबोध्यध्यायेदेवं चत्वारिशृंगागौतमोवामदेवोग्निस्त्रिष्टुप् ॥ अग्निमूर्तिध्यानेविनियोगः ॥
ॐ चत्वारिशृंगात्रयोअस्यपादाद्वेशीर्षेसप्तहस्तासोअस्य ॥ त्रिधाबद्धोवृषभोरोरवीतिमहोदेवोमर्त्याआवि
वेश ॥ स्मृतिमंत्राश्च ॥ सप्तहस्तश्चतुःशृंगःसप्तजिह्वोद्विशीर्षकः ॥ त्रिपात्प्रसंनवदनःसुखासीनःशुचि
स्मितः ॥ स्वाहांतुदक्षिणेपार्श्वेदेवींवामेस्वधांतथा ॥ बिभ्रद्दक्षिणहस्तैस्तुशक्तिमन्नंस्रुचंस्रुवं ॥ तोमरंव्य
जनंवामैर्घृतपात्रंचधारयन् ॥ मेषारूढोजटाबद्धोगौरवर्णोमहौजसः ॥ धूम्रध्वजोलोहिताक्षःसप्तार्चिःसर्व

कामदः ॥ आत्माभिमुखमासीनएवंरूपोहुताशनः ॥ एषाहिदेवःप्रदिशोनुसर्वाःपूर्वोहिजातःसउगर्भेअंतः
साविजायमानःसजनिष्यमाणःप्रत्यङ्मुखस्तिष्ठतिविश्वतोमुखः ॥ अग्नेशांडिल्यगोत्रवैश्वानरमेषारूढव
रप्रदप्राङ्मुखोदेवाग्नेममसन्मुखोवरदोभव ॥ समिद्द्वयंत्रयंवादायउत्सर्जनहोमेदेवतापरिग्रहार्थमन्वाधानं
करिष्ये ॥ अस्मिन्नन्वाहितेग्नौजातवेदसमग्निमिध्मेनप्रजापतिंप्रजापतिंचाघारदेवतेआज्येनअग्नीषोमौच
क्षुषीआज्येन ॥ अत्रप्रधानं ॥ सावित्रीं ब्रह्माणं श्रद्धां मेधां प्रज्ञां धारणां सदसस्पतिं अनुमतिंछंदांस्यृषी
न् ॥ एताप्रधानदेवताः आज्येन पुनरत्रप्रधानं अग्निं अप्तृणसूर्यान् ॥ अग्निं शकुंतं अग्निं मित्रावरुणौ अ
ग्निंअपः अग्निं मरुतः अग्निं विश्वान्देवान् अग्निं इंद्रासोमौ इंद्रं आग्नामरुतः पवमानसोमं सोमं सं
ज्ञानं एताःप्रधानदेवताःगृह्यसिद्धान्नद्रव्येण शेषेण स्विष्टकृतमग्निमिध्मसंनहनेनरुद्रमयासमग्निंदेवान्
विष्णुमग्निंवायुंसूर्यंप्रजापतिंचैता : प्रायश्चित्तदेवताआज्येनज्ञाताज्ञातदोषनिवर्हणार्थंत्रिवारमग्निं मरुत
श्चाज्येन विश्वान्देवान्संस्रावेणयक्ष्ये अंगदेवताःप्रधानदेवताः सर्वाःसंनिहिताःसंतु एवं सांगोपांगेन
कर्मणासद्योयक्ष्ये समस्तव्याहृतीनां परमेष्ठी प्रजापतिःप्रजापतिर्बृहतीअन्वाधानसमिद्धोमेवि० ॥
ॐ भूर्भुवःस्वःस्वाहाप्रजापतयइदंनमम ॥ अग्न्यायतनादष्टांगुलपरिमितेदेशऐशानींदिशमारभ्यप्रदक्षि

णंसमंतात्सोदकेनपाणिनात्रिः परिमृज्यपूर्वमुपारिनिहितदर्भैर्दशांगुलमितेदेशेप्राच्यादिषुपरिस्तृणीयात्
तत्रप्राच्यांप्रतीच्यांचोदगग्रादर्भाः ॥ अवाच्यामुदीच्यांचप्रागग्राः ॥ पूर्वपश्चात्परिस्तरणमूलयोरुप
रिदाक्षिणपरिस्तरणं ॥ उत्तरपरिस्तरणंतुतदग्रयोरधस्तात् ॥ तेचदर्भाअनियतसंख्याएकैकस्यांदिशिच
त्वारश्चत्वारइत्येवंषोडशवा ॥ ततोग्नेर्दक्षिणतोब्रह्मासनार्थं ॥ उत्तरतश्चपात्रासादनार्थंकांश्चित्प्रागग्रान्द
र्भानास्तृणीयात् ॥ अग्नेरीशानतस्त्रिरंभसापरिषिच्य ॥ उत्तरास्तीर्णेषुदर्भेषुदाक्षिणसव्यपाणिभ्यां
क्रमेण ॥ चरुस्थालीप्रोक्षण्योदर्वीस्रुवौप्रणीताआज्यपात्रेइध्माबर्हिषीचेत्येतावतामेवासादनं ॥ ततः
प्रोक्षणीपात्रमुत्तानंकृत्वा ॥ तत्रानंतरगर्भितसाग्रसमस्थूलप्रादेशमात्रकुशद्वयरूपेपवित्रेनिधाय ॥ शुद्धा
भिरद्भिस्तत्पात्रंपूरयित्वागंधपुष्पाक्षतादिक्षिप्त्वाहस्तयोरंगुष्ठोपकनिष्ठिकाभ्यामुदगग्रेपृथक्पवित्रेधृत्वाअ
पस्त्रिरुत्पूय ॥ पात्राण्युत्तानानिकृत्वाइध्मंचविस्रस्य ॥ सर्वाणिपात्राणित्रिःप्रोक्षयेत् ॥ ताअपःकिंचित्
कमंडलौक्षिपेदित्येके ॥ प्रणीतापात्रमग्नेःप्रत्यङ्निधायतत्रप्रागग्रेपवित्रेनिधायोत्पूताभिरद्भिस्तत्पात्रंपू
रयित्वागंधपुष्पाक्षतान्निक्षिप्यमुखसममुद्धृत्य ॥ अग्नेउत्तरतोदर्भेषुनिधायतेपवित्रेगृहीत्वा ॥ अन्यैर्दर्भै
राच्छादयेत् ॥ ततःतेपवित्रेआज्यपात्रेनिधाय तत्पात्रंपुरतःसंस्थाप्य तस्मिन्नाज्यमासिच्यअग्नेरुत्तरतः
स्थितांगारान्भस्मनासहाग्नेरुदक्परिस्तरणाद्बहिर्निरूह्यतेष्वाज्यपात्रमधिश्रित्यज्वलतादर्भोल्मुकेनाव

ज्वल्यांगुष्ठपर्वमात्रंप्रक्षालितंदर्भाग्रद्वयमाज्येप्रक्षिप्यगृह्यसिद्धान्नंचरुस्थालीपात्रे निधायपुनर्ज्वलता
तेनैवदर्भोल्मुकेनचरुणासहाज्यं त्रिःपर्यग्निकृत्वातदुल्मुकमपास्यापःस्पृष्ट्वाआज्यपात्रंभुविकर्षन्निवो
दगुद्वास्यांगारानग्नौप्रत्यस्यापःस्पृष्ट्वातत्रस्थमेवाज्यं ॥ सवितुष्ट्वाहिरण्यस्तूपःसवितापुरउष्णिक् ॥
आज्यस्योत्पवनेवि० ॥ ॐ सवितुष्ट्वाप्रसवउत्पुनाम्यच्छिद्रेणपवित्रेणवसोःसूर्यस्यरश्मिभिः ॥ सकृन्म
न्त्रेणद्विस्तूष्णीं उत्तानपाणिद्वयांगुष्ठोपकनिष्ठिकाभ्यामंतयोरसंसृष्टगृहीताभ्यामुदगग्राभ्यांपवित्राभ्यांप्रा
गुत्पूयतेपवित्रेअद्भिःप्रोक्ष्याग्नौप्रहरेत् ॥ ॐ स्कंदायस्वाहा ॥ स्कंदायइ० ॥ अथाग्नेःपश्चात्परिस्तर
णाद्बहिरात्मनोग्रतोभूमिंप्रोक्ष्यतत्रबर्हिःसन्नहनींरज्जुमुदगग्रांप्रसार्यतस्यांबर्हिः प्रागग्रमुदगपवर्गमविरल
मास्तीर्यतस्मिन्नाज्यपात्रंनिधायस्रुवादिसंमार्जयेत् ॥ दक्षिणेनहस्तेनस्रुक्स्रुवौगृहीत्वासव्येनकांश्चिद्द
र्भानादायसहैवाग्नौप्रताप्यस्रुचंनिधाय स्रुवंवामहस्तेगृहीत्वादक्षिणेन हस्तेन स्रुवस्यबिलंदर्भाग्रैः प्रागा
दिप्रागपवर्गंत्रिःसमृज्याधस्ताद्दर्भाग्रेणैवाभ्यात्मंबिलपृष्ठंत्रिः समृज्यततोदर्भाणांमूलैर्दंडस्याधस्ताद्बिलपृ
ष्ठादारभ्ययावदुपरिष्टाद्बिलंतावत्त्रिःसमृज्याद्भिःप्रोक्ष्यस्रुवंनिष्टप्याज्यस्थाल्याउत्तरतः स्रुगस्पृष्टंनिधायोद
क्संस्पृष्ट्वातैरेवदर्भैर्जुहूंचैवमेवसंमृज्यस्रुवादुत्तरतोनिधायदर्भानद्भिःप्रक्षालयित्वाग्नावनुप्रहरेत् ॥ गृह्यसिद्धा
न्नमग्नावधिश्रित्याभिघार्यत्रिःप्रोक्ष्यउदगुद्वास्यआज्याद्दक्षिणतोबर्हिषिनिधायएकादशांगुलपरिमितेदेशेगं

धाक्षतपुष्पैरग्निंसमंत्रमर्चयेत् ॥ विश्वानिनइतितिसृणांवसुश्रुतोग्निस्त्रिष्टुप् ॥ द्वाभ्यामग्न्यर्चनेअंत्यायाग्निप्रा
र्थनेविनि० ॥ ॐ विश्वानिनोदुर्गहाजातवेदः ॥ सिंधुंननावादुरितातिपर्षि ॥ अग्नेअत्रियन्नमसागृणा
नः ॥ अस्माकंबोध्यवितातनूनां ॥ यस्त्वाद्धदाकीरिणामन्यमानः ॥ अमर्त्यमर्त्योजोहवीमि ॥ जात
वेदोयशोअस्मासुधेहि ॥ प्रजाभिरग्नेअमृतत्वमश्यां ॥ यस्मैत्वंसुकृतेजातवेदउलोकमग्नेकृणवस्योनं ॥
अश्विनंसपुत्रिणंवीरवंतंगोमंतंरयिंनशतेस्वस्ति ॥ ततःआत्मानंचालंकृत्यहस्तंप्रक्षाल्यइध्मबंधनरज्जु
मिध्मस्थानेनिधायपाणिनेध्ममादायमूलमध्याग्रेषुस्रुवेणाभिरभिघार्यमूलमध्ययोर्मध्यभागेगृहीत्वा ॥ अ
यंतेवामदेवोजातवेदाअग्निस्त्रिष्टुप् इध्माहवनेवि० ॥ ओंअयंतइध्मआत्माजातवेदस्तेनेध्यस्ववर्धस्वचे
त्धवर्धयचास्मान्प्रजयापशुभिर्ब्रह्मवर्चसेनान्नाद्येनसमेधयस्वाहाजातवेदसेग्नयइ० ॥ स्रुवेणाज्यमादाया
ग्नेरायतनस्यवायव्यकोणमारभ्याग्नेयकोणपर्यंतंप्रजापतयेस्वाहाप्रजापतयइदंनममइतिमनसास्मरन् ॥
स्वाहेत्युच्चार्यनैरंतर्येणाज्यधारामग्नाविध्मदारूपरिहुत्वापुनराज्यमादायाग्नेरायतनस्यनैर्ऋत्यकोणतईशानी
पर्यंतं तथैवहुत्वात्यस्काचस्रुवेणाज्यमादायाग्नयेस्वाहेत्यग्नेरुत्तरपार्श्वेपूर्वभागे हुत्वापुनराज्यं सोमाय
स्वाहेत्यग्निदक्षिणपार्श्वेतत्समप्रदेशेहुत्वा अथप्रधानहोमः ॥ ॐ सावित्र्यैस्वाहा ॥ सावित्र्याइदंनमम

ॐ ब्रह्मणेस्वाहा ॥ ब्रह्मणइदंनमम ॐ श्रद्धायैस्वा० ॥ श्रद्धायाइ० ॐ मेधायै० मेधायाइ० ॐ
प्रज्ञायै० प्रज्ञाया० ॐ धारणायै० धारणाया० ॐ सदसस्पतये० ॥ सदसस्पतय० ॥ ॐ अनुम
तये० अनुमतय० ॐ छंदोभ्यऋषिभ्यःस्वा० छंदोभ्यऋषिभ्य० अवदानधर्मःस्रुवेणस्रुच्याज्यमुपस्ती
र्यचरुमध्यादंगुष्ठपर्वमात्रंतिरश्चीनाभिरंगुष्ठमध्यमानामिकाभिरुदगग्राभिर्नखसंस्पर्शमकुर्वन्नवदायद
र्व्यामोप्य ततः चरुपूर्वभागंप्रागग्राभिस्ताभिस्तथैवावदायदर्व्यामोप्यपात्रस्थंहविरभिघार्यदर्वीस्थमव
त्तंचाभिघार्यविधूमज्वालाग्नौआज्यभागयोर्मध्यदेशेतत्प्रत्यक्देशेवाआच्छादयंनिवदर्व्यावामपार्श्वेणाहा
वयेत् पंचावत्तिनःअत्रप्रसूतेतिमंत्रंपठंति ॐ प्रसूतोभक्षमकरंचरावपिस्तोमंचेमंप्रथमःसूरिरुन्मृजे ॥
सुतेसातेनयद्यागमंवांप्रतिविश्वामित्रजमदग्नीदमे ॥ पंचावत्तीतुदर्व्यामुपस्तीर्यमध्यात्पूर्वार्धात्पश्चार्धाच्च
स्विष्टविशेषोवदायाभिघार्यजुहुयात् ॥ अग्निमीळेवैश्वामित्रोमधुच्छंदाग्निर्गायत्री ॥ उत्सर्जनप्रधानगृह
सिद्धान्नहोमेविनियोगः ॥ ॐ अग्निमीळेपुरोहितंयज्ञस्यदेवमृत्विजं ॥ होतारंरत्नधातमंस्वाहा ॥
अग्नयइ० ॥ कुषुंभकस्तन्मैत्रावरुणिरगस्त्योप्तृणसूर्यानुष्टुप् ॥ उत्सर्जनप्र० ॥ ॐ कुषुंभकस्तद
ब्रवीद्गिरेःप्रवर्तमानकः ॥ वृश्चिकस्यारसंविषमरसंवृश्चिकतेविषंस्वाहा ॥ अप्तृणसूर्येभ्यइ० ॥ त्व

मग्नेद्युभिरित्यस्यशौनकोगृत्समदोग्निर्जगती ॥ उत्सर्जे० ॥ ॐ त्वमग्नेद्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्य
स्त्वमश्मनस्परि ॥ त्वंवनेभ्यस्त्वमोषधीभ्यस्त्वंनृणांनृपतेजायसेशुचिःस्वाहा ॥ अग्नयइ० ॥ आवदंछौ
नकोगृत्समदःशकुंतोजगती ॥ उ० ॥ ॐ आवदंस्त्वंशकुनेभद्रमावदतूष्णीमासीनःसुमतिंचिकिद्धि
नः ॥ यदुत्पतन्वदसिकर्करिर्यथाबृहद्वदेमविदथेसुवीराःस्वाहा ॥ शकुंतायेदं० ॥ सोमस्यमागाथिनो
विश्वामित्रोग्निस्त्रिष्टुप ॥ उत्सर्जन० ॥ ॐ सोमस्यमातवसंवक्ष्यग्नेवर्ह्निंचकर्थविदथेयजध्यै ॥ देवां
अच्छादीद्युंजेअद्रिंशमायेअग्नेतन्वंजुषस्वस्वाहा ॥ अग्नयइ० ॥ गृणानाभार्गवोजमदग्निर्मित्रावरुणौ
गायत्री ॥ उ० ॥ ॐ गृणानाजमदग्निनायोनावृतस्यसीदतं ॥ पातंसोमम्मृतावृधास्वाहा ॥ मित्रावरु
णाभ्यामिदं० ॥ त्वांह्यग्नेगौतमोवामदेवोग्निरष्टी ॥ उ० ॥ ॐ त्वांह्यग्नेसदमित्समन्यवोदेवासोदेवमरतिंन्येरिर
इतिक्रत्वान्येरिरे ॥ अमर्त्ययजतमर्त्येष्वादेवमादेवंजनतप्रचेतसंविश्वमादेवंजनतप्रचेतसंस्वाहा ॥ अ
ग्नयइ० ॥ धामंतेगौतमोवामदेवआपोजगती ॥ उत्सर्जे० ॥ ॐ धामंतेविश्वंभुवनमधिश्रितमंतःसमु
द्रेहृद्यंतरायुषि ॥ अपामनीकेसमिथेयआभृतस्तमश्यामममधुमंततऊर्मिंस्वाहा ॥ अद्भ्यइ० ॥ अबो

ध्यात्रेयोबुधगविष्टिरावग्निस्त्रिष्टुप् ॥ उत्सर्जे० ॥ ॐ अबोध्यग्निः समिधाजनानांप्रतिधेनुमिवायतीमु
षासं ॥ यव्हाइवप्रवयामुज्जिहानाः प्रभानवः सिस्रतेनाकमच्छस्वाहा ॥ अग्नयइ० ॥ गंतानआत्रेय
एवयामरुन्मरुतोतिजगती ॥ उ०॥ ॐ गंतानोयज्ञंयज्ञियाःसुशमिश्रोताहवमरक्षएवयामरुत् ॥ ज्येष्ठा
सोनपर्वतासोव्योमनियूयंतस्यप्रचेतसस्यातदुर्धर्तवोनिदःस्वाहा ॥ मरुद्भ्य० ॥ त्वंह्यग्नेबार्हस्पत्यो
भरद्वाजोग्निस्त्रिष्टुप् ॥ उत्सर्जन० ॥ ॐ त्वंह्यग्नेप्रथमोमनोतास्याधियोअभवोदस्महोता ॥ त्वंसीं
वृषन्नकृणोर्दुष्टरीतुसहोविश्वस्मैसहसेसहध्यैस्वाहा ॥ अग्नयइ० ॥ योनस्वःपायुर्भारद्वाजोविश्वेदे
वाअनुष्टुप् ॥ उ० ॥ ॐ योनःस्वोअरणोयश्चनिष्ट्योजिघांसति ॥ देवास्तंसर्वेधूर्वंतुब्रह्मवर्ममामांतरं
स्वाहा ॥ विश्वेभ्योदेवेभ्यइ० ॥ अग्निनरोमैत्रावरुणिर्वसिष्ठोग्निर्विराट् ॥ उ० ॥ ॐ अग्निंनरोदीधिति
भिररण्योर्हस्तच्युतीजनयंतप्रशस्तं ॥ दूरेदृशंगृहपतिमथर्युंस्वाहा ॥ अग्नयइ० ॥ प्रतिचक्ष्वमैत्रावरु
णिर्वसिष्ठइंद्रासोमावनुष्टुप् ॥ उ० ॥ ॐ प्रतिचक्ष्वविचक्ष्वेंद्रश्चसोमजागृतं ॥ रक्षोभ्योवधमस्यतमश
निंयातुमद्भ्यः स्वाहा ॥ इंद्रासोमाभ्यामिदं० ॥ माचित्काण्वःप्रगाथइंद्रोबृहती ॥ उत्सर्जे० ॐ मा

चिदन्याद्विशंसतसखायोमारिषण्यत ॥ इंद्रमित्स्तोतानावृषणंसचासुतेमुहुरुक्थाचशंसतस्वाहा ॥ इंद्रायेदं॰ ॥ आग्नेयाहिकाण्वःसौभरिरग्नामरुतोनुष्टुप् ॥ उत्स॰ ॥ ॐ आग्नेयाहिमरुत्सखारुद्रेभिःसोमपीतये ॥ सोभर्याऽउपसुष्टुतिंमादयस्वस्वर्णरेस्वाहा ॥ अग्नामरुद्भ्यइ॰ ॥ स्वादिष्ठयामधुच्छंदाःपवमानसोमोगायत्री ॥ उत्स॰ ॥ ॐ स्वादिष्ठयामदिष्ठयापवस्वसोमधारया ॥ इंद्रायपातवेसुतःस्वाहा ॥ पवमानसोमायेदं॰ ॥ यत्तेराजन्मारीचःकश्यपःसोमःपंक्तिः ॥ उत्सर्जनप्र॰ ॥ यत्तेराजन्छृतंहविस्तेनसोमाभिरक्षनः ॥ अरातीवामानस्तारीन्मोचनःकिंचनाममदिंद्रायेंदोपरिस्रवस्वाहा ॥ सोमायेदं॰ ॥ अग्नेबृहन्नाप्त्यस्त्रितोग्निस्त्रिष्टुप् ॥ उ॰ ॥ ॐ अग्नेबृहन्नुषसामूर्ध्वोअस्थान्निर्जगन्वान्तमसोज्योतिषागात् ॥ अग्निर्भानुनारुशतास्वंगआजातोविश्वासद्मान्यप्रास्वाहा ॥ अग्नयइ॰ ॥ समानीवइत्यस्यांगिरसःसंवननःसज्ञानमनुष्टुप् ॥ उत्सर्ज॰ ॥ ॐ समानीवआकूतिःसमानाहृदयानिवः ॥ समानमस्तुवोमनोयथावःसुसहासतिस्वाहा ॥ संज्ञानायेदं॰ ॥ यदस्येतिहिरण्यगर्भोग्निःस्विष्टकृदातिधृतिः ॥ स्विष्टकृद्धोमेवि॰ ॐ यदस्यकर्मणोत्यरीरिचंयद्वान्यूनमिहाकरं ॥ अग्निष्टत्स्विष्टकृद्विद्वांत्सर्वंस्विष्टंसुहु

तंकरोतुमे ॥ अग्नयेस्विष्टकृतेसुहुतहुतेसर्वप्रायश्चित्ताहुतीनांकामानांसमर्धयित्रेसर्वान्नः कामांत्समर्द्धय
स्वाहाअग्नावीशानदेशेजुहुयात्स्विष्टकृतेअग्नयइ० .॥ ततोऽग्नेरुत्तरतस्थितामिध्मबंधनरज्जुंविस्रस्यरुद्रा
यपशुपतयेस्वाहापशुपतयेरुद्रायेदं० सर्वैःसहप्राणायामंकृत्वापृथिवीतिमंत्रस्यमेरुपृष्ठऋषिः कूर्मोदे
वतासुतलंछंदः आसनेवि० ॐपृथिव्लयाधृतालोकादेविलंविष्णुनाधृता ॥ त्वंचधारयमांदेविपवित्रंकुरु
चासनं अनेनभूतान्यूत्साद्यशरावेजलकुशांश्चादाय विद्युदसिविद्यमेपाप्मानमृतात्सत्यमुपैमिवाम
जंघोपरिमूलदेशेदक्षिणपादंनिधायएवमुपस्थंकृत्वादक्षिणजानुस्थेवामेकरेउत्तानेप्रागग्रांगुलौप्रागग्रेद्वे
पवित्रेधृत्वादक्षिणकरेणतथैवसंपुटीकृत्यप्रणवादिस्वयमुच्चारयन्अन्यानप्येवमुपविष्टान्वाचयेत् प्रणव
स्यपरब्रह्मऋषिः परमात्मादेवतादेवीगायत्रीछंदः व्याहृतीनांपरमेष्ठीप्रजापतिः प्रजापतिर्बृह
तीगायत्र्यागाथिनोविश्वामित्र : सविितागायत्री अग्निमीळइत्यादीनांछंदसांवैश्वामित्रोमधुच्छंदादय
ऋषय : अग्न्यादयोदेवताः गायत्र्यादीनिच्छंदांसिउत्सर्जनेवि० ॐ भूर्भुव : स्व : तत्स० ण्यं ॥ भ
र्गो० हि ॥ धियो०यात् ॥ ॐ भूर्भुवः स्वः ॥ तत्स० हि ॥ धियो०यात् ॥ ॐ भुर्भूवः स्वः ॥
तत्स ० हि ॥ धियो०यात् अग्निमीळेपुरोहितंयज्ञस्यदेवमृत्विजं ॥ होतारंरत्नधातमं ॥ अग्निः

पूर्वेभिर्ऋषिभिरीड्योनूतनैरुत ॥ सदेवांएहवक्षति ॥ अग्निनारयिमश्नवत्पोषमेवदिवेदिवे ॥ यश
संवीरवत्तमं ॥ अग्नेयंयज्ञमध्वरंविश्वतःपरिभूरसि ॥ सइद्देवेषुगच्छति ॥ अग्निर्होताकविक्रतुः
सत्यश्चित्रश्रवस्तमः॥ देवोदेवेभिरागमत् ॥१॥ यदंगदाशुषेत्वमग्नेभद्रंकरिष्यसि ॥ तवेत्तत्सत्यमंगिरः॥
उपत्वाग्नेदिवेदिवेदोषावस्तर्धियावयं ॥ नमोभरंतएमसि ॥ राजंतमध्वराणांगोपामृतस्यदीदि
विं ॥ वर्धमानंस्वेदमे ॥ सनःपितेवसूनवेग्नेसूपायनोभव ॥ सचस्वानःस्वस्तये ॥ २ ॥ अग्निर्वैदे
वानामवमोविष्णुःपरमः ॥ अथमहाव्रतं ॥ एषपंथाएतत्कर्म ॥ अथातःसंहितायाउपनिषत् ॥ वि
दामघवन्विदा ॥ महाव्रतस्यपंचविंशतिंसामिधेन्यः ॥ इषेत्वोर्जेत्वा ॥ अग्नआयाहिवीतये ॥ शंनो
देवीरभिष्टये ॥ अथैतस्यसमाम्नायस्य ॥ समाम्नायःसमाम्नातः ॥ मयरसतजभनलगसंमितं ॥ गौः
ग्मा ॥ पंचसंवत्सरमयं ॥ अथशिक्षांप्रवक्ष्यामि ॥ वृद्धिरादैच् ॥ योगीश्वरंयाज्ञवल्क्यं ॥ नारायणंन
मस्कृत्य ॥ अथातोधर्मंव्याख्यास्यामः ॥ अथातोधर्मजिज्ञासा ॥ अथातोब्रह्मजिज्ञासा ॥ तच्छंयोरावृ
णीमहेगातुंयज्ञायगातुंयज्ञपतयेदैवीस्वस्तिरस्तुनःस्वस्तिर्मानुषेभ्यः॥ ऊर्ध्वंजिगातुभेषजं ॥ शन्नोअस्तुद्वि
पदेशंचतुष्पदे ॥ ॐ नमोब्रह्मणेनमोअस्त्वग्नयेनमःपृथिव्यैनमओषधीभ्यः ॥ नमोवाचेनमोवाचस्पतयेन

मोविष्णवेमहतेकरोमि ॥ नमोब्र०मि ॥ नमो०मि ॥ दृष्टिरसिदृष्टमेपाप्मानमृतात्सत्यमुपागांसर्वैः
सहउथ्थाय ॥ संज्ञानंमुशनावदत्संज्ञानंवरुणोवदत् ॥ संज्ञानमिंद्रश्चाग्निश्चसंज्ञानंसवितावदत् ॥ उ
त्सृष्टावैवेदाः ॥ इत्युक्त्वाजलंस्पृशेयुः आचार्यःप्रायश्चित्तादिहोमशेषंसमाप्यअयाश्चेत्यस्यविमदोया
अग्निःपंक्तिःप्रायश्चित्ताज्यहोमेविनियोगः ॥ ॐ अयाश्चाग्नेस्यनभिशस्तीश्चसत्यमित्वमयाआसि ॥ अ
यासावयसाकृतोयासन्हव्यमूहिषेयानोधेहिभेषजंस्वाहा ॥ अयसेग्नयइदंनमम ॥ अतोदेवामेधातिथिर्दे
वागायत्री ॥ प्रायश्चित्ताज्यहोमेवि० ॥ ॐ अतोदेवाअवंतुनोयतोविष्णुर्विचक्रमे ॥ पृथिव्याःसप्तधा
मभिःस्वाहा ॥ देवेभ्यइ० ॥ इदंविष्णुःकाण्वोमेधातिथिर्विष्णुर्गायत्री ॥ प्रायश्चित्ताज्यहोमेवि० ॥
ॐ इदंविष्णुर्विचक्रमेत्रेधानिदधेपदं ॥ समूळ्हमस्यपांसुरेस्वाहा ॥ विष्णवइ० ॥ व्यस्तसमस्तव्याहृ
तीनांविश्वामित्रजमदग्निभरद्वाजप्रजापतयोग्निवायुसूर्यप्रजापतयोगायत्र्युष्णिगनुष्टुब्बृहत्यश्छंदांसि ॥
प्रायश्चित्ताज्यहोमेवि० ॥ ॐ भूःस्वाहा ॥ अग्नयइ० ॥ भुवःस्वाहा ॥ वायवइ० ॥ ॐ स्वःस्वा
हा ॥ सूर्यायेदं० ॥ ॐ भूर्भुवःस्वःस्वाहा ॥ प्रजापतयइ० ॥ अनाज्ञातमितिमंत्रद्वयस्यहिरण्यगर्भो
ग्निरनुष्टुप् ॥ ज्ञाताज्ञातदोषनिबर्हणार्थंप्रायश्चित्ताज्यहोमे० ॥ ॐ अनाज्ञातंयदाज्ञातंयज्ञस्यक्रियतेमिथु ॥

अग्नेतदस्यकल्पयत्वꣳहिवेत्थयथातथꣳस्वाहा ॥ अग्नयइदं० ॥ ॐ पुरुषसंमितोयज्ञोयज्ञःपुरुषसंमि
तः ॥ अग्नेतदस्यकल्पयत्वꣳहिवेत्थयथातथꣳस्वाहा ॥ अग्नयइ० ॥ यत्पाकत्रेत्याप्त्यस्त्रितोग्निस्त्रिष्टुप्
न्यूनातिरिक्तपरिपूर्णार्थंप्रायश्चित्ताज्यहोमेवि० ॥ ॐ यत्पाकत्रामनसादीनदक्षानयज्ञस्यमन्वतेमर्त्या
सः ॥ अग्निष्टद्धोताक्रतुविद्विजानन्यजिष्ठोदेवाँ ऋतुशोयजातिस्वाहा ॥ अग्नयइ० ॥ यद्वोदेवाअभि
नपामरुतस्त्रिष्टुप् ॥ मंत्रतंत्रविपर्यासादिनियतनैमित्तिकप्रायश्चित्ताज्यहो० ॥ ॐ यद्वोदेवाअतिपात
यानिवाचाचप्रयुतीदेवहेळनं ॥ अरायोअस्माँअभिदुच्छुनायतेन्यत्रास्मन्मरुतस्तंनिधेतनस्वाहा ॥ मरु
द्भ्यइ० ॥ होमसांगतासिध्यर्थंसर्वप्रायश्चित्तंकरिष्ये ॥ ॐ भुर्भुवःस्वःस्वाहा ॥ प्रजापतयइ० ॥ ॐ
विश्वेभ्योदेवेभ्यःस्वा० ॥ विश्वेभ्योदेवेभ्य० ॥ ततस्तंडुलकणान्समिद्दर्भशकलानद्भिःप्रोक्ष्याग्नौ
प्रहरेत् ॥ अथावभृथस्नानीयपूर्णपात्रजलेनमार्जनंकुर्यात् ॥ तद्यथा ॥ पूर्वासादितंपूर्णपात्र
मास्तीर्णेबर्हिषिदक्षिणपाणिनानिधाय ॥ तत्रगंगादिपुण्यनदीः स्मरन्दक्षिणपाणिनास्पृशन् ॥
ॐ पूर्णमसिपूर्णमेभूयाः सुपूर्णमसिसुपूर्णमेभूयाः सदसिसन्मेभूयाः सर्वमसिसर्वमेभू
याः ॥ अक्षितिरसिमामेक्षेष्ठाः ॥ इतिजपित्वाकुशाग्रैःप्रागादिपंचदिक्षुजलंमंत्रैःसिंचेत् ॥ प्राच्यां

दिशिदेवाऋत्विजोमार्जयंतां ॥ दक्षिणस्यांदिशिमासाःपितरोमार्जयंताम् ॥ प्रतीच्यांदिशिग्रहाः प्रशवो
मार्जयंतां ॥ उदीच्यांदिश्यापऔषधिवनस्पतयोमार्जयंतां ॥ ऊर्ध्वायांदिशियज्ञः संवत्सरः प्रजापतिर्मा
र्जयतां ॥ कुशाग्रैः स्वशिरसिमार्जयेत् ॥ आपोअस्मानित्यस्यदेवश्रवाआपस्त्रिष्टुप् ॥ मार्जनेवि० ॥
ॐ आपोअस्मान्मातरःशुंधयंतुघृतेननोघृतप्वःपुनंतु ॥ विश्वंहिरिप्रंप्रवहंतिदेवीरुदिदाभ्यः शुचिरापूतएं
मि ॥ इदमापः सिंधुद्वीपआपोनुष्टुप् ॥ मार्जनेवि० ॥ ॐ इदमापः प्रवहतयत्किंचदुरितंमयि ॥ यद्वा
हमभिदुद्रोहयद्वाशेपउतानृतं ॥ सुमित्र्यानआपओषधयःसंतुदुर्मित्र्यास्तस्मैसंतु ॥ मार्जनंकृत्वा ॥ यो
स्मान्द्वेष्टियंचवयंद्विष्मस्तंहन्मि ॥ इतिनिर्ऋतिदेशेकुशाग्रैरपःचिंचेत् ॥ अथस्ववामपाणावुत्तानेबर्हि
षिनिधाय ॥ तत्रदक्षिणपाणिनापूर्णपात्रमादाय ॥ माहंप्रजांपरासिचंयानः सयावरीस्थन ॥ समुद्रेवो
निनयानिः स्वंपाथोअपीथ ॥ ताआपःसमुद्रंगच्छंतीतिध्यात्वा ॥ पाणिस्थजलेनात्मानंशिष्यांश्चप्रोक्षये
त् ॥ भागीरथिभागीरथि ॥ ततःकर्त्ताग्नेर्वायव्यास्थितःसंस्थाजपेनोपतिष्ठेत् ॥ अग्नेत्वन्नइतिचतसृणां
गौपायना लौपायनावा बंधुःसुबंधुःश्रुतबंधुर्विप्रबंधुश्चेकर्चाऋषयः ॥ अग्निर्देवता ॥ द्विपदाविरा
ट्छंदः ॥ अग्न्युपस्थानेवि० ॥ ॐअग्नेत्वन्नोअंतमउतत्राताशिवोभवावरूथ्यः ॥ वसुरग्निर्वसुश्रवाअ

च्छानक्षिद्युमत्तमंरयिंदाः ॥सनोबोधिश्रुधीहवमुरुष्याणोअघायतःसमस्मात् ॥ तंत्वाशोचिष्ठदीदिवःसुम्ना
यनूनमीमिहेसखिभ्यः ॥ ॐ चमेस्वरश्चमेयज्ञोपचतेनमश्च ॥ यत्तेन्यूनंतस्मैतउपयत्तेतिरिक्तंतस्मैतेनमः
॥ अग्नयेनमः ॥ स्वस्ति ॥ श्रद्धांमेधांयशःप्रज्ञांविद्यांबुद्धिंश्रियंबलं ॥ आयुष्यंतेजआरोग्यंदेहिमेहव्य
वाहन ॥ देहिमेहव्यवाहनोन्नमः मानस्तोकइतिकुत्सोरुद्रोजगती ॥ विभूतिग्रहणेविनियोगः ॥ ॐ
मानस्तोकेतनयेमानआयौमानोगोषुमानोअश्वेषुरीरिषः ॥ वीरान्मानोरुद्रभामितोवधीर्हविष्मंतःसदामि
त्वाहवामहे ॥ इतिस्रुवबिलपृष्टेनविभूतिंगृहीत्वा ॥ ॐ त्र्यायुषंजमदग्नेरितिललाटे ॥ कश्यपस्यत्र्या
युषमितिकंठे ॥ अगस्त्यस्यत्र्यायुषमितिनाभौ ॥ यद्देवानांत्र्यायुषमितिदक्षिणस्कंधे ॥ तन्मेअस्तुत्र्या
युषमितिवामस्कंधे ॥ सर्वमस्तुशतायुषमितिशिरसिधारयेत् ॥ कर्त्तापरिस्तरणानिविसृज्यअग्निंपरिसमु
ह्यपरिषिच्यपुष्पादिभिरलंकृत्यनैवेद्यंतांबूलंचनिवेद्य ॥ आचम्य प्राणानायम्यशुभतिथौममशरीरशुध्य
र्थंउत्सर्जनांगत्वेनभस्मस्नानंकरिष्येभस्ममादाय ईशानःसर्वविद्यानामितिमंत्रेणशिरसि तत्पुरुषायेति
मंत्रेणमुखे अघोरेभ्योइतिमंत्रेणहृदये वामदेवायेतिमंत्रेण गुह्ये सद्योजातायेतिमंत्रेण पादयोः ॐ
सर्वांगे ॥ ॐ आपोहिष्ठामयोभुव स्तानऊर्जेदधातन ॥ महेरणायचक्षसे ॥ योवःशिवतमोरसस्तस्यभा

जयतेहनः ॥ उशतीरिवमातरः ॥ तस्माअरंगमामवोयस्यक्षयायजिन्वथ ॥ आपोजनयथाचनः ॥ इ
तितिसृभिर्मार्जयित्वा आचम्य गोमयस्नानंकरिष्येगोमयमादाय ॥ प्रणवेनदिक्षुदक्षिणभागं तीर्थेचउत्त
रभागंप्रक्षिप्य शेषं मानस्तोकेतनयेमानआयौमानोगोषुमानोअश्वेषुरीरिषः ॥ वीरान्मानोरुद्र भामितोव
धीर्हविष्मंतःसदमित्वाहवामहे ॥ इत्यभिमंत्र्य गंधद्वारांदुराधर्षांनित्यपुष्टांकरीषिणीं ॥ ईश्वरींसर्वभूतानां
तामिहोपव्हयेश्रियं ॥ अग्रमग्रंचरंतीनामोषधीनांवनेवने ॥ तासामृषभपत्नीनांपवित्रंकायशोधनं ॥ यन्मे
रोगांश्चशोकांश्चनुदगोमयसर्वदा ॥ इतिशिरःप्रभृत्यंगानिविलिप्य ॥ स्नात्वा ॥ ॐ आपोहि • नः ॥ आ
चम्य प्राणानायम्य ॥ ममशरीरशुध्यर्थं उत्सर्जनांगत्वेन मृत्तिकास्नानंकरिष्ये ॥ ॐ बळित्थापर्वतानांखिद्रं
बिभर्षिपृथिवि॥प्रयाभूमिंप्रवत्वतिमन्हाजिनोषिमहिनि॥इतिभूमिंप्रार्थ्यॐमावोरिषत्खनितायस्मैचाहंख
नामिवः ॥ द्विपच्चतुष्पदस्माकंसर्वमस्त्वनातुरं ॥ इतिखनित्वा॥ॐस्योनापृथिविभवानृक्षरानिवेशनी ॥ य
च्छानःशर्मसप्रथाःइतिमृदमादाय ॐ आयनेतेपरायणेदूर्वारोहंतुपुष्पिणीः ॥ ऱ्हदाश्चपुंडरीकाणिसमुद्रस्य
गृहाइमे ॥ इतिदूर्वामादाय ॐ तत्सवितु • त् ॥ इतिमृदमभ्युक्ष्यभूमौनिधाय ॐ त्रातारमिंद्रमविता

रमिंद्रंहवेहवेसुहवंशूरमिंद्रं ॥ ह्वयामिशक्रंपुरुहूतमिंद्रंस्वस्तिनोमघवाधात्विंद्रः ॥ इतिपूर्वस्यां ॐ य
मायमधुमत्तमंराज्ञेहव्यंजुहोतन ॥ इदंनमऋषिभ्यः पूर्वजेभ्यःपूर्वेभ्यः पथिकृद्भ्यः इतिदक्षिणे ॐ
तत्वायामिब्रह्मणावंदमानस्तदाशास्तेयजमानोहविर्भिः ॥ अहेळमानोवरुणेहबोध्युरुशंसमानआयुःप्र
मोषीः ॥ इतिपश्चिमे ॐ वयंसोमव्रतेतवमनस्तनूषुबिभ्रतः ॥ प्रजावंतः सचेमहि ॥ इत्युत्तरे ॥
तत्सूर्यंरोदसीउभेदोषावस्तोरुपब्रुवे ॥ भोजेष्वस्माँअभ्युच्चरासदा ॥ उपरिष्टात् ॥ अधःपश्य
स्वमोपरिसंतरांपादकौहर ॥ मातेकशप्लकौदृशन्स्त्रीहिब्रह्माबभूविथ ॥ अधः ॥ सहस्रशीर्षापुरुषः
सहस्राक्षःसहस्रपात् ॥ सभूमिंविश्वतोवृत्वात्यतिष्ठद्दशांगुलं ॥ इतिशिरसि ॥ ॐ अक्षीभ्यांतेनासि
काभ्यांकर्णाभ्यांछुबुकादधि ॥ यक्ष्मंशीर्षण्यंमस्तिष्काज्जिव्हायाविवृहामिते ॥ इतिमुखे ॥ ॐ ग्रीवा
भ्यस्तउष्णिहाभ्यः कीकसाभ्योअनूक्यात् ॥ यक्ष्मंदोषण्यंमंसाभ्यांबाहुभ्यांविवृहामिते ॥ कंठे ॥
आंत्रेभ्यस्तेगुदाभ्योवनिष्ठोर्हृदयादधि ॥ यक्ष्मंमतस्नाभ्यांयक्नःप्लाशिभ्योविवृहामिते ॥ हृदये ॥ नाभा
नाभिंनआददेचक्षुश्चित्सूर्येसचा ॥ कवेरपत्यमादुहे ॥ नाभौ ॥ त्वमिंद्रसजोषसमर्कंबिभर्षिबाव्होः ॥

वज्रंशिशानओजसा ॥ बाव्हो: ॥ सोमानंस्वरणंकृणुहिब्रह्मणस्पते ॥ कक्षीवंतंयऔशिजः ॥ क
क्ष्योः ॥ यःकुक्षिःसोमपातमःसमुद्रइवपिन्वते ॥ उर्वीरापोनकाकुदः ॥ कुक्ष्योः ॥ बव्हीनांपिता
बहुरस्यपुत्रश्चिश्चाकृणोतिसमनावगत्य ॥ इषुधिःसंकाःपृतनाश्चसर्वाःपृष्ठेनिनद्धोजयतिप्रसूतः ॥ पृ
ष्ठे ॥ ऊरुभ्यांतेअष्ठीवद्भ्यांपार्ष्णिभ्यांप्रपदाभ्यां ॥ यक्ष्मंश्रोणिभ्यांभासदाद्भंससोविवृहामिते ॥ ऊ
र्वोः ॥ मेहनाद्वनंकरणाल्लोमभ्यस्तेनखेभ्यः ॥ यक्ष्मंसर्वस्मादात्मनस्तमिदंविवृहामिते ॥ जान्वोः ॥
एतावानस्यमहिमातोज्यायांश्चपूरुषः ॥ पादोस्यविश्वाभूतानित्रिपादस्यामृतंदिवि ॥ पादयोः ॥
यस्यविश्वानिहस्तयोः पंचक्षितीनांवसु ॥ स्पाशयस्वयोअस्मध्रुग्दिव्येवाशनिर्जहि ॥ हस्तयोः ॥ अं
गादंगाल्लोम्नोलोम्नोजातंपर्वणिपर्वणि ॥ यक्ष्मंसर्वस्मादात्मनस्तमिदंविवृहामिते ॥ पुरुषसूक्तेनच
सर्वांगे ॥ सहस्रशीर्षापुरुषःसहस्राक्षःसहस्रपात् ॥ सभूमिंविश्वतोवृत्वात्यतिष्ठद्दशांगुलं ॥ पुरु
षएवेदंसर्वंयद्भूतंयच्चभव्यं ॥ उतामृतत्वस्येशानोयदन्नेनातिरोहति ॥ एतावानस्यमहिमातोज्यायांश्चपू
रुषः ॥ पादोस्यविश्वाभूतानित्रिपादस्यामृतंदिवि ॥ त्रिपादूर्ध्वउदैत्पुरुषःपादोस्येहाभवत्पुनः ॥ त

तोविष्वङ्व्यक्रामत्साशनानशनेअभि ॥ तस्माद्विराळजायतविराजोअधिपूरुषः ॥ सजातोअत्यरिच्य
तपश्चाद्भूमिमथोपुरः ॥ १ ॥ यत्पुरुषेणहविषादेवायज्ञमतन्वत ॥ वसंतोअस्यासीदाज्यंग्रीष्मइ
ध्मःशरद्धविः ॥ तंयज्ञंबर्हिषिप्रौक्षन्पुरुषंजातमग्रतः ॥ तेनदेवाअयजंतसाध्याऋषयश्चये ॥ तस्मा
द्यज्ञात्सर्वहुतःसंभृतंपृषदाज्यं ॥ पशूंतांश्चक्रेवायव्यानारण्यान्ग्राम्याश्चये ॥ तस्माद्यज्ञात्सर्वहुत
ऋचःसामानिजज्ञिरे ॥ छंदांसिजज्ञिरेतस्माद्यजुस्तस्मादजायत ॥ तस्मादश्वाअजायंतयेकेचोभयाद
तः ॥ गावोहजज्ञिरेतस्मात्तस्माज्जाताऽअजावयः ॥ २ ॥ यत्पुरुषंव्यदधुःकतिधाव्यकल्पयन् ॥
मुखंकिमस्यकौबाहूकाऊरूपादाउच्येते ॥ ब्राह्मणोस्यमुखमासीद्बाहूराजन्यःकृतः ॥ ऊरूतदस्ययद्वै
श्यःपद्भ्यांशूद्रोअजायत ॥ चंद्रमामनसोजातश्चक्षोःसूर्योअजायत ॥ मुखादिंद्रश्चाग्निश्चप्राणाद्वायुरजा
यत ॥ नाभ्याऽआसीदंतरिक्षंशीर्ष्णोद्यौःसमवर्तत ॥ पद्भ्यांभूमिर्दिशःश्रोत्रात्तथालोकांअकल्पयन् ॥
सप्तास्यासन्परिधयस्त्रिःसप्तसमिधःकृताः ॥ देवायद्यज्ञंतन्वानाअबध्नन्पुरुषंपशुं ॥ यज्ञेनयज्ञम
यजंतदेवास्तानिधर्माणिप्रथमान्यासन् ॥ तेहनाकंमहिमानःसचंतयत्रपूर्वेसाध्याःसंतिदेवाः ॥
अश्वक्रांतेरथक्रांतेविष्णुक्रांतेवसुंधरे ॥ शिरसाधारयिष्यामिरक्षस्वमांपदेपदे ॥ सतिलदूर्वामृदौशि

रसिनिधाय ॥ मृत्तिकास्थानंप्रक्षाल्य, तीर्थंप्रार्थयेत् ॥ हिरण्यशृंगंवरुणंप्रपद्येतीर्थंमेदेहियाचि
तः ॥ यन्मयाभुक्तमसाधूनांपापेभ्यश्चप्रतिग्रहः ॥ यन्मेमनसावाचाकर्मणावादुष्कृतंकृतम् ॥ त
न्नइंद्रोवरुणोबृहस्पतिःसविताचपुनंतुपुनःपुनः ॥ इमंमेगंगेयमुनेसरस्वतिशुतुद्रिस्तोमंसचतापरु
ष्ण्या ॥ असिक्न्यामरुद्वृधेवितस्तयार्जीकीयेशृणुह्यासुषोमया ॥ इदंतेन्याभिरसमानमद्भिर्याःकाश्च
सिंधुंप्रवहंतिनद्यः ॥ सर्पोजीर्णामिवत्वचंजहातिपापंसशिरस्कोभ्युपेत्य ॥ गंगागंगेतियोब्रूयाद्योज
नानांशतैरपि ॥ मुच्यतेसर्वपापेभ्योविष्णुलोकंसगच्छति ॥ सुमित्र्यानआपओषधयःसंतु ॥ दुर्मि
त्र्यास्तस्मैसंतु ॥ योस्मान्द्वेष्टियंचवयंद्विष्मस्तंहन्मि ॥ समुद्रज्येष्ठाःसलिलस्यमध्यात्पुनानायंत्यनि
विशमानाः ॥ इंद्रोयावज्रीवृषभोररादताआपोदेवीरिहमामवंतु ॥ याआपोदिव्याउतवास्रवंतिख
नित्रिमाउतवायाः स्वयंजाः ॥ समुद्रार्थायाःशुचयःपावकास्ताआपोदे० ॥ यासांराजावरुणोयाति
मध्येसत्यानृतेअवपश्यंजनानां ॥ मधुश्चुतः शुचयोयाः पावकास्ताआपोदे० ॥ यासुराजावरुणो
यासुसोमोविश्वेदेवायासूर्जंमदंति ॥ वैश्वानरोयास्वग्निः प्रविष्टस्ताआपोदे० ॥ एतोन्विंद्रंस्तवाम

शुद्धंशुद्धेनसाम्ना ॥ शुद्धैरुक्थैर्वावृध्वांसंशुद्धआशीर्वान्ममत्तु ॥ इंद्रंशुद्धोनआगहिशुद्ध : शुद्धाभिरू
तिभिः ॥ शुद्धोरयिंनिधारयशुद्धोममद्धिसोम्यः ॥ इंद्रशुद्धोहिनोरयिंशुद्धोरत्नानिदाशुषे ॥ शुद्धो
वृत्राणिजिघ्नसेशुद्धोवाजंसिषाससि ॥ तरत्समंदीधावतिधारासुतस्यांधसः ॥ तरत्समंदीधावति ॥
उस्रावेदवसूनांमर्तस्यदेव्यवसः ॥ त० ॥ ध्वस्रयोः पुरुषंत्योरासहस्राणिदद्महे ॥ त० ॥
आययोस्त्रिंशतंतनासहस्राणिचदद्महे ॥ त० त्रिभिष्ट्वंदेवसवितर्वर्षिष्ठैः सोमधामभिः ॥ अग्ने
दक्षैः पुनीहिनः ॥ पुनंतुमांदेवजनाःपुनंतुवसवोधिया ॥ विश्वेदेवाः पुनीतमाजातवेदः पुनीहि
मा ॥ प्रप्यायस्वप्रस्यंदस्वसोमविश्वेभिरंशुभिः ॥ देवेभ्यउत्तमंहविः ॥ उपप्रियंपनिप्रतंयुवान
माहुतीवृधं ॥ अगन्मबिभ्रतोनमः ॥ अलाय्यस्यपरशुर्ननाशतमापवस्वदेवसोम ॥ आखुंचिदेवदेव
सोम ॥ यःपावमानीरध्येत्यृषिभिःसंभृतंरसं ॥ सर्वंसपूतमश्नातिस्वदितंमातरिश्वना ॥ पावमानी
र्योअध्येत्यृषिभिः संभृतंरसं ॥ तस्मैसरस्वतीदुहेक्षीरंसर्पिर्मधूदकं ॥ १८ ॥ पावमानीः स्व
स्त्ययनीःसुदुघाहिघृतश्चुतः ॥ ऋषिभिःसंभृतोरसोब्राह्मणेष्वमृतंहितं ॥ पावमानीर्दिशंतुनऽइमं

लोकमथोअमुं ॥ कामान्त्समर्धयन्तुनोदेवैर्देवीःसमाहिताः ॥ येनदेवाःपवित्रेणात्मानंपुनतेसदा ॥
तेनसहस्रधारेणपावमान्यःपुनंतुमां ॥ प्राजापत्यंपवित्रंशतोद्यामंहिरण्ययं ॥ तेनब्रम्हविदोवयंपूतंब्र
ह्मपुनीमहे ॥ इंद्रःसुनीतीसहमापुनातुसोमःस्वस्त्यावरुणःसमीच्या ॥ यमोराजाप्रमृणाभिःपुनातुमा
जातवेदामूर्जयंत्यापुनातु ॥ ऋषयस्तुतपस्तेपुःसर्वेस्वर्गजिगीषवः ॥ तपसस्तपसोग्रियंतुपावमा
नीर्ऋचोब्रवीत् ॥ १ ॥ अपोहिष्ठेतितिसृभिःऋग्भिः ॥ मार्जनंकृत्वा ॥ इमंमेगंगेयमुने॰ ॥ अ
सिक्न्या॰ षोमया ॥ इत्युदकमालोड्य ॥ ऋतंचेतितृचस्यसूक्तस्यमाधुच्छंदसोघमर्षणऋषिः ॥
भाववृत्तोदेवता ॥ अनुष्टुप्छंदः ॥ अघमर्षणेविनि॰ ॥ ॐ ॥ ऋतंचसत्यंचाभीद्धात्तपसोध्य
जायत ॥ ततोरात्र्यजायतततः समुद्रोअर्णवः ॥ समुद्रादर्णवादधिसंवत्सरोअजायत ॥ अहोरात्रा
णिविदधद्विश्वस्यमिषतोवशी ॥ सूर्याचंद्रमसौधातायथापूर्वमकल्पयत् ॥ दिवंचपृथिवींचांतरिक्षम
थोस्वः ॥ इतिअघमर्षणंकृत्वा ॥ प्रवाहाभिमुखस्त्रिर्मार्जयेत् ॥ स्नानांगतर्पणंकुर्यात् ॥ ब्रह्मादयो
येदेवाः ॥ तान्देवांस्तर्पयामि ॥ भूर्देवांस्तर्पयामि ॥ भुवर्देवांस्तर्प॰ ॥ स्वर्देवांस्तर्प॰ ॥ भू

भुवःस्वर्देवांस्तर्पयामि ॥ निवीती ॥ कृष्णद्वैपायनादयोयेऋषयः ॥ तान्ऋषींस्त० ॥ भूर्ऋषीन्० ॥ भुवर्ऋषीन्० ॥ स्वर्ऋषीन्० ॥ भूर्भुवःस्वर्ऋषीन्० ॥ प्राचीनावीती ॥ सोमःपितृमान्यमोंगिरस्वा नग्निष्वात्तादयोयेपितरः ॥ तान्पितॄन्० ॥ भूःपितॄन्० ॥ स्वःपितॄन्० ॥ भूर्भुवःस्वःपितॄन्० ॥ अग्निदग्धाश्चयेजीवायेप्य दग्धाःकुलेमम ॥ भूमौदत्तेनतोयेनतृप्तायांतुपरांगार्ति ॥ इतिजलांजलिंतटेनिक्षिप्य ॥ यन्मयादूषितंतोयंशारीरमलसंभवात् ॥ तद्दोषपरिहारार्थंयक्ष्माणंतर्पयाम्यहं ॥ यक्ष्मतर्पणंकृत्वा ॥

॥ ५१ ॥ अथ ऋषिपूजन विधि प्रारंभः ॥

श्रीगणेशायनमः ॥ ॥ ऋषीन्पूजयेत् ॥ ऋषीन्दर्भमयान्कृत्वापूजयेत्तर्पयेत्ततः ॥ आचम्यप्राणानायम्यदेशकालौस्मृत्वाउत्सर्जनांगत्वेनकश्यपादिसप्तऋषिपूजनंकरिष्ये ॥ निवीती ॥ ॐ ऋषेमंत्रकृतांस्तोमैःकश्यपोद्वर्धयन्गिरः ॥ सोमंनमस्यराजानंयोजज्ञेवीरुधांपतिरिंद्रायेंदोपरिस्रव ॥ कश्यपायनमः कश्यपंआवाहयामि ॥ ॐ अत्रिर्यद्वामवरोहंन्नृबीसमजोहवीन्नाधमानेवयोषा ॥ श्येनस्यचिज्जवसानूतनेनागच्छतमाश्विनाशंतमेन ॥ अत्रयेनमः ॥ अत्रिं० ॥ ॐ एवानःस्पृधःसमजासमस्त्विंद्रारारंधिमिथतीरदेवीः ॥ विद्यामवस्तोरवसागृणंतोभरद्वाजाउततंइंद्रनूनं ॥ भरद्वाजायनमः ॥ भरद्वाजं० ॥ ॐ

एवातेवयमिंद्रभुंजतीनांविद्यामसुमतीनांनवानां ॥ विद्यामवस्तोरवसागृणंतोविश्वामित्राउततइंद्रनूनं ॥
विश्वामित्राय० ॥ विश्वामित्रं० ॥ ॐ अभित्वागोतमागिराजातवेदोविचर्षणे ॥ द्युम्नैरभिप्रणोनुमः
॥ गौतमाय० ॥ गौतमंआ० ॥ ॐ गृणानाजमदग्निनायोनावृतस्यसीदतं ॥ पातंसोममृतावृधा ॥
जमदग्नये० ॥ जमदग्निं० ॥ उतासिमैत्रावरुणोवसिष्ठोर्वश्यांब्रह्मन्मनसोधिजातः ॥ द्रप्संस्कन्नंब्रह्म
णादैव्येनविश्वेदेवाःपुष्करेत्वाददंत ॥ वसिष्ठायनमः ॥ वसिष्ठं० ॥ ॐ अत्रेर्यथानुसूयास्याद्वसिष्ठस्या
प्यरुंधती॥कौशिकस्ययथासतीतथात्वमपिभर्तरि ॥ अरुंधत्यैनमः अरुंधतींआ० ॥तदस्तुमित्रावरुणातदग्ने
शंयोरस्मभ्यमिदमस्तुशस्तं ॥ अशीमहिगाधमुतप्रतिष्ठांनमोदिवेबृहतेसादनाय ॥ गृहावैप्रतिष्ठासूक्तंतत्प्र
तिष्ठिततमयावाचाशंस्तव्यंतस्माद्यद्यपिदूरइवपशूंल्लभतेगृहानेवैनानाजिगमिषतिगृहाहिपशूनांप्रतिष्ठाप्र
तिष्ठा ॥ कश्यपाद्यावाहितदेवताभ्योनमः ॥ सुप्रतिष्ठितमस्तु ॥ ॐ देवाएतस्यामवदंतपूर्वेसप्तऋषयःस्तप
सेयेनिषेदुः ॥ भीमाजायाब्राह्मणस्योपनीतादुर्धांदधातिपरमेव्योमन् ॥ इतिमंत्रेणषोडशोपचारैःपूजयेत् ॥
अरुंधत्यैनमःहरिद्राकुंकुमादिसौभाग्यद्रव्यंसमर्पयामि ॥ अनेनपूजनेनऋषयःप्रीयंतां ॥ श्रीकृष्णा
र्पणमस्तु ॥ ॥ ७ ॥ ॥ इति ऋषि पूजन विधिःसमाप्तः ॥ ॥ ७ ॥ ॥ ७ ॥

॥ ६२ ॥ अथ तर्पण विधि प्रारंभः ॥

श्रीगणेशायनमः ॥ ॥ अथतर्पणं ॥ निवीती ॥ कश्यपंतर्पयामि ॥ अत्रिंत० ॥ भरद्वाजंत० ॥ विश्वामित्रंत० ॥ गौतमंत० ॥ जमदग्निंत० ॥ वसिष्ठंत० ॥ अरुंधतींत० ॥ सव्यं ॥ सावित्रींत० ॥ ब्रह्माणंत० ॥ श्रद्धांत० ॥ मेधांत० ॥ प्रज्ञांत० ॥ धारणांत० ॥ सदसस्पतिंत० ॥ अनुमतिंत० ॥ छंदांस्यृषीन्त० ॥ अग्निंत० ॥ अप्तृणसूर्यंत० ॥ अग्निंत० ॥ शकुंतंत० ॥ अग्निंत० ॥ मित्रावरुणौतृप्यतां० ॥ अग्निंत० ॥ अपस्त० ॥ अग्निंत० ॥ मरुतस्त० ॥ अग्निंत० ॥ विश्वान्देवान्त० ॥ अग्निंत० ॥ इंद्रासोमौतृप्यतां० ॥ इंद्रंत० ॥ अग्नामरुतस्तर्प० ॥ पवमानसोमंत० ॥ सोमं० ॥ अग्निंत० ॥ संज्ञानंत० ॥ ब्रह्मयज्ञतर्पणं ॥ प्रजापतिस्तृप्यतु ॥ ब्रह्मातृप्यतु ॥ वेदास्तृप्यंतु ॥ देवास्तृप्यंतु ॥ ऋषयस्तृप्यंतु ॥ सर्वाणिच्छंदांसितृप्यंतु ॥ ॐ कारस्तृप्यतु ॥ वषट्कारस्तृप्यतु ॥ व्याहृतयस्तृप्यंतु ॥ सावित्रीतृप्यतु ॥ यज्ञास्तृप्यं० ॥ द्यावापृथिवीतृप्यतां ॥ अंतरिक्षंतृप्यतु ॥ अहोरात्राणितृप्यंतु ॥ सांख्यास्तृप्यंतु ॥ सिद्धास्तृप्यंतु ॥ समुद्रास्तृप्यंतु ॥ नद्यस्तृप्यंतु ॥ गिरयस्तृप्यंतु ॥ क्षेत्रौषधिवनस्पतिगंधर्वाप्सरसस्तृप्यंतु ॥ नानास्तृप्यंतु ॥ वयांसितृप्यंतु ॥ गाव

स्तृप्यंतु ॥ साध्यास्तृप्यंतु ॥ विप्रास्तृप्यंतु ॥ यक्षास्तृप्यंतु ॥ रक्षांसितृप्यंतु ॥ भूतानितृप्यंतु ॥ एवमं
तानितृप्यंतु ॥ अथऋषयः ॥ निवीती ॥ शतर्चिनस्तृप्यंतु ॥ माध्यमास्तृप्यंतु ॥ गृत्समदस्तृप्यतु ॥
विश्वामित्रस्तृप्यतु ॥ वामदेवस्तृप्यतु ॥ अत्रिस्तृप्यतु ॥ भरद्वाजस्तृप्यतु ॥ वसिष्ठस्तृप्यतु ॥ प्रगा
थास्तृप्यंतु ॥ पावमान्यस्तृप्यंतु ॥ क्षुद्रसूक्तास्तृप्यंतु ॥ महासूक्तास्तृप्यंतु ॥ प्राचीनावीती तिलोद
केन ॥ अपसव्यंद्विजाग्र्याणांपित्र्येसर्वंप्रकीर्तितं ॥ आप्रकोष्ठात्प्रकर्तव्यंमातापित्रोस्तुजीवतःइति ॥
सुमंतुजैमिनिवैशंपायनपैलसूत्रभाष्यभारतमहाभारतधर्माचार्यास्तृप्यंतु ॥ जानंतिवाहविगार्ग्यगौतमशा
कल्यबाभ्रव्यमांडव्यमांडूकेयास्तृप्यंतु ॥ गर्गीवाचक्नवीतृप्यतु ॥ वडवाप्रातीथेयीतृप्यतु ॥ सुलभामैत्रे
यीतृप्यतु ॥कहोळंतर्पयामि ॥कौषीतकंतर्प० ॥ महाकौषीतकंत० ॥ पैंग्यंत० ॥ महापैंग्यंत० ॥ सु
यज्ञंत० ॥ सांख्यायनंत० ॥ ऐतरेयंत० ॥ महैतरेयंत० ॥ शाकलंत० ॥ बाष्कलंत० ॥ सुजातवक्त्रं
त० ॥ औदवाहिंत० ॥ महौदवाहिंत० ॥ सौजामिंत० ॥ शौनकंत० ॥ आश्वलायनंत० ॥ येचा
न्येआचार्यास्तेसर्वेतृप्यंतु ॥ पितृतर्पणं ॥ अस्मत् पितरं ॥ शर्माणं गोत्रं वसुरूपं स्वधानमस्तर्पयामि ॥
अस्मत्पितामहं शर्माणं गोत्रं रुद्ररूपंस्वधानमस्त० ॥ अस्मत्प्रपितामहं शर्माणं गोत्रं आदित्यरू
पस्वधानमस्त० ॥ अस्मत्मातरं दां गोत्रां वसुरूपांस्वधान० ॥ अस्मत्पितामहीं दां गोत्रां रुद्ररू

पांस्वधान० ॥ अस्मत्प्रपितामहीं दां गोत्रां आदित्यरूपांस्वधान० ॥ अस्मत्सापत्नमातरं दां गोत्रां वसुरूपांस्वधान० ॥ अस्मत्मातामहंशर्माणंगोत्रंवसुरूपंस्वधान० ॥ अस्मत्मातुःपितामहं शर्माणं गोत्रं रुद्ररूपंस्वधान० ॥ अस्मत्मातुःप्रपितामहं शर्माणं गोत्रं आदित्यरूपं स्वधानम० ॥ अस्मत्मातामहीं दां गोत्रां वसुरूपां स्वधान० ॥ अस्मत्मातुःपितामहीं दां गोत्रां रुद्ररूपांस्वधानम० ॥ अस्मत् मातुःप्रपितामहीं दां गोत्रांआदित्यरूपांस्वधान० ॥ अस्मत्स्त्रियं दां गोत्रां वसुरूपांस्वधान० ॥ अस्मत्पुत्रं शर्माणं गोत्रं वसुरूपं स्व० ॥ अस्मत्दुहितरं दां गोत्रांवसुरूपांस्वधान० ॥ अस्मत्पितृव्यं शर्माणंगोत्रंसपत्नीकंससुतंवसुरूपंस्वधान०॥अस्मत्मातुलंशर्माणंगोत्रं सपत्नीकंससुतंवसु०स्वधा०॥ अस्मत् भ्रातरं शर्माणं गोत्रं सपत्नीकं ससुतं वसु० ॥ स्वधा० ॥ अस्मत् पितृभागिनीं दां गोत्रां ॥ सभर्तृकांससुतांवसुरूपांस्वधान० ॥ अस्मत्मातृभागिनीं दां गोत्रां सभर्तृकांससुतांवसुरूपांस्वधान० ॥ अस्मत्भगिनीं दां गोत्रां सभर्तृकांससुतांवसुरूपांस्वधान० ॥ अस्मत्श्वशुरं शर्माणं गोत्रं सपत्नीकंससुतंवसुरूपंस्वधान० अस्मत्गुरुं शर्माणं गोत्रं सपत्नीकं ससुतंवसुरूपंस्वधान० ॥ अस्मत् आचार्यगुरुं शर्माणं गोत्रं सपत्नीकं ससुतंवसुरूपंस्वधानमस्तर्पयामि ॥ आब्रह्मस्तंबपर्यंतंदेवर्षिपितृमानवाः ॥ तृप्यंतुपितरःसर्वेमातृमातामहादयः ॥ अतीतकुलकोटीनांसप्तद्वीपनिवासिनां ॥ आब्रह्मभुवना

ल्लोकानिदमस्तुतिलोदकम् ॥ येकेचास्मत्कुलेजाताअपुत्रागोत्रिणोमृताः ॥ तेगृण्हंतुमयादत्तंसूत्रनिष्पी
डनोदकम् ॥ सव्येन अपसव्येनवायमादींस्तर्पयेत् ॥ यमंतर्पयामि ॥ धर्मराजंत० ॥ मृत्युंत० ॥ अंत
कंत० ॥ वैवस्वतंत० ॥ कालंतर्पयामि ॥ सर्वभूतक्षयकरंतर्पयामि ॥ औदुंबरंत० ॥ दध्नंत० ॥ नीलं
त० ॥ परमेष्ठिनंत० ॥ वृकोदरंत० ॥ चित्रंत० ॥ चित्रगुप्तंत० ॥ दक्षिणाभिमुखस्तिष्ठेत् ॥ यमोनिहं
तापितृधर्मराजोवैवस्वतोदंडधरश्चकालः ॥ भूताधिपोदत्तकृतानुसारीकृतांतमेतद्दशभिर्जपंति ॥ इमंमं
त्रंदशवारंजपेत् ॥ उपविश्य ॥ वर्षकृतपापविशुध्यर्थंभीष्मतर्पणंकरिष्ये ॥ वैय्याघ्रपद्यगोत्रायसांकृ
त्यप्रवरायच ॥ अपुत्रायददाम्येतज्जलंभीष्मायवर्मणे ॥ ॥ इतित्रीनंजलीन्दद्यात् ॥ ऋषितीर्थेन ॥
यस्यस्मृत्याचना० ॥ अनेनउत्सर्जनेनभगवान्परमेश्वरःप्रीयतां ॥ नमम ॥ ॥ श्रीकृष्णार्पणमस्तु ॥
गच्छगच्छसुरश्रेष्ठस्वस्थानेपरमेश्वर ॥ यत्रब्रह्मादयोदेवास्तत्रगच्छहुताशन ॥ ॥ इतिउत्सर्जनप्रयो
गःसमाप्तः ॥ ॥ इति तर्पण विधिः समाप्तः ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥ ५३ ॥ ॥ अथ शांतिसूक्त प्रारंभः ॥

श्रीगणेशायनमः ॥ ॥ शांतिसूक्तं ॥ ॐ आनोभद्राःक्रतवोयंतुविश्वतोदब्धासोऽअपरीतासऽउद्भिदः ॥ दे

वानोयथासदमिद्वृधेऽअसन्नप्रायुवोरक्षितारोदिवेदिवे ॥देवानांभद्रासुमतिर्ऋजूयतांदेवानांरातिरभिनोनिव
र्ततां ॥ देवानांसख्यमुपसेदिमावयंदेवानऽआयुःप्रतिरंतुजीवसे॥तान्पूर्वयानिविदाहूमहेवयंभगंमित्रमदि
तिंदक्षमस्रिधं ॥ अर्यमणंवरुणंसोममश्विनासरस्वतीनःसुभगामयस्करत् ॥ तन्नोवातोमयोभुवातुभेषजं
तन्मातापृथिवीतत्पिताद्यौः ॥ तद्ग्रावाणःसोमसुतोमयोभुवस्तदश्विनाशृणुतंधिष्ण्यायुवं ॥ तमीशानं
जगतस्तस्थुषस्पतिंधियंजिन्वमवसेहूमहेवयं ॥ पूषानोयथावेदसामसद्वृधेरक्षितापायुरदब्धःस्वस्तये ॥
॥ १ ॥ स्वस्तिनऽइंद्रोवृद्धश्रवाःस्वस्तिनःपूषाविश्ववेदाः ॥ स्वस्तिनस्तार्क्ष्योअरिष्टनेमिःस्वस्तिनोबृह
स्पतिर्दधातु ॥ पृषदश्वामरुतःपृश्निमातरःशुभंयावानोविदथेषुजग्मयः ॥ अग्निजिव्हामनवःसूरचक्षसो
विश्वेनोदेवाऽअवसागमन्निह ॥ भद्रंकर्णेभिःशृणुयामदेवाभद्रंपश्येमाक्षभिर्यजत्राः ॥ स्थिरैरंगैस्तुष्टुवां
संस्तनूभिर्व्यशेमदेवहितंयदायुः॥ शतमिन्नुशरदोऽअंतिदेवायत्रानश्चक्राजरसंतनूनां ॥ पुत्रासोयत्रपितरो
भवंतिमानोमध्यारीरिषतायुर्गंतोः॥ अदितिर्द्यौरदितिरंतरिक्षमदितिर्मातासपितासपुत्रः॥विश्वेदेवाऽअदि

तिःपंचजनाऽअदितिर्जातमदितिर्जनित्वं ॥२॥ इत्यादिशांतिसूक्तानि ॥ ॥ इति शांतिसूक्तं समाप्तं ॥

॥ ८४ ॥ ॥ अथ पर्जन्यसूक्त प्रारंभः ॥

श्रीगणेशायनमः ॥ ॥ अच्छावदतवसंगीर्भिराभिस्तुहिपर्जन्यंनमसाविवास ॥ कनिक्रदद्वृषभोजी
रदानूरेतोदधात्योषधीषुगर्भं ॥ विवृक्षान्हंत्युतहंतिरक्षसोविश्वंबिभायभुवनंमहावधात् ॥ उतानागाईप
तेवृष्ण्यावतोयत्पर्जन्यस्तनयन्हंतिदुष्कृतः ॥ रथीवकशयाश्वांऽअभिक्षिपन्नाविर्दूतान्कृणुतेवर्ष्यां अह ॥
दूरात्सिंहस्यस्तनथाउदीरतेयत्पर्जन्यःकृणुतेवर्ष्यं नभः ॥ प्रवातावांतिपतयंतिविद्युतउदोषधीर्जिहते
पिन्वतेस्वः ॥ इराविश्वस्मैभुवनायजायतेयत्पर्जन्यःपृथिवींरेतसावति ॥ यस्यव्रतेपृथिवीनन्नमीतियस्य
व्रतेशफवज्जर्भुरीति ॥ यस्यव्रतओषधीर्विश्वरूपाःसनःपर्जन्यमहिशर्मयच्छ ॥ दिवोनोवृष्टिंमरुतोररी
ध्वंप्रपिन्वतवृष्णोअश्वस्यधाराः ॥ अर्वाङेतेनस्तनयित्नुनेह्यपोनिषिंचन्नसुरःपितानः ॥ अभिक्रंद
स्तनयगर्भमाधाउदन्वतापरिदीयारथेन ॥ दृतिंसुकर्षविषितंन्यंचंसमाभवंतूद्वतोनिपादाः ॥ महांतंकोश

मुदंचानिपिंचस्यंदंतांकुल्याविषिताःपुरस्तात् ॥ घृतेनद्यावापृथिवीव्युंधिसुप्रयाणंभवत्वघ्न्याभ्यः ॥
यत्पर्जन्यकनिक्रदस्तनयंन्हंसिदुष्कृतः ॥ प्रतीदंविश्वंमोदतेयत्किंचपृथिव्यामधि ॥ इत्यादिपर्जन्यसू
क्तानिवैदिकाः पठंति श्रीरस्तु ॥ ॥ इति पर्जन्यसूक्तं समाप्तं ॥ ॥ छ ॥ ॥ छ ॥

॥ ५५ ॥ ॥ अथ उपाकर्मप्रयोग प्रारंभः ॥

श्रीगणेशायनमः ॥ ॥ अथोपाकर्मप्रयोगप्रारंभः ॥ आचम्यहृदिदर्भपवित्रेधृत्वाप्राणानायम्य ॥ श्रीम
न्महागणाधिपतयेनमः ॥ इष्टदे० ॥ सुमुखश्चै० ॥ शुभतिथौ ॥ आत्मनः ॥ श्रुतिस्मृतिपु० र्थं ॥
अधीतानांअध्येष्यमाणानांछंदसांयातयामतानिरासेनाप्यायनद्वाराश्रीपरमेश्वरप्रीत्यर्थंउपाकर्माख्यंकर्मक
रिष्ये ॥ आचार्यःएभिर्ब्राह्मणैःसहउपाकर्माख्यंकर्मकरिष्ये ॥ गणपतिंपूजयेत् ॥ नूतनब्रह्मचारीचे
त् ॥ अस्यनवोपनीतब्रह्मचारिणोवेदाध्ययनप्रारंभार्थमुपाकरणंकरिष्ये ॥ तदंगस्वस्तिपुण्याहवाचनंमातृ
कापूजनंनांदीश्राद्धंचकरिष्ये ॥ पुण्याहवाचनंसमाप्य ॥ सर्वैःसहनिवीतीभूत्वाकश्यपादिसप्तऋषीनर्चये
त् ॥ ततउपवीती ॥ उपाकर्मांगहोमंकर्तुंस्थंडिलादिकरिष्ये ॥ तद्गोमयेनप्रदक्षिणमुपालिप्य ॥ दक्षिणेष्टौउ
दीच्यांद्वेप्रतीच्यांचतुःप्राच्यामर्धमित्यंगुलानित्यक्त्वा ॥ दक्षिणोपक्रमामुदकसंस्थांप्रादेशमात्रामेकांलेखां

लिखित्वातस्यादक्षिणोत्तरयोःप्रागायतेपूर्वेरेखयाअसंसृष्टेप्रादेशसंमितेद्वेलेखेलिखित्वा तयोर्मध्येपरस्पर
मसंसृष्टाउदक्संस्थाःप्रागायताःप्रादेशसंमितास्तिस्रइतिषड्लेखायाज्ञियशकलमूलेनदक्षिणहस्तेनोल्लि
ख्य ॥ लेखासुतच्छकलमुदगग्रंनिधाय ॥ स्थंडिलमाद्भिरभ्युक्ष्यशकलमाग्नेय्यांनिरस्यपाणिंप्रक्षाल्यबा
ग्यतोभवेत् ॥ ततस्तैजसेनासंभवेमृन्मयेनवापात्रयुग्मेनसंपुटीकृत्यसुवासिन्याश्रोत्रियागारात्स्वगृहाद्वा
समृत्धानिधूममग्निमाहृतंस्थंडिलादाग्नेय्यांनिधायजुष्टोदमूनाआत्रेयोवसुश्रुतोग्निस्त्रिष्टुप् ॥ एह्यग्नेराहूग
णोगोतमोग्निस्त्रिष्टुप् ॥ अग्न्यावाहनेविनियोगः ॥ ॐ जुष्टोदमूनाअतिथिर्दुरोणइमंनोयज्ञमुपयाहिवि
द्वान् ॥ विश्वाअग्नेअभियुजोविहत्याशत्रूयतामाभरभोजनानि ॥ एह्यग्नइहहोतानिषीदादब्धःसपुरएता
भवानः ॥ अवतांत्वारोदसीविश्वमिन्वेयजामहेसौमनसायदेवान् ॥ इत्यक्षतैरावाह्यआच्छादनं
दूरीकृत्यसमस्तव्याहृतीनांपरमेष्ठीप्रजापतिःप्रजापतिर्बृहती ॥ अग्निप्रतिष्ठापनेविनियोगः ॥ ॐ
भूर्भुवःस्वःबलवर्धननामानमग्निंप्रतिष्ठापयामि ॥ प्रोक्षितेंधनानिनिक्षिप्य ॥ वेणुधमन्याप्रबोध्य
ध्यायेदेवं ॥ चत्वारिशृंगागौतमोवामदेवोग्निस्त्रिष्टुप् ॥ अग्निमूर्तिध्यानेवि० ॥ ॐ चत्वारिशृंगात्रयो
अस्यपादाद्वेशीर्षेसप्तहस्तासोअस्य ॥ त्रिधाबद्धोवृषभोरोरवीतिमहोदेवोमर्त्याआविवेश ॥ स्मृतिमेश्वा
श्च ॥ सप्तहस्तश्चतुःशृंगःसप्तजिव्होद्विशीर्षकः ॥ त्रिपात्प्रसन्नवदनःसुखासीनःशुचिस्मितः ॥

स्वाह।तुदक्षिणेपार्श्वेदेवींवामेस्वधांतथा ॥ बिभ्रद्दक्षिणहस्तैस्तुशक्तिमन्नंस्रुचंस्रुवं ॥ तोमरंव्यजनंवामे घृतपात्रंचधारयन् ॥ मेषारूढोजटाबद्धोगौरवर्णोमहौजसः ॥ धूम्रध्वजोलोहिताक्षःसप्तार्चिःसर्वकामदः ॥ आत्माभिमुखमासीनएवंरूपोहुताशनः ॥ एषहिदेवःप्रदिशोनुसर्वाःपूर्वोहिजातःसउगर्भेअंतः ॥ सविजायमानःसजनिष्यमाणःप्रत्यङ्मुखस्तिष्ठतिविश्वतोमुखः ॥ अग्नेशांडिल्यगोत्रवैश्वानरमेषारूढवरप्रद प्राङ्मुखदेवाग्नेममसन्मखोवरदोभव ॥ समिद्द्वयंत्रयंवादायउपाकर्महोमेदेवतापरिग्रहार्थमन्वाधानंकरिष्ये ॥ अस्मिन्नन्वाहितेग्नौजातवेदसमग्निमिध्मेनप्रजापतिंप्रजापतिंचाघारदेवतेआज्येनअग्नीषोमौचक्षुषीआज्येन ॥ अत्रप्रधानं ॥ सावित्रीं ब्रह्माणं श्रद्धां मेधां प्रज्ञां धारणां सदसस्पतिं अनुमतिं छंदांस्यृषीन् एताः प्रधानदेवताः आज्येन पुनरत्र प्रधानं अग्निं अन्तृणसूर्यान् अग्निं शकुंतं अग्निं मित्रावरुणौ अग्निं अपः अग्निं मरुतः अग्निं विश्वांदेवान् अग्निं इंद्रासोमौ इंद्रं अग्नामरुतः पवमानसोमं सोमं अग्निं संज्ञानं एताः प्रधानदेवताः दधिसक्तुद्रव्येण शेषेणस्विष्टकृतमाग्निमिध्मसंनहनेनरुद्रंयज्ञोपवीतेन परमात्मानमयासमग्निंदेवान्।विष्णुमग्निंवायुंसूर्यंप्रजापतिंचैताःप्रायश्चित्तदेवताआज्येनज्ञाताज्ञातदोषनिबर्हणार्थंत्रिबारमग्निंमरुतश्चाज्येनाविश्वांदेवांत्संस्रावेणपक्ष्ये अंगदेवताः प्रधानदेवताः सर्वाः संनिहिताः

संतु एवंसांगोपांगेनकर्मणासद्योयक्ष्ये ॥ समस्तव्यात्हृतीनांपरमेष्ठीप्रजापतिः प्रजापतिर्बृहती ॥ अ
न्वाधानसमित्धोमेवि० ॥ ॐ भूर्भुवः स्वःस्वाहा प्रजापतयइदंनमम ॥ अग्न्यायतनादष्टांगुलपरिमि
तेदेशेऐशानींदिशमारभ्यप्रदक्षिणंसमंतात्सोदकेनपाणिनात्रिःपरिमृज्यपूर्वमुपरिनिहितदर्भैर्दशांगुलमि
तेदेशेप्राच्यादिषुपरिस्तृणीयात् ॥ तत्रप्राच्यांप्रतीच्यांचोदगग्रादर्भाः ॥ अवाच्यामुदीच्यांचप्रागग्राः
॥ पूर्वपश्चात्परिस्तरणमूलयोरुपरिदाक्षिणपरिस्तरणं ॥ उत्तरपरिस्तरणंतुतदग्रयोरधस्तात् ॥ तेचदर्भा
अनियतसंख्याएकैकस्यांदिशिचत्वारश्चत्वारइत्येवंषोडशवा ॥ उत्तरतश्चपात्रासादनार्थंकांश्चित्प्रा
गग्रान्दर्भानास्तृणीयात् ॥ अग्नेरीशानतश्चिरंभसापरिषिच्य ॥ उत्तरास्तीर्णेषुदर्भेषुदक्षिणसव्यपा
णिभ्यांक्रमेण ॥ दधिसक्तुस्थालीप्रोक्षण्यौदर्वीस्रुवौप्रणीताआज्यपात्रेइध्माबर्हिषीचेत्येतावतामेवा
सादनं ॥ ततःप्रोक्षणीपात्रमुत्तानंकृत्वा ॥ तत्रानंतर्गर्भितसाग्रसमस्थूलप्रादेशमात्रकुशद्वयरूपेपवित्रे
निधाय ॥ शुद्धाभिरद्भिस्तत्पात्रंपूरयित्वागंधपुष्पाक्षतादिक्षिप्त्वाहस्तयोरंगुष्ठोपकनिष्ठिकाभ्यामुदगग्रेपृ
थक्पवित्रेधृत्वाअपस्त्रिरुत्पूय ॥ पात्राण्युत्तानानिकृत्वाइध्मंचविस्रस्य ॥ सर्वाणिपात्राणित्रिःप्रोक्षयेत् ॥
ताअपःकिंचित्कमंडलौक्षिपेदित्येके ॥ प्रणीतापात्रमग्नेःप्रत्यङ्निधायतत्रप्रागग्रेपवित्रेनिधायोत्पूताभि
रद्भिःपूरयित्वागंधपुष्पाक्षतान्निक्षिप्य मुखसममुद्धृत्य ॥ अग्नेरुत्तरतोदर्भेषुनिधायतेपवित्रेगृहीत्वा ॥ अ

न्यैर्दर्भैराच्छादयेत् ॥ ततःतेपवित्रेआज्यपात्रेनिधायतत्पात्रंपुरतःसंस्थाप्यतास्मिन्नाज्यमासिच्यअग्नेरुत्त
रतस्थितांगारान्भस्मनासहाग्नेरुदक्परिस्तरणाद्बहिर्निरूह्य ॥ तेष्वाज्यपात्रमधिश्रित्यज्वलतादर्भो
ल्मुकेनावज्वल्यांगुष्ठपर्वमात्रंप्रक्षालितंदर्भाग्रद्वयमाज्येप्रक्षिप्यदधिसक्तूनासादितपात्रेनिधायपुनर्ज्वलता
तेनैवदर्भोल्मुकेन दधिसक्तुभिः सहाज्यंत्रिःपर्यग्निकृत्वातदुल्मुकमपास्यापःस्पृष्ट्वा आज्यपात्रंभुविकर्ष
न्निवोदगुद्वास्यांगारानग्नौप्रत्यस्यापःस्पृष्ट्वातत्रस्थमेवाज्यं ॥ सवितुष्ट्वाहिरण्यस्तूपःसवितापुरउष्णिक् ॥
आज्यस्योत्पवनेवि० ॥ ॐ सवितुष्ट्वाप्रसवउत्पुनाम्यच्छिद्रेणपवित्रेणवसोःसूर्यस्यरश्मिभिः ॥ सकृन्मं
त्रेणद्विस्तूष्णींउत्तानपाणिद्वयांगुष्ठोपकनिष्ठिकाभ्यामंतयोरसंसृष्टंगृहीताभ्यामुदगग्राभ्यां पवित्राभ्यांप्रागु
त्पूयतेपवित्रेअद्भिःप्रोक्ष्याग्नौप्रहरेत् ॥ ॐ स्कंदायस्वाहा ॥ स्कंदायइ०॥ अथाग्नेःपश्चात्परिस्तरणाद्ब
हिरात्मनोग्रतोभूमिंप्रोक्ष्यतत्रवर्हिःसन्नहनीरज्जुमुदगग्रांप्रसार्यतस्यांवर्हिः प्रागग्रमुदगपवर्गमविरलमा
स्तीर्यतस्मिन्नाज्यपात्रंनिधायस्रुवादिसंमार्जयेत् ॥ दक्षिणेनहस्तेनस्रुक्स्रुवौगृहीत्वासव्येनकांश्चिद्दर्भाना
दायसहैवाग्नौप्रताप्यस्रुचंनिधायस्रुवंवामहस्तेगृहीत्वादक्षिणेनहस्तेनस्रुवस्यबिलंदर्भाग्रैःप्रागादिप्रागपव
र्गंत्रिःसमृज्याधस्ताद्दर्भाग्रेणैवाभ्यात्मंबिलपृष्ठंत्रिः सम्मृज्यततोदर्भाणांमूलैर्दंडस्याधस्ताद्बिलपृष्ठादारभ्य
यावदुपरिष्टाद्बिलंतावत्त्रिः समृज्याद्भिःप्रोक्ष्यस्रुवंनिष्टप्याज्यस्थाल्याउत्तरतः स्रुगग्रस्पृष्टंनिधायोदकंस्पृष्ट्वा

तैरेवदर्भैर्जुहूंचैवमेवसमृज्यस्रुवादुत्तरतोनिधायदर्भानद्भिः प्रक्षालयित्वाग्नावनुप्रहरेत् ॥ दधिसक्तूनभिघा
र्यत्रिः प्रोक्ष्य आज्याद्दक्षिणतोबर्हिषिनिधाय ॥ एकादशांगुलपरिमितेदेशेगंधाक्षतपुष्पैराग्निंसमंत्रमर्चयेत्
विश्वानिनइतितिसृणांवसुश्रुतोग्निस्त्रिष्टुप् द्वाभ्यामग्न्यर्चनेअंत्याग्निप्रार्थनेविनि० ॥ ॐ विश्वानिनोदुर्ग
हाजातवेदः ॥ सिंधुंननावादुरितातिपर्षि ॥ अग्नेअत्रिवन्नमसागृणानः ॥ अस्माकंबोध्यविताततूनां ॥
यस्त्वाहृदाकीरिणामन्यमानः ॥ अमर्त्यमर्त्योजोहवीमि ॥ जातवेदोयशोअस्मासुधेहि ॥ प्रजाभिं
रग्नेअमृतत्वमश्यां ॥ यस्मैत्वंसुकृतेजातवेदउलोकमग्नेकृणवस्योनं ॥ अश्विनंसपुत्रिणंवीरवंतंगोमंतंर
यिंनशतेस्वस्ति ॥ ततआत्मानंचालंकृत्यहस्तंप्रक्षाल्येध्मबंधनरज्जुमिध्मस्थानेनिधायपाणिनेध्ममादाय
मूलमध्याग्रेषुस्रुवेणात्रिरभिघार्यमूलमध्ययोर्मध्यभागेगृहीत्वा॥अयंतेवामदेवोजातवेदाग्निस्त्रिष्टुप् इध्माद
वनेवि० ॥ॐ अयंतइध्मआत्माजातवेदस्तेनेध्यस्ववर्धस्वचेत्धवर्धयचास्मान्प्रजयापशुभिर्ब्रह्मवर्चसेनान्ना
द्येनसमेधयस्वाहा॥जातवेदसेग्नयइदं०॥स्रुवेणाज्यमादायाग्नेरायतनस्यवायव्यकोणमारभ्याग्नेयकोणपर्यंतंप्र
जापतयेस्वा० प्रजापतयइदं० इतिमनसास्मरन्॥स्वाहेत्युच्चार्यनैरंतर्येणाज्यधारामग्नाविध्मदारूपरिहुत्वापु
नराज्यमादायाग्नेरायतनस्यनैर्ऋत्यकोणतईशानीपर्यंतंतथैवहुत्वात्यरकाचस्रुवेणाज्यमादाय।ग्नयेस्वाहे

त्यग्नेरुत्तरपार्श्वेपूर्वभागेहुत्वापुनराज्यंसोमायस्वाहेत्यग्निदक्षिणपार्श्वेतत्समप्रदेशेहुत्वा अथप्रधानहोमः
ॐ सावित्र्यैस्वाहा सावित्र्याइदंनमम ॐ ब्रह्मणेस्वाहा ब्रह्मणइदंनमम ॐ श्रद्धायैस्वाहा॰ श्र
द्धायाइदं॰ ॐ मेधायै॰ मेधायाइ॰ ॐ प्रज्ञायै॰ प्रज्ञाया॰ ॐधारणायै॰ धारणाया॰ ॐ
सदसस्पतये॰ सदसस्पतय॰ ॐ अनुमतये॰ अनुमतय॰ ॐ छंदोभ्यऋषिभ्यः स्वा॰ छंदो
भ्यऋषिभ्य॰ अथावदानधर्मः स्रुवेणस्रुच्याज्यमुपस्तीर्यदधिसक्तुमध्यादंगुष्ठपर्वमात्रंतिरश्चीनाभिरं
गुष्ठमध्यमानामिकाभिरुदगग्राभिर्नखसंस्पर्शमकुर्वन्नवदायदर्व्यामोप्यततःदधिसक्तुपूर्वभागंप्रागग्राभि
स्तथैवावदायदर्व्यामोप्यपात्रस्थंहविराभिघार्यदर्वीस्छमवत्तंचाभिघार्यविधूमज्वालाग्नौआज्यभागयोर्मध्य
देशेतत्प्रत्यक्देशेवाआच्छादयंनिवदर्व्यावामपार्श्वेणाह्वावयेत् पंचावत्तिनःअत्रप्रसूतोतिमंत्रंपठंति ॐ प्र
सूतोभक्षमकरंचरावपिस्तोमंचेमंप्रथमःसूरिरुन्मृजे॥सुतेसातेनयथागमंवांप्रतिविश्वामित्रजमदग्नीदमे॥
पंचावत्तीतुदर्व्यामुपस्तीर्यमध्यात्पूर्वार्धात्पश्चार्धाच्चत्रिर्हविषोवदायाभिघार्यजुहुयात् ॥ अग्निमीळेवैश्वा
मित्रोमधुच्छंदाअग्निर्गायत्री ॥ उपाकर्मप्रधानदधिसक्तुहोमेविनियोगः॥ ॐ अग्निमीळेपुरोहितंयज्ञस्यदे
वमृत्विजं॥होतारंरत्नधातमंस्वाहा ॥ अग्नयइ॰ ॥ कुंभकस्तन्मैत्रावरुणिरगस्त्योतृणसूर्याअनुष्टुप् ॥

उपाकर्मप्र० ॥ ॐ कुषुंभकस्तदंब्रवीद्गिरेःप्रवर्तमानकः ॥ वृश्चिकस्यारसंविषमरसंवृश्चिकतेविषंस्वाहा ॥
अमृणसूर्येभ्यइ० ॥ त्वमग्नेद्युभिरित्यस्यशौनकोगृत्समदोग्निर्जगती ॥ उपाकर्म ०॥ ॐ त्वमग्नेद्युभिस्त्वमा
शुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि ॥ त्वंवनेभ्यस्त्वमोषधीभ्यस्त्वंनृणांनृपतेजायसेशुचिःस्वाहा ॥ अग्नय
इ० ॥ आवदंछौनकोगृत्समदःशकुंतोजगती ॥ उपाकर्म० ॥ ॐ आवदंस्त्वंशकुनेभद्रमावदतूष्णीमासी
नःसुमतिंचिकिद्धिनः ॥ यदुत्पतन्वदसिकर्करिर्यथाबृहद्वदेमविदथेसुवीराःस्वाहा ॥ शकुंतायेदं० ॥ सोम
स्यमागाथिनोविश्वामित्रोग्निस्त्रिष्टुप् ॥ उपाकर्मप्रधा० ॥ ॐ सोमस्यमातवसंवक्ष्यग्नेवह्निंचकर्थविदथे
यजध्यै ॥ देवांअच्छादीद्यद्युंजेअद्रिंशमायेअग्नेतन्वंजुषस्वस्वाहा ॥ अग्नयइ० ॥ गृणानाभार्गवो
जमदग्निर्मित्रावरुणौगायत्री ॥ उपाकर्म० ॥ ॐ गृणानाजमदग्निनायोनावृतस्यसीदतं ॥ पातंसोम
मृतावृधास्वाहा ॥ मित्रावरुणाभ्यामिदं० ॥ त्वांह्यग्नेगौतमोवामदेवोग्निरष्टी ॥ उपाक० ॥ ॐ त्वां
ह्यग्नेसदमित्समन्यवोदेवासोदेवमरतिंन्येरिरइतिक्रत्वान्येरिरे ॥ अमर्त्यंयजतमर्त्येष्वादेवमादेवंजनतप्र
चेतसंविश्वमादेवंजनतप्रचेतसंस्वाहा ॥ अग्नयइ० ॥ धामंतेगौतमोवामदेवआपोजगती ॥ उपा

क० ॥ ॐ धामंतेविश्वंभुवनमधिश्रितमंतःसमुद्रेहृद्यं तरायुषि ॥ अपामनीकेसमिथेयआभृतस्तमं

श्याममधुमंतंतऊर्मिस्वाहा ॥ अद्भ्यइ० ॥ अबोध्यात्रेयोबुधगविष्ठिरावग्निस्त्रिष्टुप् ॥ उपाक० ॥ अ

बोध्यग्निःसमिधाजनानांप्रतिधेनुमिवायतीमुषासं ॥ यह्वाइवप्रवयामुज्जिहानाःप्रभानवःसिस्रतेनाकम

च्छस्वाहा ॥ अग्नयइ० ॥ गंतानआत्रेयएवयामरुन्मरुतोतिजगती ॥ उ० ॥ ॐ गंतानोयज्ञंयज्ञियाःसु

शमिश्रोताहवमरक्षएवयामरुत् ॥ ज्येष्ठासोनपर्वतासोव्योमनियूयंतस्यप्रचेतसःस्यातदुर्धर्त्तवोनिदः

स्वाहा ॥ मरुद्भ्यइ० ॥ त्वंह्यग्नेर्बार्हस्पत्योभरद्वाजोग्निस्त्रिष्टुप् ॥ उपाकर्म० ॥ ॐ त्वंह्यग्नेप्रथमोमनो

तास्याधियोअभवोदस्महोता ॥ त्वंसींवृषन्नकृणोर्दुष्टरीतुसहोविश्वस्मैसहसेसहध्यैस्वाहा ॥ अग्नय

इ० ॥ योनस्वःपायुर्भारद्वाजोविश्वेदेवाअनुष्टुप् ॥ उ० ॥ ॐ योनस्वोअरणोयश्चनिष्ट्योजिघांसति

देवास्तंसर्वेधूर्वंतुब्रह्मवर्ममम।ंतरंस्वाहा ॥ विश्वेभ्योदेवेभ्यइ० ॥ अग्निंनरोमैत्रावरुणिर्वसिष्ठोग्निर्विराट्

॥ उ०॥ ॐ अग्निंनरोदीधितिभिररण्योर्हस्तच्युतीजनयंतप्रशस्तं ॥ दूरेदृशंगृहपतिमथर्युंस्वाहा ॥ अ

ग्नयइ० ॥ प्रतिचक्ष्वमैत्रावरुणिर्वसिष्ठइंद्रासोमावनुष्टुप् ॥ उ० ॥ प्रतिचक्ष्वविचक्ष्वेंद्रश्चसोमजागृतं ॥

रक्षोभ्योवधमस्यतमशनिंयातुमद्भ्यःस्वाहा ॥ इंद्रासोमाभ्यामिदं० ॥ माचित्काण्वः प्रगाथइंद्रोबृहती
॥ उपा० ॥ ॐ माचिदन्यद्विशंसतसखायोमारिषण्यत ॥ इंद्रमित्स्तोतावृषणंसचासुतेमुहुरुक्थाचशं
सतस्वाहा ॥ इंद्रा० ॥ आग्नेयाहिकाण्वःसौभरिरग्नामरुतोनुष्टुप् ॥ उपा० ॥ ॐ आग्नेयाहिमरुत्सखा
रुद्रेभिःसोमपीतये ॥ सोभर्याउपसुष्टुतिंमादयस्वस्वर्णरेस्वाहा ॥ अग्नामरुद्भ्यइ० ॥ स्वादिष्ठयामधु
च्छंदाः पवमानसोमोगायत्री ॥ उपा० ॥ ॐ स्वादिष्ठयामदिष्ठयापवस्वसोमधारया ॥ इंद्रायपातवेसु
तः स्वाहा ॥ पवमानसोमायेदं० ॥ यत्तेराजन्मारीचः कश्यपः सोमः पंक्तिः ॥ उपाकर्मप्र० ॥
यत्तेराजन्छृतंहविस्तेनसोमाभिरक्षनः ॥ अरातीवामानस्तारीन्मोचनः किंचनाममदिंद्रायेंदोपरिस्रवस्वा
हा ॥ सोमायेदं० ॥ अग्नेबृहन्नाप्त्यस्त्रितोग्निस्त्रिष्टुप् ॥ उपा० ॥ ॐ अग्नेबृहन्नुषसामूर्ध्वोअस्थान्निर्जग
न्वान्तमसोज्योतिषागात् ॥ अग्निर्भानुनारुशतास्वंगआजातोविश्वासद्मान्यप्राःस्वाहा ॥ अग्नयइ० ॥
समानीवइत्यस्यांगिरसःसंवननःसंज्ञानमनुष्टुप् ॥ उपाक० ॥ ॐ समानीवआकूतिःसमानाहृदयानि
वः ॥ समानमस्तुवोमनोयथावःसुसहासतिस्वाहा ॥ संज्ञानायेदं० ॥ यदस्येतिहिरण्यगर्भोग्निःस्विष्ट

कृदतिधृतिः ॥ स्विष्टकृद्धोमेवि॰ ॐ यदस्यकर्मणोत्यरीरिचंयद्वान्यूनमिहाकरं ॥ अग्निष्टत्स्विष्टकृ
द्विद्वांत्सर्वंस्विष्टंसुहुतंकरोतुमे ॥ अग्नयेस्विष्टकृतेसुहुतहुतेसर्वप्रायश्चित्ताहुतीनांकामानांसमर्धयित्रेसर्वा
नःकामांत्समर्द्धयस्वाहा ॥ स्विष्टकृतेग्नयइ॰ ॥ ततोग्नेरुत्तरतस्थितामिध्मबंधनरज्जुंविस्रस्यरुद्राय
स्वा॰ रुद्रायेदं॰ अथदधिसक्तुप्राशनं ॥ दधिक्राव्णोगौतमोवामदेवोदधिक्रावानुष्टुप् ॥ दधिसक्तुप्राश
नेविनि॰ ॥ ॐ दधिक्राव्णोऽअकारिषंजिष्णोरश्वस्यवाजिनः ॥ सुरभिनोमुखाकरत्प्रणआयूंषितारिषत्
॥ इतिप्राश्य ॥ आचम्य ॥ परिस्तरणदर्भाणामधस्तादंजलिंनिधाय ॥ अन्येनजलंसेचयित्वातज्जलं
भूमौनिषिंचेयुः ॥ एतदेवमार्जनं यज्ञोपवीतमित्यस्यपरब्रह्मपरमात्मात्रिष्टुप् ॥ यज्ञोपवीतहवनेवि
नि॰ ॥ ॐ यज्ञोपवीतंपरमंपवित्रंप्रजापतेर्यत्सहजंपुरस्तात् ॥ आयुष्यमग्र्यंप्रतिमुंचशुभ्रंयज्ञोपवीतंब
लमस्तुतेजःस्वाहा ॥ परमात्मनइदंन॰ ॥ प्राचीनावीती ॥ पितृप्रीत्यर्थंब्राह्मणेभ्यःज्ञोपवीतदानंकरिष्ये ॥
यज्ञोपवीतंदत्वा ॥ अभिमंत्रणंकारयेत् ॥ ॐ भूः ॐ भुवः ॐ स्वः ॥ यज्ञोपवीतंपलाशपर्णेनिधाय ॥
ॐ आपोहिष्ठाम॰ जनयथाचनः ॥ हिरण्यवर्णाःशुचयः पावकायासुजातःकश्यपोयास्विंद्रः ॥ अग्निं
यागर्भंदधिरेविरूपास्तानआपःशꣳस्योनाभवंतु ॥ यासाꣳराजावरुणोयातिमध्येसत्यानृतेअवपश्यंजनो

नां ॥ मधुश्चुतःशुचयोयाःपावकास्तानआपःशꣳस्योनाभवंतु ॥ यासांदेवादिविकृण्वंतिभक्षंयाऽअंतरि
क्षेबहुधाभवंति ॥ याःपृथिवींपयसोदंतिशुक्रास्तानआपःशꣳस्योनाभवंतु ॥ शिवेनमाचक्षुषापश्यतापः
शिवयातनुवोपस्पृशतत्वचंमे ॥ सर्वाꣳअग्नीꣳरप्सुषदोहुवेवोमयिवर्चोबलमोजोनिधत्त ॥ पवमानःसु
वर्चनः ॥ पवित्रेणविचर्षणिः ॥ यःपोतासपुनातुमा ॥ पुनंतुमांदेवजनाः ॥ पुनंतुमनवोधिया ॥ पुनं
तुविश्वेऽआयवः ॥ जातवेदःपवित्रवत् ॥ पवित्रेणपुनीहिमा ॥ शुक्रेणदेवदीद्यत् ॥ अग्नेक्रत्वाक्रतूꣳ
रनु ॥ यत्तेपवित्रमर्चिषि ॥ अग्नेविततमंतरा ॥ ब्रह्मतेनपुनीमहे ॥ उभाभ्यांदेवसवितःपवित्रेणसवेन
च ॥ इदंब्रह्मपुनीमहे ॥ वैश्वदेवीपुनतीदेव्यागात् ॥ यस्यैबह्वीस्तनुवोवीतपृष्ठाः ॥ तयामदंतःसधमा
द्येषु ॥ वयꣳस्यामपतयोरयीणां ॥ वैश्वानरोरश्मिभिर्मापुनातु ॥ वातःप्राणेनेषिरोमयोभूः ॥ द्यावापृथि
वीपयसापयोभिः ॥ ऋतावरीयज्ञियेमापुनीतां ॥ बृहद्भिःसवितस्तृभिः ॥ वर्षिष्ठैर्देवमन्मभिः ॥ अग्नेद
क्षैःपुनीहिमा ॥ येनदेवाऽअपुनत ॥ येनापोदिव्यंकशः ॥ तेनदिव्येनब्रह्मणा ॥ इदंब्रह्मपुनीमहे ॥ यः
पावमानीरध्येति ॥ ऋषिभिःसभृतꣳरसं ॥ सर्वꣳसपूतमश्नाति ॥ स्वदितंमातरिश्वना ॥ पावमानी

योऽअध्येति ॥ ऋषिभिःसंभृत१रसं ॥ तस्मैसरस्वतीदुहे ॥ क्षीर१सर्पिर्मधूदकं ॥ पावमानीस्वस्त्य
यनीः ॥ सुदुघाहिपयस्वतीः ॥ ऋषिभिःसंभृतोरसः ॥ ब्राह्मणेष्वमृत१हितं ॥ पावमानीर्दिशंतुनः ॥
इमंलोकमथोऽअमुं ॥ कामांत्समर्धयंतुनः ॥ देवीर्देवैःसमाहिताः ॥ पावमानीस्वस्त्ययनीः ॥ सुदुघाहि
घृतश्चुतः ॥ ऋषिभिःसंभृतोरसः ॥ ब्राह्मणेष्वमृत१हितं ॥ येनदेवाःपवित्रेण ॥ आत्मानंपुनतेसदा ॥
तेनसहस्रधारेण ॥ पावमान्यःपुनंतुमां ॥ प्राजापत्यंपवित्रं ॥ शतोद्याम१हिरण्मयं ॥ तेनब्रह्मविदोवयं ॥
पूतंब्रह्मपुनीमहे ॥ इंद्रःसुनीतीसहमापुनातु ॥ सोमःस्वस्त्यावरुणःसमीच्या ॥ यमोराजाप्रमृणाभिः
पुनातुमा ॥ जातवेदामूर्जयंत्यापुनातु ॥ तत्सवि० यात् ॥ इत्यभिषिच्य ॥ वामहस्तेधृत्वा ॥ देवस्य
त्वासवितुःप्रसवेश्विनोर्बाहुभ्यांपूष्णोहस्ताभ्यां ॥ इतित्रिःसंताड्य ॥ ॐ भूरग्निंचपृथिवींचमांच ॥ त्री१श्च
लोकांत्संवत्सरंच ॥ प्रजापतिःस्त्वासादयतु ॥ तयादेवतयांगिरस्वध्रुवासीद ॥ भुवोवायुंचांतरिक्षंचमांच ॥
त्री१श्चलोकान्० ॥ प्रजापति० ॥ तयादेवतया० ॥ सुवरादित्यंचदिशंचमांच ॥ त्री१श्चलोकान् ॥
प्रजापति० ॥ तयादे० ॥ भूर्भुवःसुवश्चंद्रमसश्चदिशंचमांच ॥ त्री१श्चलोकान्० ॥ प्रजापति० ॥

तर्यादेवतयां॰ ॥ ॐकारंप्रथमतंतोन्यसामि ॥ अग्निंद्वितीयतंतौन्यसामि ॥ नागांन्तृतीयतंतौ॰ ॥ सोमंचतुर्थतं॰ ॥ पितृन्पंचमतं॰ ॥ प्रजापतिंषष्ठमतं॰ ॥ वायुंसप्तमतंतौ॰ ॥ सूर्यंअष्टमतंतौ॰ ॥ विश्वान्देवान्नवमतंतौन्यसामि ॥ अग्न्यादिदेवताभ्यो॰सर्वोप॰मि ॥ देवस्य॰इत्यादाय ॥ उद्वयंतमस॰मं ॥ इतिसूर्यायदर्शयित्वा ॥ यज्ञोपवीतंप॰जः ॥ इतिधारयेत् ॥ ॥ ७ ॥ ॥ ७ ॥

॥ ८६ ॥ ॥ अथ ब्रह्मचारिणः नूतन श्रावणी विधि प्रारंभः ॥

श्रीगणेशायनमः ॥ ॥ ब्रह्मचारीचेत्कटिसूत्रकोपीनवस्त्राजिनयज्ञोपवीतमेखलादंडानुपनयनवद्धारयित्वापुराणानिजलेनिक्षेपयेत् ॥ युवंवस्त्राणीत्यस्यऔचथ्योदीर्घतमामित्रावरुणौत्रिष्टुप् ॥ वस्त्रधारणेवि नि॰ ॥ ॐ युवंवस्त्राणिपीवसावसाथेयुवोरच्छिद्रामंतवोहसर्गाः ॥ अवातिरतमनृतानिविश्वऋतेनामित्रावरुणासचेथे ॥ मित्रस्यचक्षुरित्यस्यवामदेवोअजिनंत्रिष्टुप् ॥ अजिनधारणेवि॰ ॥ ॐ मित्रस्यचक्षुर्धरुणंबलीयस्तेजोयशस्वीस्थविरंसमिद्धं ॥ अनायनस्यंवसतंजरिष्णुपरीदंवाज्याजिनंदधेहं ॥ यज्ञोपवीतमित्य॰यज्ञोपवीतधारणे॰ ॥ ॐ यज्ञोप॰ ॥ तेजः॰ ॥ इयंदुरुक्तादितिद्वयोर्वामदेवोमेखलात्रिष्टुप् ॥ मेखलाबंधनेविनियोगः ॥ ॐ इयंदुरुक्तात्परिबाधमानाच्छर्मवरूथंपुनतीनआगात् ॥ प्राणापा